श्री॰

॥ नारदकृतशिक्षापुस्तकम् ॥

॥ ऋ॰ नाणपुरकम् ॥

ॐ-६९७


सिद्ध   साध्य चक्र

अकयह	उडप	आखदक	ऊचफ
ओडव	ऌझम	औढ ग	ॡञय
ई घनक्ष	ऋजभ	ऐगधक्ष	एछब
अःतस	ॡठल	अंणष	एटर

सुसिद्धचक्र   शत्रुचक्र

॥ अथ श्रीकक्षपुटग्रंथ प्रारंभः ॥

Kumaraswami Sailam,



प्रस्तावना.

सुरवर वृषभेश व्योमकेश स्मशानीं ॥ वसुनि करित योगीवृंदसंबाध हानी ॥
नमन करुनि त्यातें सिद्धनागार्जुनीं जो ॥ लिखित, अखिल सिद्धीदायि सद्ग्रंथ गाजो ॥ १ ॥

ही ईशसृष्टी किती अद्भुत चमत्कारांनीं भरलेली आहे, व तिचीं अनंत कार्यें अबाधितपणें चालण्यास कोणतीं दृश्य व अदृश्य तत्वें कारण आहेत, याचा विचार करितांना मोठमोठ्या विद्वानांचीही मति कुंठित होते. आपल्या भरतखंडांत प्राचीन काळीं, चौदा विद्या, चौसष्ट कला अगदीं जागृत होत्या; त्यांत योगविद्या व मंत्रास्त्रविद्या या प्रबल कार्यकारी आणि महत्वाच्या मानिल्या जात. परंतु, कालें-करून परवशतेमुळें व आळसामुळें त्या विद्यांचा ऱ्हास होत जाऊन, धर्मश्रद्धाही बुडत चालली. त्या योगानें ब्राह्मणादिकांचा स्नान, संध्या, जप, तप, अनुष्ठान यांजवरचा विश्वास उडत चालला. परंतु ‘ सत्यमेव जयते ’ या न्यायानें ब्रह्मविद्या व योगविद्या वगैरेचा पाश्चात्य लोकांनीं चांगला अनुभव घेऊन ‘ मेस्मेरिझम् ’ च्या द्वारें ते पुष्कळ चमत्कार करून दाखवीत आहेत. व वेदामध्यें सांगितलेले मंत्रशास्त्र प्रयोग, प्राणायाम वगैरे गोष्टी सानुभव खऱ्या आहेत, असें ते आनंदानें प्रतिपादन करीत असून, अर्वाचीन आंग्लविद्याविभूषित लोकांचाही त्यावर विश्वास बसत चालला आहे; आणि त्या योगानें वेदप्रणित धर्मावर व प्राचीन संस्कृत ग्रंथांवर त्यांचा पूज्यभाव वाढत चालला आहे, ही गोष्ट फार संतोषाची होय.

जुन्या मतांच्या लोकांसंबंधानें विचार करूं लागल्यास ‘ गतानुगतिका जनाः ’ या वाक्याप्रमाणें त्यांजकडून अंधपरंपरा अनुसरली जात आहे. तेणेंकरून त्यांच्या कर्माचरणाचें फल जसें मिळावें तसें त्यांस मिळत नाहीं. तरी, जे योग्य व अनुभवी गुरूंकडून ज्ञान संपा-

दन करितात, त्यास त्वरित सिद्धि प्राप्त होते, हें ही प्रसिद्ध आहे. तात्पर्य, सारासार विचारशक्ति व तारतम्य ज्ञानावांचून कोणत्याही गोष्टीचें मर्म कळणें अशक्य आहे; करितां ग्रंथोक्त अनुभव न आल्यास, त्यास आळसानें कांहीं तरी नांव न ठेवितां, आपल्या कृतीमध्यें व ज्ञानामध्येंच कांहीं दोष आहे, असें समजलें पाहिजे; व तो दोष कोणता, हें शोधून काढून तो निश्चयपूर्वक घालविण्याचा प्रयत्न केला पाहिजे, ह्मणजे कार्यसिद्धि हात जोडून पुढें उभी राहील. असो.

अलीकडे यंत्र मंत्रशास्त्राचीं व इंद्र-महेंद्रजालाचीं अनेक पुस्तकें छापून प्रसिद्ध झालीं आहेत. तरी त्यांमध्यें 'सिद्धनागार्जुन विरचित कक्षपुटी' हा ग्रंथ परम श्रेष्ठ व अपूर्व आहे, असें अवलोकनांतीं समजून येईल. हा ग्रंथ अत्यंत प्राचीन असून, त्याची हस्तलिखित प्रत आह्मांस फार प्रयासानें व अकल्पित रीतीनें मिळाली व त्यांतील अत्यंत गुह्य व अगाध ज्ञानभांडार अवलोकन करून, हा ग्रंथ छापून त्याचा जीर्णोद्धार करावा, असें मनांत आलें. हा ग्रंथ तज्जातीय अनेक ग्रंथांच्या साह्यानें लिहिलेला आहे, असें ग्रंथकर्त्याच्या पूर्वारंभावरून कळतें. यांत अथर्वण वेदोक्त मंत्र साधन ह्मणजे-जारण, मारण, उच्चाटण, स्तंभन, मोहन, वशीकरण, जलस्तंभन, सेनास्तंभन, अनेकरूपधारण, यक्षिणीविद्यासाधन, चेटक, अंजन, दिव्यदृष्टि, अदृश्य होणें, शस्त्रास्त्रविद्या, पादुकासाधन, गुटिकाधारण, अंतरिक्षगमन, इंद्रजालविद्या, क्षुत्पिपासानिवारण, व अमृत संजीवनी मंत्र इत्यादि अनेक अत्यंत गुह्यतम व महत्वाचे विषय आहेत. याचे एकंदर पटल २० आहेत. याचें प्राकृत भाषांतर करून छापल्यास फार उपयोग होईल, असें वाटून आमच्या अनेक स्नेहित विद्वानांकडे ही गोष्ट काढिली; परंतु, याचें प्राकृत भाषांतर केल्यास, ग्रंथाचें महत्व कमी होऊन, तदुक्त सिद्धि घडण्यास अडचण पडेल, व अनधिकारी लोकांच्या हातीं गेल्यामुळें त्याचा कांहीं उपयोग न होतां विनाकारण अशा बहुमोल ग्रंथाचा स्वरूपनाश केल्याचा दोष अंगीं जडेल, असें बहुमत पडल्यावरून, भाषांतर न करितां फक्त संस्कृतामध्येंच छापून काढावा लागला. व अशा महत्वाच्या विद्या जितक्या गुप्त राहतील तितक्या त्या अधिक फलद्रूप होता..., असें सर्व ऋषींचेंही मत आहे. करितां, संस्कृत न जाणणाऱ्या लोकांनीं याबद्दल खेद न मानितां, व-

रील सर्व गोष्टी लक्षांत आणून पुस्तकाचा योग्य उपयोग करून घ्यावा, अशी आमची त्यांस सविनय प्रार्थना आहे.

शुद्धरीतीनें छापण्याकडे बरेंच लक्ष दिलें आहे, तथापि अन्य प्रत न मिळाल्यामुळें कदाचित् हस्तदोषानें व नजरचुकीनें अशुद्ध राहण्याचा संभव आहे. तरी विद्वान् लोक तें सुधारून घेऊन मेहेरबानीनें आह्मांस कळवितील अशी अशा करितों. पुढील आवृत्तींत त्या चुकांची दुरुस्ती करण्यांत येईल.

हा ग्रंथ छापून पुरा होई तों पर्यंत आह्मांस पुष्कळ प्रयास होऊन बऱ्याच अडचणी सोसाव्या लागल्या व खर्चही पुष्कळ आला; तथापि त्याकडे लक्ष न देतां या ग्रंथाची किंमत, सर्वांच्या सोईकरितां फारच माफक ह्मणजे २ रु. ठेविली आहे. उत्सुक विद्वान लोक या ग्रंथाची खरी योग्यता जाणून, याच्या संग्रहानें आपल्या प्राचीन विद्याभांडाराचें रक्षण केल्याचें श्रेय घेतील, अशी पूर्ण आशा आहे. ती परमेश्वर सफल करो.

बेळगांव
वैशाख शु० १५ शके १८१९.

विद्वत्कृपाभिलाषी—
आबाजी रामचंद्र सावंत,
श्रीरामतत्व प्रकाश छापखान्याचे मालक.

॥ उपोद्घातः ॥

अस्य ग्रंथस्य रचयिता किल कविकुलवर्यः ‘ सिद्धनागार्जुनः ’ कस्मिन्देशे कस्मिन्काले वा जात इति निश्चेतुं न शक्यते; किंतु ग्रंथरचनाचातुर्येण कश्चिद्देवांशश्चायमिति नात्र संदेहः । तेन महाकविना सिद्धनागार्जुनेन अथर्ववेदोक्तविद्या दुराधिगमेति मत्वा तदुक्तमंत्र, यंत्र, तंत्र, साधकानां सुलभमार्गप्रदर्शनाय लोकानुग्रहार्थं शिवपार्वती संवादरूपोऽपूर्वोयं ग्रंथो निरमायि ॥ अत्रग्रंथे विंशतिपटलाः संति. तत्र मंत्रसाधनादि कथितमस्ति. अस्य पुस्तकस्य विषयमालैव अनर्घतां स्पष्टयति. इदमपि ज्योतिःशास्त्रमिव प्रत्यक्षप्रमाणशास्त्रम् । पूर्वदेशे–बंगालदेशे, बहवो जनाः सम्यगास्मिन् परिशीलिताः संति । केवलमस्मद्देशे एतदानुभाविकाः विरला संति. अतः प्राचीनतरास्य ग्रंथस्य प्रायः दुष्प्रापं सुपरिशुद्धपुस्तकं मुद्रणोत्सुकैरस्माभि र्बहुप्रयासेनसंपाद्य विद्वद्भिर्यथामति परिशोध्यच मुद्रितोयं ग्रंथो मन्यामहे मुदमाधास्यति सज्जनानामिति । मुद्रितेऽस्मिन्पुस्तके प्रतिपटलम् मंत्राः प्रायः पुष्पाकाराचिन्हैः सूचिताः मंत्रांकाश्च पृथक् प्रदार्शिताः । एतत्सर्वं दृष्ट्वा सर्वे आस्तिकजना एतादृशास्याऽपूर्व ग्रंथस्योदाराश्रयं दद्युरिति सविनयमाशास्महे ॥

ग्रंथप्रसिद्धकर्तारः

॥ अथ कक्षपुटीस्थ विषयानुक्रमणिका ॥

(अत्र प्रतिपटलमांवतर विषया अपि अनेके सन्ति ते ग्रंथस्य सम्यगवलोकनेन ज्ञातप्राया भविष्यन्ति ।)

विद्वज्जनांस प्रार्थना.

आमच्याकडे पुराण, वेदान्त, ज्योतिष, व्याकरण, काव्य, वैद्यक, व धर्मसंबंधीं वगैरे सर्व तऱ्हेचे संस्कृत प्राकृत ग्रंथ, कायद्याचीं, शाळोपयोगी, चमत्कारिक, मराठी, कानडी, हिंदुस्थानी व इंग्रजी अनेक पुस्तकें अगदीं योग्य किंमतीनें विकत मिळतात. एकवार मागवून अनुभव पाहावा.

आबाजी रामचंद्र सावंत

श्री रामतत्व-प्रकाश छापखान्याचे मालक, बेळगांव, इ० मुंबई.

॥ श्रीगणेशायनमः ॥ श्रीसद्गुरुचरणारविंदाभ्यांनमः ॥ यः शांतःपरमान्वयः परशिवः कं कालकालांतको ध्यानातीतमनादिनित्यनिचयः संकल्पसंकोचकः ॥ आभासांतरभासकः समरसःसर्वात्मना बोधकःसोयं सर्वमयो ददातु जगतां विद्यादिसिद्ध्यष्टकं ॥ १ ॥ या नित्याकुलकेलिशोभितवपु र्बोधादिना जृंभते पूर्णाभामृतकुंडलापरपरा मंत्रात्मिका सिद्धिदा॥ मालापुस्तकधारिणी त्रिनयना कुंदेंदुवर्न्निर्मला नित्यानंदकुलप्रकाशजननी वाग्देवता माश्रये ॥ २ ॥ एषां वाक्यं श्रुतं किंचिन्माणिमंत्रौषधादिकं॥ तत्तत्कर्मणि तान्पूर्णान् प्रणमामि पुनःपुनः ॥ ३ ॥ संसारे बहुविस्तीर्णे विद्यासिद्धि मनेकधां ॥ प्रोक्तवान् शंकरः पूर्व यदपृच्छत पार्वती ॥ ४ ॥ अन्यैर्देवगणैः सिद्धै र्मुनिभिः साधकोत्तमैः ॥ यद्यदुक्तं हिशास्त्रेषु तत्सर्वमवलोकितं ॥ ५ ॥ शांभवे ह्यामले शाक्ते मौले कौलेयडामरे ॥ स्वच्छंदे लाकुलेशैवे राजतंत्रेऽमृतेश्वरे ॥ ६ ॥ उड्डीशे वातुलेतंत्रे उच्छिष्टे सिद्धशांबरे ॥ किंकिणीमेरुतंत्रेच कालचंडीश्वरीमते ॥ ७ ॥ शाकिनीडाकिनीतंत्रे रौद्रे नुग्रहनिग्रहे ॥ कौतुके शक्तितंत्रेच निराकारगुणोत्तरे ॥ ८ ॥ हरमेखलके तंत्रे इंद्रजालेरसार्णवे ॥ अथर्वणे महावेदे चार्वाकेगारुडेऽपिच ॥ ९ ॥ इत्येवमागमोक्तं च वक्त्राद्वक्रेण यच्छ्रुतं ॥ तत्तत्सर्वं समुधृत्य

दध्नोघृत मिवादरात् ॥ १० ॥ साधकानांहितार्थाय मंत्रखंडमिहोच्यते ॥ वश्यमाकर्षणं-
स्तंभो मोहउच्चाटमारणं ॥ ११ ॥ विद्वेषंव्याधिकरणं पशुसस्यार्थनाशनं ॥ कौतुकंचेंद्रजालंच
यक्षिणीमंत्रसाधनं ॥ १२ ॥ चेटकंचांजनंदिव्य मदृश्यंपादुकागतिः ॥ गुटिकाखेचरत्वंच
मृतसंजीवनादिकं ॥ १३ ॥ तथाकक्षपुटीसिद्धा सांगोपांगमनेकधा ॥ सुसाध्यप्रत्ययोपेतंसा
धकानांहितंप्रिये ॥ १४ ॥ तत्तन्मंत्रमुखंज्ञात्वाकर्तव्यंसिद्धिमिच्छता ॥ मंत्रसाधनकंपूर्वंसि
ध्यर्थंसाधकोत्तमैः ॥ १५ ॥ विनामंत्रविधानेननसिद्धिंलब्धवान्भवेत् ॥ अथमंत्रांशकंवच्मो
मेरुतंत्रेशिवोदितं ॥ १६ ॥ मंत्रसाधकयोर्वर्णान्स्वरांश्चक्रमतःपृथक् ॥ विधायसिद्धिसाध्या
दिगणये न्मंत्रवित्तमः ॥ १७ ॥ अनुस्वारंविसर्गंचजिव्हामूलीयषंढकान् ॥ मुत्काासंयुक्तवर्णां
श्चगणनांकारयेद्बुधः ॥ १८ ॥ मातापितृकृतंनामगुरुणायच्चकीर्तितं ॥ संहितोच्चारणंप्राप्तंके-
वलाक्षरसंयुतं ॥ १९ ॥ अपभ्रंशाक्षरंत्यक्त्वासाधकश्चात्रशोधयेत् ॥ व्यंजनैर्व्यंजनंसाध्यंस्वरै-
र्नामस्वरांस्तथा ॥ २० ॥ आद्यमाद्येनसंशोध्यंद्वितीयेनद्वितीयकं ॥ अनेनैवप्रकारेणशेषाःशो-
ध्यायथाक्रमात् ॥ २१ ॥ आद्यंयदक्षरंनाम्नोगणयेच्चतदादितः ॥ एवमत्रपरिस्थानंमातृका १
णामयंक्रमः ॥ २२ ॥ चतुष्कंचचतुष्कंचपरित्यज्यपुनःपुनः ॥ सिद्धसाध्यसुसिद्धारिसंज्ञयैव-

यथाक्रमं ॥ २३ ॥ एवंक्रमेणसर्वेषांमंत्राणांगणनेकृते ॥ कियत्सिद्धकियत्साध्यइत्यादाव-
पिचिंतयेत् ॥ २४ ॥ यंत्रेमंत्रेभवेदेतत्सिद्धादीनांचतुष्टयं ॥ समंत्रःसिद्धइत्युक्तःसाध्योवैसि-
द्धवर्जितः ॥ २५ ॥ रिपुर्वर्जंमंत्रयत्रंससुसिद्धमिहोच्यते ॥ सुसिद्धैर्नविहीनंचतत्त्रयंशत्रुभू-
षितं ॥ २६ ॥ आदिसिद्धौमध्यसिद्धौसिद्धसिद्धौयथाभवेत् ॥ सुसिद्धःसतुविज्ञेयः साधकानां
फलप्रदः ॥ २७ ॥ आदावंतेसुसिद्धोयस्त्रैलोक्यमपिदास्यति ॥ आदावंतेचसाध्योयःसोति
कालेनसिध्यति ॥ २८ ॥ आदावंतेचयःशत्रुःसाधकंमारयत्यलं ॥ सिद्धःसिध्यतिकालेनसा-
ध्यस्तुजपहोमतः ॥ २९ ॥ सुसिद्धःस्मरणादेवरिपुस्साधकमारकः ॥ एवंमंत्राशकंज्ञात्वासु-
सिद्धःसिद्धमेववा ॥ ३० ॥ साध्यंवापिक्कचिद्ग्राह्यं सिध्यर्थंमंत्रमुत्तमं ॥ शास्त्राद्वागुरु-
वक्राद्वा ग्राहयेत्साधयेत्पुनः ॥ ३१ ॥ पुरेवापत्तनेग्रामे कटकेसिंधुसंगमे ॥ वनेचोपवनेतीर्थे
महापीठेऽथसागरे ॥ ३२ ॥ पर्वतेसिद्धवृक्षेच मूलवृक्षेस्मशानके ॥ गुहामातृगृहेपुण्ये क्षेत्रे
वाथमहानदे ॥ ३३ ॥ सिद्धमंत्रेशिवस्थाने गृहेवाथयथोदिते ॥ दीपस्थानंसुनिश्चित्य कूर्मंच
क्रंसुसिद्धिदं ॥ ३४ ॥ ॥ अष्टवर्गांलिखेद्धीमान् मध्यतोयावदुत्तरं ॥ लक्षमीशपदेक्षेत्रे वे
दास्त्रेनवकोष्टके ॥ ३५ ॥ हृदास्यभुजकुक्ष्यंघ्रि पुच्छेवर्गाःक्रमास्थिताः ॥ पादादिपदिसंज्ञानि

तेषुक्षेत्राधिपानवा ॥ ३६ ॥ अमृतंनृषभंचैव शूलराजंचवासुकिं ॥ अमरंअजरंचैव पूज्यः
शक्तियुतंतथा ॥ ३७ ॥ पद्मयोनिंमहाशंखं ज्ञेयाअत्रत्वनुक्रमात् ॥ मध्यात्पूर्वो-
दितःपूज्या मंत्रमत्रैवकथ्यते ॥ ३८ ॥ अनेनमंत्रेणक्षेत्रपालामृतादयःपूज्याः ॥ धर्मोमंत्र-
विधिःपूजा नाममंत्रेणसाध्यते ॥ ३९ ॥ यत्रयत्रभवेद्वर्गो क्षेत्रनामाद्यमक्षरं ॥ तन्मुखंशेष
वर्गेषु करकुक्ष्यंघ्रिकल्पना ॥ ४० ॥ मुखस्थःक्षोभयेन्मंत्री करस्थस्स्वल्पभोगभाक् ॥ कुक्षि-
स्थितोह्युदासीनः पादस्थोदुःखमाप्नुयात् ॥ ४१ ॥ पुच्छस्थोवधबंधंच जपादाप्नोतिनिश्चि-
तं ॥ दीपस्थानमतःक्षेत्रे ज्ञात्वामंत्रान्शुचिर्जपेत् ॥ ४२ ॥ क्षेत्रसाधकमंत्राणा मेकमेवाद्य
मक्षरं ॥ यदिस्यात्सध्रुवोमंत्रः क्षिप्रमेवसुसिध्यति ॥ ४३ ॥ इतिकूर्मचक्रं ॥ जपमालादि-
सिध्यंता मंत्राणांसाधनोच्यते ॥ अष्टोत्तरशतंचैव चतुःपंचाशदेवच ॥ ४४ ॥ सप्तविंशन्म
णिर्वार्थ कर्तव्याजपमालिका ॥ उत्तमामध्यमाहीना त्रिधाप्रोक्ताक्रमेणतु ॥४५॥ ब्रह्मग्रंथ्य-
न्विताप्रोक्ता मेरुतंत्रेशिवोदिता ॥ मंत्रप्रत्यक्षतासिध्यै शांतिकेवाथपौष्टिके ॥ ४६ ॥ स्फा
टिकीमौक्तिकीवापि प्रोतव्यासितसूत्रकैः ॥ सर्वकामप्रसिध्यर्थं जपेरुद्राक्षमालया ॥ ४७ ॥
धर्मार्थकाममोक्षार्थं जपेत्पद्माक्षमालया ॥ सारस्वतेप्रवालोत्था वश्येसैवप्रकीर्तिता ॥४८॥

पद्मरागमयावापि समस्तेपुत्रजिवीका ॥ वेगादुच्चाटयेच्छत्रून्महादेवेनभाषितं ॥ ४९ ॥
गर्दभस्यह्यधोदंते र्मणीन्कृत्वाचवालकैः ॥ जपमालाप्रकर्तव्या शत्रुमारणकर्मणि ॥ ५० ॥
नरस्नायूत्थसूत्रेण प्रोतव्याकार्यसिद्धिदा ॥ प्रेतदंतैरधोद्भूतै कर्तव्याजपमालिका ॥ ५१ ॥
साध्यदेहनखैःकेशै ग्रथिताद्वेषकर्मणि ॥ मणिभिःशंखसंभूतैरक्षमालाथसाधने ॥ ५२ ॥
निधानयक्षिणीसिध्यै प्रोतव्यासितसूत्रकैः ॥ अंगुष्ठानामिकाभ्यांतु जपेदुत्तमकर्मणि॥५३॥
अंगुष्ठमध्यमाभ्यांतु जपेदाकृष्टकर्मणि ॥ तर्जन्यंगुष्ठयोगेन विद्वेषोच्चाटनेजपः ॥ ५४ ॥
कनिष्ठागुंष्ठकाभ्यांतु जपेन्मारणकर्मणि ॥ उदयाद्यामपर्यंतं हेमंतेपौष्टिकेजपेत् ॥ ५५ ॥
यामद्वयंपूर्वरात्रे शिशिरेमारणेजपेत् ॥ वसंतेप्रहरादूर्ध्वं याममध्यान्हकंजपेत् ॥ ५६ ॥
कार्यमाकर्षणंतत्र मंत्रैरिष्टस्यवस्तुनः ॥ ग्रीष्मेतृतीयकोयामो विहितोद्वेषकर्मणि ॥ ५७ ॥
ततोस्तमयपर्यंत मुच्चाटेतोयदागमे ॥ अर्धरात्रान्निशांतंच जपेच्छरदिशांतिके ॥ ५८ ॥ अ
न्यमतेतु ॥ यस्मिन्कस्मिनृतौकार्यं मंत्राणांसाधनंशुभं ॥ पूर्वाण्हेचैवपुष्ट्यर्थं मध्यान्हेप्रीति-
नाशनं ॥ ५९ ॥ उच्चाटमपराण्हेतु संध्यायांमारणंतथा ॥ सोमदेवगुरूपेता पौष्टिकेशंसिता
बुधैः ॥ ६० ॥ अष्टमीनवमीचैव दशम्येकादशीतथा ॥ शुक्रभानुसुतोपेता प्रशस्ताकृष्टिक

कक्ष णि ६१ ॥ अष्टमीपौर्णिमसि च प्रतिपन्नवमीतथा ॥ शुक्रभानुसुतोपेता शस्ताविद्वेषक- पुटी.
र्मणि ॥ ६२ ॥ ततश्चतुर्दशीकृष्णा शनिवारेतथाष्टमी ॥ उच्चाटनेतिशस्तेयं जपेच्छंकरभा-
३ षितं ॥ ६३ ॥ अमावास्याष्टमीकृष्णा तादृशीचचतुर्दशी ॥ भानुनातत्सुतोपेता भूसुतेना- प०१
थसंयुता ॥ ६४ ॥ मारयेताद्भूतंहोमा द्रक्षितंशंभुनापिवा ॥ एवंसिध्यंतिकर्माणि तिथिवा
रानुसारतः ॥ ६५ ॥ यथोक्तासनमारूढो जपन्मंत्रीसमाचरेत् ॥ कुशाजिनांबरैरुक्ता चतुरं-
गुलमूर्ध्वता ॥ ६६ ॥ चतुरस्रंद्विहस्तंच सुदृढंमृदुनिर्मितं ॥ तत्रोपरिनियुंजीत योगंमंत्रस्य-
सिद्धये ॥ ६७ ॥ वदन्नश्नन्स्वपन्वान्य माश्रयंकिमपिस्मरन् ॥ क्षुतजृंभणहिक्कादि विकली-
कृतमानसः ॥ ६८ ॥ मंत्रसिद्धिंनचाप्नोति तस्माद्यत्नपरोभवेत् ॥ व्याघ्रचर्मासनंवश्ये मो
क्षेचधनसाधने ॥ ६९ ॥ आकृष्टौयद्यदिष्टंस्या द्वारिणंशांतिपौष्टिके ॥ उच्चाटेमाहिषंचर्म
मारणेनरकेशजं ॥ ७० ॥ शांतिकेस्वस्तिकंप्रोक्तं पौष्टिकेपद्मजासनं ॥ आकृष्टौपार्ष्णिकंज्ञेयं
विद्वेषेकुक्कुटासनं ॥ ७१ ॥ अर्धस्वस्तिकमुच्चाटे अर्द्धोत्थानंतुमारणे ॥ महाकाल्याश्चदुर्गाया
वश्ये उक्तंशिवालये ॥ ७२ ॥ आकृष्टौनियमोनास्ति विद्वेषःस्यात्स्मशानके ॥ उच्चाटनंकु- ३
त्सितेवा शून्यदेवालयोपरि ॥ ७३ ॥ स्मशानेकालिकाक्षेत्रे प्रेतमारुह्यमंत्रवित् ॥ दक्षिणा-

भिमुखःस्थित्वा दंतैःसंपीड्यचाधरं ॥ ७४ ॥ रिपुंस्मृत्वाजपंकुर्व न्सप्तरात्रेणमारयेत् ॥ वा-
सनात्रयथाचोक्ता कर्मषट्कानुरुपिणी ॥ ७५ ॥ शांतिकेसौम्यरूपासा पौष्टिकेवश्यकर्मणि ॥
सर्वांगशोभनीहृष्टा वासनाकृष्टिकर्मणि ॥ ७६ ॥ काकोलूकादिभिःशत्रुं भक्ष्यमाणंमृतंस्मरे-
त् ॥ इत्येवंवासनाकार्या स्थानध्यानमथोच्यते ॥ ७७ ॥ चतुःपत्रांबुजेगुह्ये कुर्यान्मूलेमनः
स्थिरं ॥ रससिद्धितथावश्य माकृष्टिकालवंचनं ॥ ७८ ॥ जपनाद्विषभूतादि कार्यारंभंग-
मागमं ॥ सारस्वतंस्तंभनंच वामवाहेनसाधयेत् ॥ ७९ ॥ हृत्पद्मकर्णिकामध्ये स्थिरचित्ते-
नयोजयेत् ॥ लभतेपौष्टिकींसिद्धिं शत्रूच्चाटनमारणे ॥ ८० ॥ विद्वेषोरविवाहेन नरनारीवि
मोहनं ॥ शांतिकंपौष्टिकंवश्यं साधयेच्छंकरोदितं ॥ ८१ ॥ भ्रुवोर्मध्येद्विपत्रेतु दक्षवाहेन-
साधयेत् ॥ क्षुद्रविद्यांमोक्षसिद्धिं नानाकौतूहलानिच ॥ ८२ ॥ यस्यमंत्रस्ययत्ध्यानं ध्या-
येत्स्थानगतंबुधः ॥ अथवासर्वमंत्राणां ध्यानंसिद्धिकरंशृणु ॥ ८३ ॥ कंदाद्बिंदुगतांध्यात्वा
प्राणशक्तिसमन्वितां ॥ शुद्धस्फटिकसंकाशां शांतिकेपौष्टिकेशुभे ॥ ८४ ॥ सारस्वतेरसेमो
२ क्षे खेचरत्वेरसायने ॥ सारक्तासर्ववश्येषु स्तंकनेमोहनेतथा ॥ ८५ ॥ आकर्षणेह्यर्थवादे
कौतुकेसिद्धिदायिनी ॥ पीतांतूच्चाटनेद्वेषे कृष्णांमारणकर्मणि ॥ ८६ ॥ एवंध्यात्वाजपंकुर्या

न्मानसोपांशुवाचिकं ॥ शांतिकेपौष्टिकेमोक्षे मानसंजपमाचरेत् ॥ ८७ ॥ वश्याकृष्टामुपां-
शुः स्याद्वाचिकंक्षुद्रकर्मणि ॥ शनैःशनैःसुविस्पष्टं नद्रुतंनविलंबितं ॥ ८८ ॥ जपंसप्रणवंकु
र्या त्सर्वकार्यार्थसिद्धये ॥ जपप्रारंभकालेतु मंत्रायार्घ्यंप्रदापयेत् ॥ ८९ ॥ नातिरिक्तंनचो-
नंच जपंकुर्यात्सुनिश्चितं ॥ जपस्यचदशांशेन होमंकुर्याद्दिनेदिने ॥ ९० ॥ अथवालक्षप-
र्यंतं होमःकार्योविपश्चिता ॥ गव्यक्षीराज्यमधुभि र्वश्यपौष्टिककर्मणि ॥ ९१ ॥ त्रिकोणेवृ-
त्तकुंडेवा वायव्याभिमुखोहुनेत् ॥ लवंगंश्रीफलंजाति प्रियंगुःकिंशुकंतथा ॥ ९२ ॥ पंचद्रव्यै-
र्मितंहोमं कुर्यादाकृष्टकर्मणि ॥ लवंगैकेनवाकुर्या त्तिर्यङूदङ्मुखस्थितः ॥ ९३ ॥ कार्पासम
श्रुतीकांतं तथावाराडिबीजकं ॥ विद्वेषेजुहुयान्मंत्री राक्षसींदिक्कृताननः ॥ ९४ ॥ उदुंबर
वटाश्वत्थ प्लक्षबीजैर्घृतप्लुतैः ॥ उच्चाटनेमत्स्यकुंडे जुहुयात्पावकाननः ॥ ९५ ॥ अजासर्पिश्च
तत्क्षीरं बीजंकार्पाससंभवं ॥ दग्धास्थिनरमांसंच साध्यरोमनखास्तथा ॥ ९६ ॥ अष्टोत्तरस
हस्त्रंतु कुंडेवज्रेणलांच्छिते ॥ दक्षिणास्यस्तुपंचत्वे जुहुयान्मारयेद्रिपून् ॥ ९७ ॥ अथवाय-
त्रयद्द्रव्यं प्रोक्तंमंत्रस्यसिद्धये ॥ तेनहोमःप्रकर्तव्यः शास्त्रदृष्टेनवर्त्मना ॥ ९८ ॥ पूजयित्वा-
थहुत्वाच जप्त्वाध्यात्वाथदेवतां ॥ मृदुसोष्णंसुपक्कंच भुंजीतलघुभोजनं ॥ ९९ ॥ यद्वातद्वा

परित्यज्य दुष्टान्नंकुत्सितोदनं ॥ शस्तमन्नंतुभुंजीया ज्जितात्मासिद्धिभाग्भवेत् ॥ १०० ॥
अन्यथाभोजनाद्दोषः सिद्धिहानिश्चजायते ॥ इतिसर्वंशिवेनोक्तं मंत्राणांसाधनंशुभं ॥ १ ॥
अनुष्ठितोयथान्यायं यदिमंत्रोनसिद्ध्यति ॥ पुनस्तावदनुष्ठेयं ततःसिद्धोभवत्यलं ॥ २ ॥
पुनस्त्वनुष्ठितोमंत्रो यदिसिद्धोनजायते ॥ उपायास्तत्रकर्तव्या स्सप्तशंकरभाषिताः ॥ ३ ॥
द्रावणंबोधनंवश्यं पीडनंशोषपोषणं ॥ दहनांतंक्रमात्कुर्यात्ततःसिद्धोभवेद्ध्रुवं ॥ ४ ॥ द्रा
वणंवारुणेबीजे ग्रंथनंक्रमयोगतः ॥ तन्मंत्राद्यंसमालिख्य शिलाकर्पूरकुंकुमैः ॥ ५ ॥ उशी
ररोचनाभ्यांच मंत्रंसंग्रंथितंलिखेत् ॥ क्षीराज्यतोयमधुभि र्मध्येतांलिखितंक्षिपेत् ॥ ६ ॥
पूजनाज्जपनाद्धोमाद्द्रावितःसिद्धिदोभवेत् ॥ द्रावितोपिनासिद्धश्चे द्बोधनांतंतुकारयेत् ॥ ७ ॥
सारस्वतेनबीजेन संपुटीकृत्यतंजपेत् ॥ एवंजप्तोभवेत्सिद्धो नोचेत्तंहिवशंकुरु ॥ ८ ॥ आ-
रक्तचंदनंकुष्टं हरिद्रामदनंशिला ॥ एतैस्तुमंत्रमालिख्य भूर्जपत्रेसुशोभने ॥ ९ ॥ धार्यंक-
र्णेभवेत्सिद्धः पीडनंवास्यकारयेत् ॥ अधरोत्तरयोगेन लिखित्वाक्रम्यचांघ्रिणा ॥ १० ॥ ध्याये
त्तद्देवतांतद्व दधरोत्तररूपिणीं ॥ विद्यामादित्यदुग्धेन लिखित्वाक्रम्यचांघ्रिणा ॥ ११ ॥ त
थाभूतेनमंत्रेण होमःकार्योदिनेदिने ॥ पीडितोलज्जयाविष्टः सिद्धःस्याद्वाथपोषयेत् ॥ १२ ॥

नित्यायास्त्रैपुरंबीज माद्यंतेतस्ययोजयेत् ॥ गोक्षीरैर्मधुनालिख्य विद्यांपाणौविधारयेत् ॥ १३॥
पोषितोयंभवेच्छिद्धो नोचेत्कार्यंतुशोषणं ॥ द्वाभ्यांद्वाभ्यांतुबीजाभ्यां मंत्रेकुर्याद्विदर्भणं ॥
॥ १४ ॥ एषाविद्यागलेधार्या लिखित्वावटभस्मना ॥ शोषितोपिनसिद्धश्चे द्दहनीयोग्निबी
जतः ॥ १५ आग्नेयेनतुबीजेन मंत्रस्यैकैकमक्षरं ॥ आद्यंतमध्यऊर्ध्वंच योजयेद्दाहकर्मणि
॥ १६ ॥ ब्रह्मवृक्षस्यतैलेन मंत्रमालिख्यधारयेत् ॥ कंठदेशेततोमंत्रः सिद्धस्स्याच्छंकरोदि-
तं ॥ इत्येवंसर्वमंत्राणा मुपायःशंकरोदितः ॥ १७ ॥ इतिश्रीसिद्धनागार्जुन विरचि
तेकक्षपुटेमंत्रसाधनंनामप्रथमःपटलः ॥ १ ॥ ॥ ॥ ॥ ॥ ॥

॥ अथसर्वजनवश्यमाह ॥ एकाचित्तःस्थितोमंत्री मंत्रंजप्त्वाऽयुतद्वयं ॥ ततःक्षोभयतेलो-
कान्दर्शनादेवसाधकः ॥ १ ॥ भूदारवटमूलंतु जलेनसहघर्षयेत् ॥ विभूत्यासंयुतंमंत्र्य ति
लकंलोकवश्यकृत् ॥ २ ॥ पुष्येपुनर्नवामूलं रुदंतीमूलिकातथा ॥ रविमूलंतथाबध्वा करेस
प्ताभिमंत्रितं ॥ ३ ॥ पूज्योभवतिसर्वत्र मंत्रस्त्वत्रैवकथ्यते ॥ * ॐ ऐंपुरंक्षोभयभगवतिगंभीरे
क्लींस्वाहा ॥१॥ ४ ॥ अयंमंत्रः पूर्वोक्तायुतद्वयजपात्सिद्ध्याति ॥ धत्तूरभृंगिमंजिष्ठा कुंकुमं

तगरंसमं ॥ ५ ॥ खानेपानेतथास्पर्शे दत्तेवश्यंभवत्यलं ॥ सिंहीमूलंहरेत्पुष्ये कव्यांबध्वा-
जगत्प्रियः ॥ ६ ॥ निशिकृष्णचतुर्दश्यां महानीलीस्मशानतः ॥ उत्धृत्यनरतैलेन अंजने-
लोकवश्यकृत ॥ ७ ॥ तन्मूलस्थात्ममूत्रेण चांजनेलोकवश्यकृत् ॥ तन्मूलंबत्धयेत्धस्ते सर्व
लोकप्रियोभवेत् ॥ ८ ॥ चंद्रपुष्येसमुद्धृत्य ब्रह्मदंडीसमूलकं ॥ भोजनेसर्वसत्वानां वशीकरण
मुत्तमं ॥ ९ ॥ उलूकत्हृदयंतुल्यं कुमार्यारोचनंसुधीः ॥ अंजनेलोचनेवश्य मानयेद्भुवनत्रयं
॥ १० ॥ * ओंनमोमहायक्षिणी अमुकमेववश्यमानयस्वाहा ॥ २ ॥ अस्यमंत्रस्यपूर्वसेवायुतं
जप्तातत उद्भ्रांतपत्रेत्यादिसर्वयोगाः शतवारमभिमंत्र्य सिद्धाभवंति ॥ ११ ॥ सर्वेषामेवमं
त्राणां मंत्रध्यानंपृथक्पृथक् ॥ उक्तस्थानेयथासंख्य मनुक्तेत्वयुतंजपेत् ॥ १२ ॥ मृगशीर्षेतु
संग्राह्यं रक्तकंकरवीरकं ॥ नवांगुलंकीलकंत त्सप्तवाराभिमंत्रितं ॥ १३ ॥ यस्यनाम्नाखनेद्भूमौ
सवश्योभवतिध्रुवं ॥ * ॐ हैंहैंहैंस्वाहा ॥ ३ ॥ अपामार्गस्यकीलंतु मघायांत्र्यंगुलंतथा ।१४।
सप्ताभिमंत्रितंयस्य गृहेक्षिप्तंवशीभवेत् ॥ * ॐ मदनकामदेवायफट्स्वाहा ॥ ४ ॥ शतमष्टो
त्तरंजप्त्वा पूर्वसेवाभवेन्नरः ॥ १५ ॥ सिद्धंभवतितत्सर्वं तिलकान्कुरुतेवशं ॥ स्वयंभूकुसुमेवस्त्रे
गृहीत्वात्रिपथेदहेत् ॥ १६ ॥ शनिभौमस्यवारेवा तद्भस्मातिलकीकृतं ॥ वशंनयतिराजानं

कक्ष अन्यलोकस्यकाकथा ॥ १७ ॥ * ॐ नमोभैरवांतरे आज्ञाकालेकमलमुखे राजमोहनेप्रजा पुटी.
वशीकरणे स्त्रीपुरुषरंजने लोकवश्यमोहिनिर्मैमोह ॐ गुरुप्रसादेन ॥ ५ ॥ १८ ॥ रा
६ त्रौकृष्णचतुर्दश्यां लांगलीमूलमुद्धरेत् ॥ श्वेतछागलिगागर्भ शय्यायांनरतैलकं ॥ १९ ॥ प० २
क्षौद्रतालकसंयुक्तं तिलकंसर्ववश्यकृत् ॥ अजामोदस्यमूलेन तुरगीगर्भशय्यया ॥ २० ॥ ह
रितालकसंपिष्टा गुलिकामुखमध्यगा ॥ यद्यस्माद्याचतेवस्तु तत्तदेवददात्यसौ ॥ २१ ॥ *
ॐ अश्ववर्णेअरिदुर्बले आर्द्रकेशजटाकलापेडकारफेत्कारिणिस्वाहा ॥ ६ ॥ २२ ॥ वटप-
त्रमयूरशिखया तुल्यंतिलकंवश्यकृत् ॥ (विष्णुक्रांताभृंगराजं रोचनंसहदेविका ॥ २३ ॥
श्वेतापराजितामूलं कन्याहस्तेनपेषयेत् ॥ वारिणातिलकंकुर्या त्सर्वलोकवशंकरं ॥ २४ ॥
रक्ताश्वमारपुष्पंच कुष्टंचश्वेतसर्षपाः ॥ श्वेतार्कमूलंतगरं धतूरोत्तरवारुणी ॥ २५ ॥ कृष्णा
ष्टम्यांपुष्ययुक्त चतुर्दश्यांतथाविधं ॥ पेषयेत्कन्यकाहस्ता त्तिलकंसर्ववश्यकृत ॥ २६ ॥ अ
पामार्गस्यमूलंतु पेषयेद्रोचनेननतु ॥ ललाटेतिलकंकृत्वा वशीकुर्याज्जगत्रयं ॥ २७ ॥ * ॐ
नमोवरजालिनिसर्वलोकवशंकरिस्वाहा ।७। उक्तयोगानामस्याष्टोत्तरसहस्रजपात्सिद्धिः ।२८। ६
औलूकंचक्षुरादाय गोरोचनसमन्वितं ॥ वारिणासहदातव्यं पानाद्वश्यकरंपरं ॥ २९ ॥ उ

लूकस्यतुकर्णोद्वौ चटकानांविलोचनं ॥ तच्चूर्णंतिलकेपाने भक्षणेगंधपुष्पयोः ॥ ३० ॥ क्षि
पेद्वामस्तकेयस्य सवश्योजायतेचिरात् ॥ मांसंग्राह्यमुलूकस्य कुंकुमागरुचंदनं ॥ ३१ ॥
गोरोचनसमंपिष्टं भक्षेपानेजगद्वशं ॥ स्त्रियोवापुरुषोवापि सहस्त्रजपनाद्भवेत् ॥ ३२ ॥ *
ॐ ह्रीं ह्रीं ल्हें ल्हें फट्नमः ॥ ८ ॥ कृतोपवासोगृण्हीयात्समूलांचेंद्रवारुणीं ॥ उत्तराभिमु-
खेनैव कुट्टयेत्तांमुलूखले ॥ ३३ ॥ तत्कल्कंत्रिकटुतुल्य मजामूत्रेणपेषयेत् ॥ छायाशुष्कांव
टींकुर्या त्सावटीरक्तचंदनं ॥ ३४ ॥ घृष्ट्वाथसांगुलीर्लिप्त्वा तयास्पृष्टेजगद्वशं ॥ सावटींदेव
दारुंच तुल्यंचसितचंदनं ॥ ३५ ॥ जलेपिष्ट्वाविलेपाय दत्तंयस्यभवेद्वशः ॥ सावटीरोचनं
तुल्यं कृत्वातोयेनपेषयेत् ॥ अनेनतिलकंकुर्या त्सर्वत्रविजयोभवेत् ॥ ३६ ॥ * ॐ नमः
सर्वार्थसाधिनिस्वाहा ॥ अस्यसहस्त्रजपात्पूर्वंयोगसिद्धिः ॥ ९ ॥ कृष्णपक्षचतुर्दश्या
मष्टम्यांवाउपोषितः ॥ बलिंदत्वासमुद्धृत्य सहदेवींसुचूर्णयेत् ॥ ३७ ॥ तांबूलेनतुतच्चूर्णं
योज्यंवश्यकरंपरं ॥ रोचनासहदेवीभ्यां तिलकोवश्यकारकः ॥ ३८ ॥ मनःशिलातुतन्मूल
मंजयेत्सर्ववश्यकृत् ॥ सप्ताहंतांबूलस्यांते सहदेवींप्रयोजयेत् ॥ ३९ ॥ राजावश्यमवाप्नो-
ति सर्वलोकेषुकाकथा ॥ शिरसाधारयेतच्च चूर्णंसर्वत्रवश्यकृत् ॥ ४० ॥ मुखेक्षिप्ताथतन्मूलं

कन्यांबध्वाचकामयेत् ॥ यांनारींसाभवेद्वश्या मंत्रयोगेननान्यथा ॥ ४१ ॥ * ॐ नमोभ-
गवतिमातंगेश्वरि सर्वमुखरंजनिसर्वेषां महामायेमातंगिकुमारिकेलघु २ वशंकुरु २ स्वाहा ॥
अस्यसहस्रजपादुक्तयोगासिद्धिः ॥ १० ॥ सुनिर्वातचितांगारं सृगालरुधिरैःसह ॥ यस्यै
वशिरसिक्षिप्तं सवश्योभवतिध्रुवं ॥ ४२ ॥ शिखिपित्तंचगोरंभा मोहिनीरोचनीशिखा ॥
पेषयेत्कन्यकाहस्ता त्स्पर्शोपानेजगद्वशं ॥ ४३ ॥ श्वेतापराजितामूलं चंद्रग्रहणउद्धृतं ॥
अंजिताक्षोनरस्तेन तिलकोलोकवश्यकृत् ॥ ४४ ॥ मेघनादस्यमूलंतु वक्रस्थंवश्यकारकं ॥
परवादीभवेन्मूकोऽथवायातिदिगंतरं ॥ ४५ ॥ ग्राह्यंकृष्णचतुर्दश्यां श्वेतगुंजीयमूलकं ॥ तां
बूलेनप्रदातव्यं सर्वलोकवशंकरं ॥ ४६ ॥ शिलारोचनतन्मूलं वारिणातिलकेकृते ॥ संभा-
षणेनसर्वेषां वशीकरणमुत्तमं ॥ ४७ ॥ स्वर्णवेष्टिततन्मूलं मुद्रिकांकारयेद्बुधः ॥ तद्वाक्या
द्वशमायाति प्राणैरपिधनैरपि ॥ ४८ ॥ चर्वयित्वातुतन्मूलं तेनैवतिलकंकृतं ॥ दृ-
ष्टमात्रेवशंयाति नारीवापुरुषोपिवा ॥ ४९ ॥ * ॐ वज्रकिरणेशिवेरक्षरक्ष भवेम-
माद्रिममृतंकुरु २ स्वाहा ॥ उक्तयोगानामेतत्सहस्रजपात्सिद्धिः ॥ ११ ॥ कृतोपवासो-
मंत्रीतु पुष्येकृष्णाष्टमीयुते ॥ पुष्पधूपबलिंदत्वा घृतदीपंचदापयेत् ॥ ५० ॥ दत्वामंत्रंजपेत्तत्र

अष्टाधिकसहस्रकं ॥ * ॐ श्वेतवर्णे सितपर्वतवासिनि अप्रतिहतेममकार्यंकुरु २
ठःठः ॥ १२ ॥ श्वेतगुंजाफलंग्राह्यं तत्स्थानान्मृत्तिकायुतं ॥ ५१ ॥ घृतेनलोलयेत्सर्वं
नरपात्रेतिशोभने ॥ क्षिप्त्वाकृष्णचतुर्दश्या मष्टम्यांवाभुविक्षिपेत् ॥ ५२ ॥ मंत्रितैरुदकैःसिं
चे न्नित्यंयावत्फलावधि ॥ * ॐ श्वेतवर्णेसितवासिनिश्वेतपर्वतवासिनिसर्वकार्या
णिकुरु २ अप्रतिहतेनमोनमःस्वाहा ॥ इतिसेचनमंत्रः ॥ १३ ॥ पुनःपुष्येशुचिर्भूत्वा
सोपवासोजितेंद्रियः ॥ धूपदीपोपहाराद्यै र्न्यासंकृत्वासमुद्धरेत् ॥ ५३ ॥ ॐ श्वेतत्दृदयाय
नमः ॥ ॥ ॐ नमःपद्ममुखेशिरसेस्वाहा ॥ ॐ नमःसर्वज्ञानमयेशिखायैवौ-
षट् ॥ ॐ नमःसर्वशक्तिमत्यैकवचायहुं ॥ ॐ नमःनेत्रत्रयायवौषट्
॥ ॐ परममंत्रभेदनेअस्त्रायफट् ॥ सर्वाण्यंगानिनमोंतानि ॥ इतिन्यासंकृत्वा-
ततोमूलमंत्रेणोत्पाटयेत् ॥ ॐ नमोभगवतिन्हींश्वेतवासेनमोनमःस्वाहा ॥ १४ ॥ अ
स्यैवमूलमंत्रस्यपूर्वंक्षेवायुतंजपेत् ॥ दशांशंहवनंकुर्या त्तिलदूर्वाघृतप्लुतं ॥ ५४ ॥ एवंकृत्वा-
समुद्धृत्य गुंजामूलंसुसिद्धिदं ॥ तन्मूलंचंदनंश्वेतं लेपःस्याद्वश्यकारकः ॥ तन्मूलंमधुनायु-
क्तं लेपःसर्वत्रवश्यकृत् ॥ ५५ ॥ मनःशिलाचतन्मूलं वारिणाश्वेतचंदनं ॥ घृष्ट्वातांत्तिलकंकुर्या

कक्ष त्सर्वलोकवशंकरं ॥ ५६ ॥ तन्मूलंसर्षपंश्वेतं प्रियंगुंचसमंसमं ॥ चूर्णितंमस्तकेयस्य क्षिप्तं- पुटी.
वश्यकरंभवेत् ॥ ५७ ॥ * ॐ नमःश्वेतगात्रेसर्वलोकवशंकरि दुष्टान्वशंकुरु २ मेवशमानय-
८ स्वाहा ॥ उक्तयोगानामष्टोत्तरशतजप्तेसिद्धिः ॥ १५ ॥ वासामूलंप्रियंगुंच कुष्टैलांनागके- प० २
सरं ॥ श्वेतसर्षपतुल्यंच धूपःसर्ववशंकरः ॥ ५८ ॥ * ॐ कामिनि २ माधाविनमः २
॥ १६ ॥ अनेनधूपमभिमंत्रयेत् ॥ अथानेनमंत्रेणशताभिमंत्रितंपुष्पं यस्यदीयते यस्यना
म्ना नित्यंसप्तग्रासमन्नंभुज्यते ससप्तदिनैर्वशोभवति ॥ ५९ ॥ * ॐ कटंकटेघोररूपिणि
ठःठः ॥ १७ ॥ अस्यमंत्रस्योक्तसिद्धिः ॥ पूर्वमंत्रवत् ॥ ॐ घंटाकर्णायनमः ॥ अस्य
पूर्वस्न्नेवायुतंजप्त्वा ततोनेनमंत्रेण पाषाणंसप्ताभिमंत्रितं कृत्वापत्तनेग्रामप्रवेशेवातेनपा-
षाणेनवृक्षंताडयेत् ॥ ग्राममध्येअप्रार्थितं सुखंभोजनंप्राप्नोति ॥ कदंबाधोजपेल्ल
क्ष द्वयंमंत्रस्यसाधकः ॥ घृताक्तगुग्गुलैर्होमै र्देवीसौभाग्यदायिनी ॥ त्रैलोक्यंवश्यमायाति
स्मृतिमात्रेनसंशयः ॥ ६० ॥ * ॐ क्लींजनकेस्वाहा ॥ १८ ॥ यक्षमंत्रेणसंताड्य सप्तधा- ८
क्षीरभूरुहं ॥ तत्काष्टंचैवसंग्राह्य मेकविंशतिमंत्रितं ॥ धारयेद्दक्षिणेकर्णे अन्नमप्रार्थितंलभेत्
॥ ६१ ॥ * ॐ महायक्षसेनाधिपतये मणिभद्रायअप्रार्थितमन्नंदेहिमेस्वाहा ॥ १९ ॥

अश्वत्थवृक्षमारूढः पूर्वमेवायुतंजपेत् ॥ करवीरस्यपुष्पंच सप्तमंत्राभिमंत्रितं ॥ तत्पुष्पंदी
यतेयस्य सवश्यस्तत्क्षणाद्भवेत् ॥ ६२ ॥ * ॐ नमोभगवतेरुद्रायासिद्धरूपिणे शिखिबंध-
सर्वेषांशिवमस्तुहन २ रक्ष २ सर्वभूजयेहरहररक्षतेभ्यश्वनमः ॥ २० ॥ वासोपिधाय-
कौसुभं रात्रौमंत्रायुतंजपेत् ॥ नरनारीनरेंद्राणां सततंक्षोभकारकः ॥ ६३ ॥ * ॐ नमोभुवन-
क्षोभकसर्वलोकान्क्षोभय २ ब्लूं ब्लीं ब्लूं स्वाहा ॥ २१ ॥ रात्रौदशसहस्राणि जप्तव्यंपद्मकेसरैः
॥ सितामधुपयोमिश्रैः कृतेहोमेदशांशतः ॥ रंजकश्चेष्टतेलोकान् दर्शनात्प्रियकार-
कः ॥ ६४ ॥ * ॐ ऐंअमुकंरंजयन्ह्रींस्वाहा ॥ २२ ॥ भुक्तोच्छिष्टोजपेन्मंत्री पूर्वमेवायुतंततः ॥
एकांतेस्मरणान्मंत्री तत्रैवायातिभोजनं ॥ ६५ ॥ * ॐ उच्छिष्टोच्छिष्टचांडालि वाग्वादि-
निराजामोहुंप्रजामोहुंस्त्रीमोहुं आनुदेदेवायुवायुउच्छिष्टचांडालिसत्यवादिनिशक्तिपुरे ॥ मं
त्रलक्षमिमंजप्त्वाभूतनाथःप्रसीदाति ॥ सर्वपातालभूतानिस्मरणात्कुरुतेवशं ॥ ६६ ॥ * ॐ
नमोभूतनाथायसमस्तभुवनभूतानिसाधयहुं ॥ इतिश्रीसिद्धनागार्जुन विरचितेकक्षपुटसर्व
वशीकरणंनामद्वितीयःपटलः ॥ २ ॥ ॥ ॥ ॥ ॥ ॥ ॥

कक्ष ॥ अथराजवश्यमाह ॥ कुंकुमंचंदनंचैव रोचनंशशिमिश्रितं ॥ गवांक्षीरेणातिलकं राजवश्य पुटी.
करंपरं ॥ १ ॥ * ॐ ह्रींसः अमुकंमेवशंकुरु २ स्वाहा ॥ १ ॥ पूर्वसेवासहस्रंजप्त्वा ततो
९ नेनमंत्रेणसप्ताभिमंत्रितंपूर्वतिलकंकुर्यात् ॥ २ ॥ चक्रवर्तस्यमूलंतु हस्तर्क्षेतु समुद्धरेत् ॥ प० ३
राजद्वारेभवेत्पूज्यो हस्तेबध्वाचवादिजित् ॥ ३ ॥ * ॐ सुदर्शनायहुंफट्स्वाहा ॥ २ ॥ पू
र्वसेवासहस्रजप्तेसिद्धिः ॥ पूर्वसेवायुतंजप्त्वा चंडामंत्रस्यसिद्धये ॥ ततोह्यौषधयोगाये गुरौस-
प्ताभिमंत्रितः ॥ सिध्द्यंतिसर्वकार्याणि पूर्वसेवाप्रभावतः ॥ ४ ॥ * ॐ ह्रींरक्तचांमुडेतुतुतु
अमुकंमेवशमानयस्वाहा ॥ ३ ॥ अयंचंडामंत्रःसर्वत्रसिद्धोभवति ॥ ५ ॥ मंजिष्टाकुकुंमंचैव बाल
मोदांकुमारिकां ॥ चितिभस्मचरक्तंच स्वरेतेनचभावयेत् ॥ ६ ॥ पुष्येथगुटिकांकृत्वा भ-
क्ष्येपानेचदापयेत् ॥ स्पृष्टेवाराजवश्यंस्या च्चंडामंत्रप्रभावतः ॥ ७ ॥ श्वेतापराजितामूलं चं-
द्रग्रहणउद्धृतं ॥ प्रभूणांभोजनेदेयं चंडामंत्राद्वशंकरं ॥ ८ ॥ उत्तरायांसमादाय प्रातरश्वत्थ-
बध्नकं ॥ करेबध्नंतुसर्वत्र राजद्वारेजयावहं ॥ ९ ॥ धात्रीब्रध्नंभरण्यांतु विशाखायांचबध्नकं ॥
करेबद्धंराजवश्यं कारकंचभवेन्नृणां ॥ १० ॥ पूर्वाफाल्गुनिनक्षत्रे ग्राह्यंदाडिमबध्नकं ॥ करे- ९
बध्वाभवेद्वश्यो यदिराजापुरंदरः ११ ॥ आश्लेषायांगृहीत्वातु नागकेसरबध्नकं ॥ करेबध्वाभ

वेद्वश्यो योराजापृथिवीपतिः ॥ १२ ॥ निघृष्यांकोलतैलेन रक्तमालीयमूलंक ॥ सप्ताहंमं
त्रितंकृत्वा तिलकंराजवश्यकृत् ॥ १३ ॥ उक्तयोगानांचंडामंत्रेणसिद्धिः ॥ होमयेत्कटुतैलेन
रक्तचंदनराजिकाः ॥ सहस्राहुतिमात्रेण राजानंवशमानयेत् ॥ १४ ॥ सर्षपांछागरक्तेन हुत्वा
रात्रौस्वकेगृहे ॥ संख्याचपूर्ववद्वश्यो राजाभवतिनान्यथा ॥ १५ ॥ मधुनाशाणपुष्पंतु रात्रौ
हुत्वातुपूर्ववत् ॥ चक्रवर्तीभवेद्वश्य श्चंडामंत्रप्रभावतः ॥ १६ ॥ अथपरवादीजयः ॥ गोजि
व्हाशिखिमूलंवा मुखेशिरसिसंस्थिता ॥ कुरुतेसर्ववादेषु जयंपुष्येसमुद्धृता ॥ १७ ॥ मार्ग
शीर्षेतुपूर्णायां शिखिमूलंसमुद्धृतं ॥ बाहौशिरसिधार्यंच विवादेविजयोभवेत् ॥ १८ ॥ बं
धनान्मुच्यतेतेन शिखामंत्रेणसंशयः ॥ * ॐ नमोकनकपिंगले रुद्रत्वदयांशेरौद्रास्त्रधारिणि-
तिष्ठ २ सनर २ सत्वान्मोहय २ भगवतिशिखिध्वजे हुतिमिरेमाहामायेस्वाहा ॥ ४ ॥ अष्टोत्त
रशतंजप्ते मयूरशिखासिद्धाभवति ॥ मेघनादस्यमूलंतु वक्रस्थंतारवेष्टितं ॥ १९ ॥ परवा-
दीभवेन्मुक्तोऽथवायातिदिगंतरं ॥ निशिकृष्णचतुर्दश्यां महानीलीस्मशानतः ॥ २० ॥
आनीयबंधयेत्वस्त्रे विवादेविजयोभवेत् ॥ श्वेतगुंजान्वितंमूलं मुखस्थंदुष्टतुंडजित् ॥ २१ ॥
उक्तयोगानांचंडामंत्रेणसिद्धिः ॥ त्रिसध्यंत्रिदिनंयस्य न्यस्तंमूर्ध्निकरस्थितं ॥ भस्मचे

टकनामाख्यं सजयंलभतेनरः ॥ २२ ॥ * ॐ नमोभस्मजयधूलिधूसुरि असुराणिजय
वाग्बंधंकुरुस्वाहा ॥ ५ ॥ शुक्लपक्षयुतेपुष्ये गुंजामूलंसमुद्धरेत् ॥ बद्धंशिरसितत्सत्यं चौरबा-
धाहरंपरं ॥ २३ ॥ धात्र्यास्तुबध्नकंग्राह्य माश्लेषायांप्रयत्नतः ॥ हस्तेबध्नमयंहंति चोरव्या
घ्रादिराजजं ॥ २४ ॥ आर्द्रायामात्हतंवश्यं बुध्नकंकर्णधारितं ॥ विजयंप्रापयेद्युद्धे शत्रुम-
ध्येनसंशयः ॥२५॥ अंकोलतैलसंभिन्नं कुर्यादाम्राडचूर्णकं ॥ अनेनस्पृष्टमात्रेण महाहस्ती-
वशोभवेत् ॥२६॥ गृहीत्वाहस्तनक्षत्रे चूर्णंछुछुंदरीभवं ॥ तल्लेपेनगजायांति दूरतोनतुसन्मुखं
॥ २७ ॥ बिल्वपुष्पस्यचूर्णंतु छुछुंदर्यास्तुतत्समं ॥ तल्लिप्तांगंनरंदृष्ट्वा दूरेगच्छंतिकुंजराः ॥
॥ २८ ॥ मूलंमर्कटवल्याश्च बाहौबद्धंचमूर्धनि ॥ दूराद्घायाद्दुष्टदंती युद्धादिभयनाशनं॥२९॥
श्वेतापराजितामूलं हस्तस्थंवारयेद्गजं ॥ श्वेतंचबृहतीमूलं हस्तस्थंव्याघ्रभीतिनुत् ॥ ३० ॥
* ॐ चित्तिचित्तालेवछो आवकुकुरजिवेपुच्छझलावेहसेडलेतारिमुहिभावे गौरिहि
तेमहादिवमहीदिजे ॥ ६ ॥ * ॐ बुणआलुअहोवायुताकीजे महाराजउताजेइहतुभूमिछो
डुत्वरितेप्यअवरद्य कीजेदेवीवायुभजोपापुटाल मुजेमिहिहकालखाहुतौहनुमंतकीआज्ञा
॥ ७ ॥ अनेनमंत्रेणस्वरक्तबिंदुंव्याघ्रंदृष्ट्वाक्षिपेत् ॥ व्याघ्रोदूरेगच्छति ॥ तथायत्रग्रामे न

गरे वनेवाऽव्याघ्रोमत्तोभवति ॥ तत्रवनमध्येसूकरंबध्वापूर्वमंत्रंसहस्रमेकंजप्ते ततोऽव्याघ्रःस्व यमेवागत्यसूकरंभक्षयाति तत्स्थानंत्यक्तान्यस्स्थानंगच्छाति ॥ ३१ ॥ इतिदृष्टप्रयोगः ॥ इतिश्रीसिद्धनागार्जुनविरचितेकक्षपुटेराजवश्यंनामतृतीयःपटलः ॥ ३ ॥ ॥ ॥

॥ अथस्त्रीवश्यं ॥ पारावतस्यत्द्दचक्षुः स्वरक्तंरोचनंतथा ॥ जिव्हामलसमायुक्त मंजने-स्त्रीवशाभवेत् ॥ १ ॥ रतिंचविरतिंशुक्रं स्वरक्तंराजमोटिका ॥ रोचनंचितिभस्मापि नरतै लंतथाष्टमं ॥ २ ॥ पिष्टेपिष्ट्वाप्रदातव्यं मद्येवश्यावरास्त्रियः ॥ चितिभस्मवचाकुष्टं तगरंकुंकु मंसमं ॥ ३ ॥ चूर्णंस्त्रीशिरसिक्षिप्तं पुरुषस्यतुपादयोः ॥ अदासोदासतांयाति यावज्जीवंन-संशयः ॥ ४ ॥ उन्मत्तंमातुलानीच स्वरक्तंलग्नपंचकं ॥ चेटिकात्द्दयेचैव भक्ष्येपानेस्त्रियो वशाः ॥५॥ त्रिंशत्कनकबीजानि षोडशेद्रयवास्तथा ॥ गोदंतंनरदंतंच पिष्ट्वातैलेनलोल-येत् ॥ ६ ॥ ललाटेतिलकंकृत्वा वशीकुर्यात्तिलोत्तमां ॥ टंकणंमधुयष्टीच रोचनाच्चितिभ-स्मच ॥ ७ ॥ काकजिव्हासमंक्षौद्रं तिलकेस्त्रीवशीभवेत् ॥ पुष्येपुष्पंचसंग्राह्यं भरण्यांतुफ लंतथा ॥ ८ ॥ शाखांचैवविशाखायां हस्तेपत्रंतथैवच ॥ मूलंमूलेसमुद्धृत्य कृष्णोन्मत्त

 स्यचक्रमात् ॥ ९ ॥ पिष्ट्वाकर्पूरसयुक्तं कुंकुमंरोचनंसमं ॥ तिलकेस्त्रीवशंयाति यदिसाक्षा
दरुंधती ॥ १० ॥ काकजंघावचाकुष्टं शुक्रशोणितमिश्रितं ॥ दत्तेस्तभोजनेबाला स्मशाने
 रोदतेसदा ॥ ११ ॥ कलविंकाशिर स्तुल्यंश्वेतार्कस्यचमूलकं ॥ मांजिष्टंखादिरंपाने दत्ते
कांतावशंनयेत् ॥ १२ ॥ सर्पत्वग्बीजपूरंतु तैलमेरंडजंसमं ॥ अश्विन्यांग्राहयेत्धीमान् प
लाशस्यचबध्नकं ॥ १३ ॥ करेबध्वास्पृशेद्यांतु नायकासावशीभवेत् ॥ उदुंबरस्यबुध्नंतु मृग
शीर्षसमाहरेत् ॥ १४ ॥ हस्तेबध्वास्पृशेत्कन्यां सावशाभवतिक्षणात् ॥ शिरीषस्यधानिष्ठा
यां बुध्नमादायबंधयेत् ॥ १५ ॥ करेवाधातकीबुध्नं स्वातौरामावशंकरं ॥ रेवत्यांवटबुध्नं
च हस्तेबध्वावशंनयेत् ॥ १६ ॥ मूलेवाबदरीबुध्नं भोजनेस्त्रीवशाभवेत् ॥ स्वर्णतारपुटी
मूलं घृष्ट्वास्पृष्टेस्त्रियोवशः ॥ १७॥ एतान्सर्वान्प्रयोगांश्च चंडामंत्रेण योजयेत् ॥ शतमष्टोत्तरं
जप्त्वा ततःसिध्धोभवेत्यलं ॥ १८ ॥ मार्गशीर्षेतुपूर्णायां शिखिमूलंसमुत्धरेत् ॥ मंत्रेणदा
पयेत्स्त्रीणां भोजनेवशकृद्भवेत् ॥ १९ ॥ चंडामंत्रेण श्वेतगुंजास्वमंत्रेणमूलं पंचमला
न्वितं ॥ स्वान्नेपानेप्रदातव्यं रम्यरामावशंकरं ॥ २० ॥ षट्कोणेचिंत्ययोन्यांच ध्यात्वा
क्लूंकारमुज्वलं ॥ वामनेत्रंनिमिल्यैव रात्रौरामावशंकरं ॥ २१ ॥ ऋतुकालेआत्मवीर्यं

गृहीत्वास्त्रीवामपादेप्रलेपयेत् चिरकालंवशाभवति ॥ २२ ॥ वासाकाष्टंतुपुष्यार्के ग्राह्यं सप्ताभिमंत्रितं ॥ यस्यैदत्तंतुरामायै सातस्यवशगाभवेत् ॥ २३ ॥ ॐ नमोचिपि २ विचिपि २ स्वाहा १ ॐ (चिति २ विचितिस्वाहा ॥१॥) प्रातर्मुखंतुप्रक्षाल्यसप्तवाराभि मंत्रितं॥यस्यनाम्नापिबेत्तोयं सारामावशगाभवेत् ॥२४॥* ॐ नमोक्षिप्रकामिनि अमुकीं मेवशमानयस्वाहा ॥ २ ॥ अन्योन्यमेलयेन्नेत्रे यानारीवीक्षतेचिरं ॥ हंकारतुजपेत्ताव त्सानारीवशगाभवेत् ॥ २५ ॥ नागपुष्पंप्रियंगुंच तगरंपद्मकेसरं ॥ त्वचामांसीसमानीय चूर्णयेन्मंत्रवित्तमः ॥ स्वांगंतुधूपयेत्तेन भजंतेकामवत्स्त्रियः ॥ २६ ॥ ॐ मूलि २ महामुली २ रक्ष २ सर्वासांक्षेत्रजेभ्योपद्रवेभ्यःस्वाहा॥३॥ जिव्हामलंदंतमलं नासाकर्णमलंतथा ॥ सुरा पानेप्रदातव्यं वशीकरणमुत्तमं ॥२७॥* ॐ नमःसबाह्येनमःभरणायचअमुकींमेव वशमान यस्वाहा॥४॥ वाचाटदेवपत्रेण पुष्पंसप्ताभिमंत्रितं ॥ फलंवादापयेद्यस्याः सम्यग्वश्यकरं भवेत् ॥२८॥* ॐ नमोवाचाटयथायथाहिटिहिटिद्रावहीस्वाहा ॥५॥ अपामार्गस्यमध्यंतु चतुरंगुलकीलकं ॥ सप्ताभिमंत्रितंग्राह्यं क्षिपेद्वश्यागृहेवशाः ॥ २९ ॥ * ॐ हामिलेस्वाहा ॥ ६ ॥ उलूकनेत्रमांसंच नरमज्जाचरोचनं ॥ कुंकुंमंमत्स्यतैलंच देहाभ्यंगाद्वशास्त्रियः

कक्ष ॥ ३० ॥ * ॐ ह्रींह्रींह्लांह्लंफट्नमः ॥७॥ विधिनाकृकलासस्य पादंसंग्राह्यदक्षिणं ॥ वेष्टये पुटी.
द्रातिकालेतु मुखस्थानाधिकास्त्रियः ॥ ३१ ॥ * ॐ ह्रींह्लांह्लींकालिकपालिस्वाहा ॥ ८ ॥
१२ तस्यैववामनेत्रंतु मधुतैलैनवांजयेत् ॥ यापश्यतिनरोमत्तां रामांसातत्क्षणाद्वशा ॥ ३२ ॥ प०४
* ॐ अनंगब्रह्मब्रह्मस्वाहा ॥९॥ तस्यैवदक्षिणंनेत्रं सौविरंमधुनासह ॥अंजिताक्षस्यसावश्या
यास्त्रीरूपातिगर्विता ॥३३॥ * ॐ पूजितायस्वाहा ।१०। त्रिसंध्यंतुजपेन्मत्रं मन्मथस्यश
तंशतं ॥ समंत्रःकामिनींमासा न्मोहयत्येवदर्शनात् ॥ ३४॥ * ॐ नमःकामदेवायसहक-
लसहकलसहदशसहयमसहालिरब्लूंभुवनजनंममदर्शनमुत्कंठितं कुरु २ इक्षुकोदंडधरकुसुमबा
णेनहन २ स्वाहा ॥११ ॥ कामाक्रांतेनचित्तेन मासार्धंजपतेनिशि॥ अवश्यंकुरुतेवश्यंप्रस
न्नोविश्वचेटकः ॥ ३५ ॥ * ॐ ऐंसहवल्लारिक्लिंकरक्लींकामपिशाच अमुकींकामग्राहयस्वप्नेमम
रूपेणनखैर्विदारय २ द्रावय २ स्नेहेनबंधय २ श्रीफट्॥१२॥चंडामंत्रेणहोमार्थं वश्यार्थंकार
येत्सुधीः ॥ पूर्वसेवायुतेजप्ते सिद्धास्याद्वशकारकः ॥ ३६ ॥ लवणंतिलसंयुक्तं क्षीरमध्वाज्य
संयुतं ॥ सप्ताहाद्वशमायाति यास्त्रीरूपातिगर्विता ॥ ३७ ॥ जातीकुसुममध्वाज्य तिलक्षी १२
रसमायुतं सप्ताहाद्भूपहीनोपि वशीकुर्यात्तिलोत्तमां ॥ ३८ ॥ राजिकालवणंक्षीरं मध्वा

ज्यैर्मिश्रितंहुतं ॥ सप्ताहेनवशंयाति यारामारूपगर्विता ॥३९॥ अष्टोत्तरशतंकाष्ठ मेरंडंचतुरं
गुलं ॥ लवणंकटुतैलंच त्रिभिरेकत्रहोमयेत् ॥ अष्टोत्तरशतंहुत्वा यन्नाम्नासावशाभवेत् ॥४०॥
महानिंबस्यपुष्पाणि घृतेनसहहोमयेत् ॥ सप्तरात्राद्वशंयाति यदिरामामनोरमा ॥ ४१ ॥
* ॐ ह्रींरक्तचामुंडेतुरु २ अमुकींमेवशमानयस्वाहा ॥ १३ ॥ गोमूत्रतृतयेचुल्ली कृत्वाप
श्वान्नमुंडके ॥ पात्रेशालितुतल्लाजां चूर्णयेत्तद्बहिर्गतान् ॥ ४२ ॥ पात्रस्थंचपृथक्चूर्णंरक्षये
च्चपृथक्पृथक् ॥ बहिर्गतंतुतच्चूर्णं मूर्ध्निक्षिप्तेवशास्त्रियः ॥ ४३॥ अंतर्गतेतुचूर्णेतु क्षिप्तेवश्यं
निवर्तते ॥ सिद्धियोगोह्ययंख्यातो विनामंत्रेणसिद्धिदः ॥ ४४ ॥ गर्दभस्यशिरोमज्जां पूर
येन्नरपात्रके ॥ भृंगराजरसैर्भाव्या वर्तिःकार्पाससंभवा ॥ ४५ ॥ सप्तवारंतुसाशुष्का मज्जा-
पात्रेप्रदीपयेत् ॥ कज्जलंनरपात्रेतु शनिवारेसमुद्धरेत् ॥ ४६ ॥ तेनांजनेवशीकुर्या त्कामी
नींतुविलोकनात् ॥ शिलातालंचवीर्यंच अंकुलीतैलमिश्रितं ॥ ४७ ॥ गजगंडमदोन्मिश्रं
तिलकंस्त्रीवशंकरं ॥ मनःशिलाप्रियंगुंच नागकेसररोचनं ॥ ४८ ॥ अंजिताक्षोनरोरामां
वशीकुर्यान्मनोरमां ॥ प्रियंगुपंकजंपत्रं रोचनांजनचंदनं ॥ ४९ ॥ अंजिताक्षोनरोरामां
५ दृष्ट्वामोहयतिध्रुवं ॥ सोमराजरवीमूलं मूलंवाचक्रमर्दजं ॥५०॥ कटिस्थंनरनार्योर्वा परस्पर

वशंकरं ॥ कृष्णाष्टमीचतुर्दश्योः पीतधत्तूरमूलकं ॥ ५१ ॥ हेमदारुपुटीकुष्ठ देवदारूसमंस
मं ॥ चूर्णस्त्रीणांशिरःक्षिप्तं पुंसोवाथवशंकरं ॥ ५२ ॥ जलेनसहघृष्ट्वातु सौधामलकमंजयेत्
॥ तिलकेवाघृतेवश्यं कुर्यात्स्त्रीमंडलंक्षणात् ॥ ५३ ॥ इंद्रवारुणिकामूलं पुष्येणन्नःसमुद्धरेत्
॥ कटुत्रयैर्गवांक्षीरैः पिष्टातद्गोलकीकृतं ॥ ५४ ॥ चंदनेनसमायुक्तं तिलकंस्त्रीवशंकरं ॥
बर्बूरबध्नकंस्वात्यां बदर्यास्त्वनुराधयोः ॥ ५५ ॥ बध्नंवाधारयेत्धस्ते पृथक्स्त्रीवशकारकौ ॥
ऊर्ध्वपुष्पीअधोपुष्पी लज्जालुर्गिरिकर्णिका ॥ ५६ ॥ सप्ताहेभावयेच्छुक्के पंचांगमलसंयुते ॥
खानेपानेप्रदातव्यं नारीवश्यकरंपरं ॥ ५७ ॥ शुक्लपक्षयुतेपुष्ये संग्राह्यंरतिसंगमे ॥ योनि
स्थमुभयोर्वीर्यं यत्नतोवामपाणिना ॥ ५८ ॥ तेनस्पृष्टाखियोवश्या वामपाणितलेकिल ॥
कृष्णपक्षयुतेपुष्ये पूर्ववत्स्त्रीवशाभवेत् ॥ ५९ ॥ श्वेतार्कलांगलीवाचा लज्जारिविषमुष्टिका
॥ तुल्यंतुल्यंविचूर्णाय कृष्णश्वानपयःप्लुतं ॥ ६० ॥ धनूरफलमध्यस्थ मेकीकृत्यप्रयोजयेत्
॥ कामबाणमिदंख्यातं भोजनेस्त्रीवशंकरं ॥ ६१ ॥ उक्तानांसर्वयोगानां चंडामंत्रेणमन्त्रिणां
॥ सिद्ध्यंतिनात्रसंदेहः पूर्वसेवायुतेकिल ॥ ६२ ॥ पानीयस्यांजलीन्सप्त दत्वाविद्यामिमां
जपेत् ॥ सालंकारांनरःकन्यांलभतेमाससमात्रतः ॥६३ ॥ ❋ ॐ विश्वावसुर्नामगंधर्वः कन्या

नामधिपतिः सरूपांसालंकारांकन्यांदेहिमेनम स्तस्मैविश्वावसवेस्वाहा ॥१४॥ सुश्वेतलांगली
कंदंमद्यपिष्टंविलेपयेत् ॥ नाभौयौनौचकन्याया बालाभवतिकामिनी ॥ ६४ ॥ * ॐ
द्राविकायस्वाहा ॥१५॥ अथद्रावणं ॥ ॥ अर्कपत्रंसकर्पूरं हरिद्राकनकंमधु ॥ मेषीपित्तेन
लेपोयं लिंगेस्त्रीद्रावकारकः ॥ ६५ ॥ कर्पूरोन्मत्तयष्ट्या व्हालक्तकंनृपालकं ॥ मधुयुक्तप्रले
पोयं लिंगेस्त्रीद्रावकारकः ॥ ६६ ॥ शैवारपुष्पंकर्पूरं मुंडीपुष्पंचपेषितं ॥ लिंगलेपेवशंका
मा द्रवंतिरतिसंगमे ॥ ६७ ॥ कपिलिंगंशशीसूतं कर्पूरंकनकंमधु ॥ गृध्रविष्ठाशुनश्वास्थि
घृष्ट्वालिंगंप्रलेपयेत् ॥ ६८॥ एषहालाहलोयोगो द्रावकोवशकृत्स्त्रियाः ॥ शैवालंमालतीपुष्पं
मुंडीपुष्पंसमंमधु ॥ ६९ ॥ लिंगलेपात्स्त्रियोवश्या द्रावणंभवतिध्रुवं ॥ टंकणंमधुकर्पूरं पार
दंमर्दयेत्समं ॥ ७० ॥ तेनलेपःपरंलिंगे वश्यकृद्वरयोषितां ॥ बृहतीफलमूलानि पिप्पली
मरिचानिच ॥ ७१ ॥ मधुरोचनयासार्धं लिंगलेपोतिवश्यकृत् ॥ नराजोलूकगृध्राणां सम
मस्थीनिपेषयेत् ॥ ७२ ॥ स्वशुक्रेणसहालेपो लिंगेस्त्रीद्रावकारकः ॥ श्वेतार्कचंदनालेपो लिं
गेस्याःपूर्ववत्फलं ॥ ७३ ॥ विष्ठालेपश्चवल्गुन्या लिंगेस्त्रीद्राववश्यकृत् ॥ क्षौद्रगंधकलेपेन
शिलायुक्तेनतत्फलं ॥ ७४ ॥ शशिटंकणपिप्पल्य सूरणंमदनंफलं ॥ मातुलिंगफलैःपिष्टं

कक्ष लिंगलेपेस्त्रियोवशाः ॥ ७५ ॥ मल्लिकोद्रवकर्पूर मधुलेपेनतत्फलं ॥ पक्वनिंबफलद्रावे मेद्यं पुटी.
सूतंचटंकणं ॥ ७६ ॥ रक्तकंकणिपुष्पं वालिंगेलेपेचवश्यकृत् ॥ शिलाकाकीसतगरं कुसुं
१४ भक्षौद्रलेपनात् ॥ ७७ ॥ सौभाग्यगर्वितारामा सादासीरतिसंगमे ॥ जातीकुसुमपत्राणि प० ४
मंजिष्ठाश्वेतसर्षपाः ॥ ७८ ॥ आलेपोध्वजदंडेतु रात्रौस्त्रीवश्यद्रावकृत् ॥ कर्पूरंटंकणंसूतं
उन्मत्तंबीजपिप्पली ॥ ७९ ॥ मुनिकांचनपात्रोच्छ रसंक्षौद्रंचपेषयेत् ॥ लिंगलेपेकृतेरामा
संगेभवतिकिंकरी ॥ पंचगंधंचतुःसूतं मर्दयेन्नवटंकणं ॥ पूर्ववत्फलं ॥ ८० ॥ * ॐ
कंदंलंक्लैंह्रींरसाधिकास्रवतु अमुकींरतिकालेदेवह्रुंम्लींस्वाहा ॥ १६ ॥ सूतटंकणकर्पूर कनकं
मुनिपत्रकैः ॥ गोघृतेलिंगलेपोयं कामीनीदर्पनाशनः ॥ ८१ ॥ उपहारपशोरक्तं गृण्हीया
दंतरिक्षतः ॥ तच्छुष्कंचूर्णितंस्थाप्य पुष्येरक्ताश्वमारजे ॥ ८२ ॥ तत्पुष्पंधारयेत्धस्ते तर्ज
न्यंगुष्ठयोगतः ॥ आवर्त्यसंमुखंस्त्रीणां दृष्टमात्रेद्रवंतिताः ॥ ८३ ॥ कृष्णगर्दभलिंगस्य श
लाकामध्यतःक्षिपेत् ॥ आनयित्वाविशोष्याथ शलाकामध्यमुद्धरेत् ॥ ८४ ॥ तच्छिद्रेनि
क्षिपेत्सूतं कर्णमात्रंचरंजयेत् ॥ बहिर्विचित्रलैपैश्च लालाहिंगुलकादिभिः ॥ ८५ ॥ ऊर्ध्वा १४
ग्रंधारयेद्धस्ते कामीनीनांतुसन्निधौ ॥ कृतेत्वधोमुखेतस्मि न्दृष्टमात्रेद्रवत्यलं ॥ ८६ ॥ जंबीर

फलमध्येतु सूतंवृश्चिककंटकं ॥ क्षिप्त्वारुध्वास्त्रियेदद्या द्राणमात्रेद्रवत्यलं ॥ ८७ ॥ आहरे
द्दामजघांतु टिट्टिभस्यतुपक्षिणः ॥ तन्मध्येनिक्षिपेद्भूर्जे पत्रंह्रूंकारवेष्टितं ॥ ८८ ॥ रक्ताश्व
मारपुष्पेण मुखंतस्यनिरोधयेत् ॥ कर्णोपरिस्थितंतच्च दृष्ट्वास्त्रीद्रवतिध्रुवं ॥ ८९ ॥ जलेन
लांगलीकंदं घृष्ट्वाहस्तंप्रलेपयेत् ॥ तद्धस्तःस्त्रीकरेस्पृष्टे द्रवेदग्नौघृतंयथा ॥ ९० ॥ सर्वेषांद्रा
वयोगानां मंत्रराजंशिवोदितं ॥ अष्टोत्तरशतंजप्त्वा तत्तद्योगस्यसिद्धये ॥ ९१ ॥ * ॐ
नमोभगवतेउड्डामरेश्वरायद्रावयद्रावयस्त्रीणांमदंपातयपातयस्वाहाठःठः ॥ १७ ॥ इतिश्री
सिद्धनागार्जुनविरचितेकक्षपुटेस्त्रीवशादिद्रावणांतश्चतुर्थःपटलः ॥ ४ ॥ ॥ ॥

॥ अथपतिवश्यं ॥ मालतीपुष्पसंयुक्तं कटुतैलंसुपाचितं ॥ एतल्लिप्तभगानारी रतौदासाय
तेपतिं ॥ १ ॥ खंजरीटस्यमांसंतु मधुनासहपेषयेत् ॥ अनेनयोनिलेपेन पतिर्दासोभवत्य
लं ॥ २ ॥ कर्पूरंदेवदारुंच सक्षौद्रंपूर्ववत्फलं ॥ सैंधवेनतिलान्भाव्य सप्तवारंपुनःपुनः ॥३॥
तत्पिष्ट्वालेपयेद्योनिं रतौदासःपतिर्भवेत् ॥ सौवर्चलंवचासिंधु मीनपित्तंवसाघृतं ॥४॥ सौ
वीरंचसमंपिष्ट्वा योनिलेपेपतिर्वशः ॥ पंचांगंदाडिमंपिष्ट्वा श्वेतसर्षपसयुतं ॥ योनिलेपे

कक्ष पतिंदासं करोत्यपिचदुर्भगा ॥५॥ * ॐ काममालिनिठःठः ॥१॥ उक्तयोगानांसप्ताभिमं पुटी.
त्रितेसिद्धिः ॥ रोचनंमत्स्यपित्तंच पिष्ट्वातुतिलकेकृते ॥६॥ वामहस्तेकनिष्ठायां पतिर्दासो
१५ भवत्यलं ॥ स्वयोनावृतुकालेतु रोचनंनिक्षिपेत्पुनः ॥७॥ स्वपुष्पंभावयंत्तेनतिलकंपति प०५
वश्यकृत् ॥ धत्तूरबीजचूर्णंतु सप्ताहंभावयेन्मलैः ॥८॥ सर्वद्वारोद्भवैस्तेन खानेपानेपति
र्वशः ॥ पुत्रजारीचरक्ताच मोहिनीगिरिकर्णिका ॥९॥ श्वेतापराजितामूलं समांशंचूर्ण
मध्यतः ॥ दीयतेपश्चिमेरात्रौ सतांबूलोतिवश्यकृत् ॥१०॥ सुश्वेतकंटकार्याश्च मूलंचगि
रिकर्णिकाः ॥ तांबूलेनप्रदातव्यं दासवत्कुरुतेपतिं ॥११॥ समूलचूर्णंभूधात्रीं वस्त्रेबध्वानि
वेशयेत् ॥ स्वयोनौऋतुकालेतु त्रिदिनांतेसमुद्धरेत् ॥१२॥ नवनीतेविनिक्षिप्तं तच्चूर्णंपा
चयेद्धृते ॥ तद्धृतंभोजनेदेयं पतिर्दासोभवत्यलं ॥१३॥ पिंबिंदुग्राह्यकार्पासाद्दतावंते
स्वयोनिगं ॥ सबीजमंडुकस्यास्य कार्पासंतंविनिक्षिपेत् ॥१४॥ कन्याकर्तितसूत्रेण
पुंपादांतंशिरोमिलेत् ॥ खट्वांगंवेष्टयेत्सूत्रे चतुष्पादंततःपुनः ॥१५॥ तेनसूत्रेणमडूकं
बध्वास्यंहंडिकांतरे ॥ रुध्वातन्निखनेद्भूमौ पतिर्दासोभवत्यलं ॥१६॥ अन्यत्रषंढोमदनो १५
भवत्यत्रतयासह ॥ यत्रमूत्रयतेभर्ता तन्मृद्वामेनपाणिना ॥१७॥ पत्न्याग्राह्यंसमंत्रेण

प्रयत्नात्पंचभिर्नखैः ॥ मृदंकुलालचक्रस्य परीतस्यचाहरेत् ॥ १८ ॥ उभाभ्यांवृषभं कृत्वा नसोःसूत्रंचप्रोतयेत् ॥ द्वारदेशेस्थितंतंतु यावद्भर्तातुलंघयेत् ॥ १९ ॥ तथा निखन्यतत्रैव पतिर्दासोभवत्यलं ॥ तद्गृहेकामदेवोसौ अन्यत्रषंढतांव्रजेत् ॥ २० ॥ * ॐ हौंनाथतुंढमूत्रयंतीहों पंचनखे तुचउच्चंउंपटीहोंसासौहिनींनहलींसाजोगिनीकामिनीयाली बधौंसुखनासांजवेनजागृपरांसांत्छं ॥ अनेनमूत्रस्थान मृत्तिकाग्राह्यासिद्धियोगः ॥ २ ॥ कार्पासाधूणितायत्र तत्रतच्छेषमाहरेत् ॥ तंकार्पासंस्वपुंशुक्रे भावयेत्तस्यसूत्रकं ॥ २१ ॥ विवस्त्रकन्यकाहस्ता द्विपरीतेनकर्तयेत् ॥ धनुर्दंतमयंकुर्यात् तत्सूत्रंत्रिगुणैर्गुणं ॥ २२ ॥ पत्युःपुंस्त्वंभवेत्ताव द्यावादारोपितंधनुः ॥ अवतीर्णेगुणेषंढो जायतेचवशोभवेत् ॥ देवदारुसमंकुष्टं पाययेद्वशयेत्पतिं ॥ २३ ॥ * ॐ नमोभगवतेउष्णेशाय ॐ दिग्बंधनायस्वाहा ॥ अनेनमंत्रेणसप्ताभिमंत्रितेसिद्धिः ॥ ३ ॥ पतिशुक्रंचकर्पूरं वटपत्ररसंतथा ॥ रोचनं चपिबेद्यास्त्री पतिमिच्छतितत्क्षणात् ॥ २४ ॥ सनालानितुपद्मानि क्षीरेणांजेनपेषयेत् ॥ गुटिकांछाययाशुष्कां नारीयोनौप्रलेपयेत् ॥ २५ ॥ दशवारंप्रसूतापि कन्यावज्जायतेभगं ॥ वेतसांमूलमादाय सजीरंखदिरंसमं ॥ २६ ॥ पेषयेच्छीततोयेन पीत्वासंकोचयेत्भगं ॥

कोकिलाक्षस्यबीजानि अजाक्षीरंचलांगली ॥ २७ ॥ क्काथयेल्लेपयेत्तेन योनिंप्रक्षालयेत्पुनः ॥
जलैःकार्पासमूलंच पिष्ट्वाम्मृद्वग्निनापचेत् ॥ २८ ॥ अनेनक्षालनंकुर्या द्विस्तीर्णसंकुचेद्भगं ॥
वृद्धानामपिनारीणां योनिसंकोचनंभवेत् ॥ २९ ॥ इतीश्रीसिद्धनागार्जुन विरचितेकक्षपुटे
पतिवश्यंनामपंचमः पटलः ॥ ५ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ अथाकर्षणं ॥ ॥ जांकारेमंत्रयेत्पाशं क्रौंकारेचांकुशंतथा ॥ त्रिफलंवामगंपाशं दक्षिणे
ज्वलितांकुशं ॥ १ ॥ संध्यायेत्स्वकरेमंत्री ततोमंत्रमिमंजपेत् ॥ * ॐ ह्रींरक्तचामुंडेतुरुतुरु
अमुकीमाकर्षय २ ह्रीं ॥ १ ॥ अस्यमंत्रस्यपूर्वस्मिन्नेवायुतजप्तेसिद्धिः ॥ अथवानिजमंत्रंतुगु
रुवक्त्रात्समागतं ॥ पूर्वस्मिन्नेवायुतंजप्त्वा तेनेवाकर्षणंभवेत् ॥ २ ॥ ध्यात्वासाध्यंचमलिन
मात्मानंदेवतानिभं ॥ ध्यात्वासाध्यगलेपाशं शिरौज्वलितमंकुशं ॥ ३ ॥ त्रिसंध्यं
तुजपेदेवंदिनानामेकविंशतिः ॥ ध्यानमंत्रेतथायंत्रे त्रयैलोक्याकर्षणंभवेत् ॥ ४ ॥ रक्त
वस्त्रेलिखेद्यंत्रं लाक्षायारक्तचंदनैः ॥ पूज्यंतद्धितरोर्मूले निखनेदवनीतले ॥ ५ ॥ त्रिसप्ताहं
सदासिंचे त्प्रातस्तंतंडुलोदकैः ॥ दूरादाकर्षयेन्नारीं यदिसानिगडान्विता ॥ ६ ॥ पूर्वोक्तैरौ

षधैर्यंत्रं रक्तवस्त्रेलिखेत्ततः ॥ वेष्टयेद्रक्तसूत्रेण जपेत्ध्यायेच्चपूर्ववत् ॥ ७ ॥ तद्यंत्रंपूजयेन्मंत्री
निगलेरुयांतरेततः ॥ बद्धमाकर्षयेदाशु निगलैःप्रतिपीडितं ॥ ८ ॥ पूर्वोक्तैरौषधैर्यंत्रं पूज
यित्वातथाक्षिपेत् ॥ नाभित्द्दांतरेयत्ना ज्जपेध्यायेच्चपूर्ववत् ॥९॥ त्रिसप्ताहेदिनेप्राप्ते सम्य
गाकर्षणंभवेत् ॥ पूर्वोक्तैरौषधैर्यंत्रं पूजयेन्मंत्रसंयुतं ॥ १० ॥ वेष्टयेत्पञ्चसूत्रैश्च निक्षिपेत्कल
शांतरे ॥ तत्रैवपूजयेन्नित्यं मासादाकर्षणंभवेत् ॥ ११ ॥ पूर्ववत्ध्यानमत्रेण शंभुदेवेनभा
षितं ॥ आश्लेषायांसमादाय अर्जुनस्याथबध्नकं ॥ १२ ॥ अजामूत्रेणसंपेष्य स्त्रीणांशिरसि
निक्षिपेत् ॥ पुरुषस्यपशूनांच क्षिपेदाकर्षणंभवेत् ॥ १३ ॥ जलौकांनीलसर्पंच शोषयित्वा
दहेत्क्षितौ ॥ जंबीरकाष्टैस्तच्चूर्णं धूपादाकर्षणंस्त्रियाः ॥ १४ ॥ साध्ययावामपादस्थां मृत्ति
कामाहरेत्तथा ॥ कृकलासस्यरक्तेन प्रतिमांकारयेत्सुधीः ॥ १५ ॥ साध्यनामाक्षरंतस्या
स्तद्रक्तौविलेखेतत्व्हदि ॥ मूत्रस्थानेचानिखने त्सदातत्रैवमूत्रयेत् ॥ १६ ॥ आकर्षयेत्तुतांनारीं
शतयोजनसंस्थितां ॥ चतुर्लक्षमितंजप्त्वा धुधुरोनामचेटकः ॥ पत्रपुष्पफलादीनांकरोत्या
कर्षणंध्रुवं ॥ १७ ॥ * ॐ अरेधुधुरआकृष्टिकर्ता सृष्टीपुत्रीअमुकींकरोऽन्हींन्हीं ॥ २ ॥रतिका
मौरतौग्राह्यौ भ्रमरौयत्नतोबुधैः ॥ भिन्नौकृत्वादहेत्तौतु चितिकाष्टैस्तयोःपुनः ॥ १८ ॥

 वस्त्रेणवेष्टयेद्भस्म पृथक्कृतत्पोटलीद्वयं ॥ तयोरेकमजाशृंगेदृढं बध्वापरिक्षिपेत् ॥ १९ ॥ यथा
याति च सामेषीतांपृथग्बधयेद्बुधः ॥ २० ॥ तद्भस्मशिरसिन्यस्तं क्षणादाकर्षणंस्त्रियः ॥ अपरं
 रक्षयेद्वस्ते तेननायातिकामिनी ॥ २१ ॥ * ॐ कृष्णवर्तयेस्वाहा ॥ अमुंमंत्रंपूर्वसेवायुतं
जप्त्वाउक्तयेगानामभिमंत्रणेसिद्धिः ॥ ३ ॥ * ॐ ऱ्हींचिलि २ छिंधि २ हन २ चंपे २
शोषय २ सर्वविद्याधिपतयेनमः ॥ ४ ॥ अनेनमंत्रेण स्नुभिकीलकमष्टोत्तशतानि मंत्रितं
कृत्वातथाप्रतिबोधयेत् ॥ यस्यास्तन्नाम्नातामाकर्षयति ॥२२॥ * ॐ आक्षांह्रुंचाह्रुंफट् ॥५॥
लक्षमेकंजपेदस्य पूर्वसेवासमाहितः ॥ दूरादाकर्षयेन्नारीं तत्रत्यांक्षोभयत्यापि ॥ २३ ॥
* ॐ त्यलमृत्युंजयमेमे ॥ ६ ॥ अनेनमंत्रेणकुंभकारमृत्तिकायाप्रतिकृतिंकृत्वामनुष्यास्थि
कीलेनाष्टोत्तरसहस्राभिमंत्रितेनसहानिखनेत् ॥ २४ ॥ रुधिरंस्रवति ॥ अथप्रतिकृतिंत्रिक
टुकेनालिख्य मधुच्छिष्ठेनवेष्टयेत् ॥ तस्याभगंसूचिकयाविध्वाललाटेतस्यनामाक्षरं अना
मिकारुधिरेणलिखेत् ॥ २५ ॥ तांप्रतिकृतिंखदिरांगारेस्थापयेत् ॥ ततःपूर्वमंत्रंजपेत् ॥
यावत्सिकथकंगलति तावदाकर्षणंभवति ॥ २६ ॥ इतीश्रीसिद्धनागार्जुन विरचितेकक्षपुटे
आकर्षणंनामषष्ठःपटलः ॥ ६ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ अथस्तंभनं ॥ गतिरुत्छानवाग्बाण खड्गादिव्याग्निवारिच ॥ शत्रुसैन्यशतानांच स्तंभनंश
भुनोदितं ॥ १ ॥ रजन्याहरितालैर्वा भूर्जपत्रेसमालिखेत् ॥ यंत्रंहरितसूत्रेण वेष्टयित्वापुनः
पुनः ॥ २ ॥ शिखायांबत्तयेतंतु गतिस्तंभकरंभवेत् ॥ चर्मकारस्यकुंडाच्च रजकस्यतथैवच ॥
॥ ३ ॥ कुंडान्मलंसमुत्धृत्य चांडालीऋतुवाससा ॥ बंधयेत्पोटलींप्राज्ञो यस्याग्रेतांविनिक्षि
पेत् ॥ ४ ॥ तस्योत्स्थानेभवेत्स्तंभः सिद्धियोगउदाल्दतः ॥ उष्ट्रस्यास्थिचतुर्दिक्षु निखनेद्भू
तलेध्रुवं ॥ ५ ॥ गोमेषमहिर्षीवाजी स्तंभयेत्करिणोपिच ॥ सितगुंजाफलंवाप्यं नृपात्रेपीत
मृत्सह ॥ ६ ॥ निशिकृष्णचतुर्दश्यां त्रिदिनंतत्रजागरेत् ॥ नित्यंसिंचेज्जलेनैव मंत्रपूजांच
कारयेत् ॥ ७ ॥ तस्याःशाखालताग्राह्या शुभऋक्षेसुमंत्रितां ॥ क्षिपेदस्यासनेतंतु स्तंभय
त्येवतत्ध्रुवं ॥८॥ ॐ गुरुभ्योनमः ॥ १ ॥ ॐ वज्ररूपायनमः ॥ १ ॥ * ॐ वज्रकिरणेशिवेरक्ष
२ भवेद्बाधिअमृतंकुरु २ स्वाहा ॥ १ ॥ अयंगुंजामंत्रः ॥ हरिद्राकारितंपद्मं तालपत्रेसुपूजितं ॥
चत्वारेसाध्यमंत्राकं मुखस्तंभकरंरिपोः ॥ ९ ॥ * ॐ हंसचखट्वीशायअमुकस्यमुखंस्तंभय २
स्वाहा ॥२॥ अकारःपन्नगाकारः साध्यकर्णेविचिंतिताः ॥ करोतिवचनेस्तभं चित्रंदेवगुरोरपि
॥ १० ॥ * असूश्रवर्णयस्वाहा ॥ ३ ॥ शतजप्तेनकीलेन खादिरेणास्यबंधनं ॥ जायतेवै

कक्ष रिणांस्तंभो दुर्गाग्रेकीलितेध्रुवं ॥११॥ * ॐ सइतिमूर्तिरुद्रायस्वाहा ॥४॥ कुंकुमालिखितंपद्मं पुटी.
भूर्जेनामांकितंरिपोः ॥ वेष्टितंनीलसूत्रेण सम्यक्स्तंभकरंभवेत् ॥ १२ ॥ * ॐ सहधनेशाय
१८ स्वाहा ॥ ५ ॥ लिखित्वाप्रेतवस्त्रेथ साध्यनामपुटीकृतं ॥ वेष्टितंनीलसूत्रेण स्मशानेपूरिते प० ७
भवेत् ॥ १३ ॥ * ॐ सहश्वेतायअमुकस्यवाक् स्तंभयस्तंभयस्वाहा ॥६॥ यस्याभिधानमुच्चार्य
सप्ताहंजपितेरिपोः ॥ मनोवाचोगतिस्तंभं चेटकःकुरुतेध्रुवं ॥ १४ ॥ * ॐ नमोहुंडनेअमुक
स्यगतिमुखंस्तंभयस्तंभय ॥ ज्वालाग्निगर्दभाग्निभृत्यादिकां बंधबंधस्तंभ २ कुरुचममेप्सि
तानिठःठः ॥ ७ ॥ हरिद्रयालिखेद्यंत्रं भूर्जपत्रेसमाहितः ॥ वेष्टयेत्पीतसूत्रैश्च पीतपुष्पै
श्चपूजयेत् ॥ १५ ॥ स्थापयेच्छिलयोर्मध्ये वाक्स्तंभोजायतेध्रुवं ॥ भृंगराजापमार्गंच सि
द्धार्थंसहदेविका ॥ १६ ॥ तुल्यंतुल्यंवचाश्वेता द्रवमेषांसमाहरेत् ॥ लोहपात्रेविनिक्षिप्य
विह्निनांतेसमुद्धरेत् ॥ तिलकंसर्वशत्रूणां बुद्धिस्तंभकरंभवेत् ॥ १७ ॥ * ॐ नमोभगवते
विश्वामित्रायनमः ॥ ८ ॥ सर्वमुखीभ्यांविश्वामित्राय विश्वामित्रोज्ञापयति ॥ शत्रयाआग
च्छतु अनेनमंत्रेण नदींप्रविश्य अष्टोत्तरशतंजलींस्तर्पयेत ॥ शत्रूणांमुखस्तंभोभवति॥१८॥ १८
* इदीर्वं ॐ नमोब्रह्मवेशरिरक्षरक्षठःठः ॥९॥ अनेनमंत्रेण सप्तपाषाणान्गृहीत्वात्रीन्कत्व्यां

बध्वाअपरेमुष्टिभ्यांधारणीया श्वोराणांगतिस्तंभोभवति ॥ १९ ॥ अंगुलीलक्ष्मणापुंखा
सर्पाक्षीशिखिमूलिका ॥ विष्णुक्रांताजटानीपापाठाश्वेतापराजिता ॥२०॥ पाटलींसहदेवींच
मूलंचसहदेविका ॥ पुष्यार्केणसमुद्धृत्य मुखेशिरसिसंस्थिता ॥ २१ ॥ एकैकंवारयत्ये
व शस्त्रसंघरणेनृणां ॥ वन्हूयंबुव्याघ्रभूपाल चोरशत्रुभयंजयेत् ॥ २२ ॥ श्वेतगुंजीयमूलंतु
ऋक्षउत्तरभाद्रके ॥ उत्तराभिमुखंग्राह्यं बाणस्तंभकरंमुखे ॥ २३ ॥ मूलंशुक्लत्रयोदश्यां ग्रा
ह्यर्कपिल्लकन्ययोः ॥ बलामूलंतथाग्राह्यं पिष्टातद्गोलकीकृतं ॥ २४ ॥ धार्यंमूर्ध्निकरेबाहौ
सर्वशत्रुनिवारणं ॥ गोजिव्हाकदलीद्राक्षावटश्वेतापराजिता ॥ २५ ॥ विष्णुक्रांताहस्ति
कर्णी सुश्वेताकंटकारिका ॥ मूलान्यादायपुष्यार्के रंभासूत्रेणवेष्टयेत् ॥ २६ ॥ स्वहस्तेकंक
णंधार्यं शत्रुस्तंभकरंरिपोः ॥ पाठारुद्रजटावाथश्वेतावाशरपुंखिका ॥ २७ ॥ श्वेतगुंजोत्थि
तंमूलं पुष्यार्केणसमुत्धृतं ॥ प्रत्येकंमुखमध्यस्थं रणेस्त्रंस्तंभकृत्परं ॥ २८ ॥ गांधारींवाब
लांकुंभीं पुष्यार्केचसमुद्धरेत् ॥ मूलतंडुलतोयेन पिष्टापीत्वादिनत्रयं ॥ २९ ॥ प्रत्येकंवारय
त्येव शत्रुसंघरणेनृणां ॥ केतकीमस्तकेनेत्रे तालुमूलेमुखेस्थिते ॥ ३० ॥ खर्जूरंचरणेत्वस्थे
खड्गस्तंभःप्रजायते ॥ एतानित्रीणिमूलानि चूर्णीकृत्यघृतैःपिबेत् ॥ ३१ ॥ त्र्यहंरात्रौततः

कक्ष शस्त्रै र्यावज्जीवंनबाध्यते ॥ शिरीषमूलंपुष्यार्कें ग्राहयेत्पेषयेज्जलैः ॥ ३२ ॥ अर्धाहारेकृते पुटी.
पश्चा त्तज्जलंवार्धकंपिबेत् ॥ यावद्दिनानितत्पीतं तावच्छस्त्रैर्नबाध्यते ॥ ३३ ॥ तन्मूलेतुगले
१९ बद्धे खड्गैर्मेषोनभिद्यते ॥ पुंखीपुष्योद्धृतासूतं वराट्याउदरेक्षिपेत् ॥ ३४ ॥ तंवराटंकरंज प० ७
स्य फलमध्येविनिक्षिपेत् ॥ तत्फलंमुखमध्यस्थं शस्त्रस्तंभकरंपरं ॥ ३५ ॥ ग्रस्तेरवौसमुद्धृ
त्य शरपुंखींसमंत्रकं ॥ वक्रेयोधारयेन्मौनी सतुखड्गैर्नबाध्यते ॥ ३६ ॥ शमूलपत्रशाखांतु
विष्णुक्रांताविचूर्णयेत् ॥ तैलपकंततःकृत्वा तेनैवांगानिमर्दयेत् ॥ खड्गादिसर्वशस्त्राणां
भवेद्युद्धेनिवारणं ॥ ३७ ॥ * ॐ तुरुतुरुवार्तालिस्वाहा ॥ १० ॥ कृकलासस्यवामांघ्रिं हरि
तालेनवेष्टयेत् ॥ ताम्रपत्रैःपुनर्वेष्ट्य मुखस्थंसर्वशस्त्रजित् ॥ ३८ ॥ * ॐ चामुंडेभयवारिणि
स्वाहा ॥ ११ ॥ वज्रंहेमाभ्रकंताप्यं कांतसूतसमंसमं ॥ मर्घजंबीरजैर्द्रावै र्दिनंखल्वेततःपुनः
॥ ३९ ॥ ब्रह्मवृक्षस्यबीजानि कार्पासास्थीनिराजिकाः ॥ बंध्याचपववीत्रोंच पिष्ट्वातंमध्यगं
कुरु ॥ ४० ॥ पूर्ववन्मर्दितंगोलं लघुसप्तपुटैःपचेत् ॥ ततोगजपुटंदद्या न्मूषांरुध्वाधमेद्धटात्
॥ ४१ ॥ तद्गोलंधारयेद्वक्रे शस्त्रस्तंभकरंभवेत् ॥ हंतिरोगंजरांमृत्युं गुटिकास्मरसुंदरि ॥ ४२ ॥ १९
सर्वेषामुक्तयोगानां कुंभकर्णंस्मरेद्धृदि ॥ आयांतंसंमुखंशत्रुं समूहंसंनिवारयेत् ॥ ४३ ॥

* ॐ अहोकुंभकर्णमहाराक्षस कैकसीगर्भसंभूतपरसैन्यभंजनमहाभगवान् रुद्रोआज्ञापयति
स्वाहा ॥ १२ ॥ सर्वयोगानामनेनाष्टोत्तरसहस्रजप्तेसिद्धिः ॥ अत्रत्याःसर्वामूलिका उत्तराभि
मुखेनोत्पाटयेत् ॥४४॥ हनुमंतादितैर्मंत्रैः खड्गधाराभिमंत्रिताः ॥ नछिनत्तिमहाश्चर्यंसर्व
भूतान्शिवोदितां ॥ ४५ ॥ * ॐ कारुअमृतभयोहनुमंत बंधोवारुबंधोवाचा
सोहनुमंतबंधोगुरुकेवाक्यमुहिसिद्धिः ॥ ॐ अरुकीलालुअणिबंधोधातुं ॥ ॥ ॐ चंद्रमा
तासूर्यपिता विष्णुकर्तामळनपुटवायुहनुमंतकीशक्तिफरे ॥ १३ ॥ एवमेकेनवायुमंत्रेण
मृत्तिकांसप्ताभिमंत्रितां कृत्वाखड्गधारांलेपयित्वासिद्धिर्भवति ॥ ४६ ॥ त्रिपर्णी
बीजतैलेन लिप्तोधारानभिद्यते ॥ यत्किंचिज्जीवसंघातं पूर्वमंत्रप्रभावतः ॥ ४७ ॥ शिरी
षमूलमादाय रविवारेतुपूर्वकं ॥ उदकेनसमंघृष्ट्वा ललाटेतिलकेकृते ॥ ४८ ॥ तप्तदिव्येत
थासर्पे कृतदोषोविमुच्यते ॥ उत्तराभिमुखंमूले मेघनादस्यमूलकं ॥ ४९ ॥ भक्षयेद्धा
रयेद्धस्ते दिव्यस्तंभकरंमुखे ॥ श्वेतगुंजीयमूलंतु ऋक्षउत्तरभाद्रके ॥ ५० ॥ उत्तराभिमुखं
ग्राह्यं दिव्यस्तंभकरंमुखे ॥ गृहीत्वापुष्यनक्षत्रे काकजंघाजटांतथा ॥ ५१ ॥ तस्यासर्वां
गलेपेन तप्तदिव्येजयाभवेत् ॥ साद्धाराहाशिखामूलं क्षीरेणसहपेषितं ॥ ५२ ॥ स्तंभयेत्तं

दुर्लंदिव्य मपराण्हेपिबेद्यदि ॥ चूर्णयेद्रोचनांभृंगी ऋजीकांक्षीसमंसमं ॥ ५३ ॥ प्रातरा
ज्येनतत्पीतं दिव्यस्तंभकरंभवेत् ॥ संजातमात्रगोवत्स विष्टाग्राह्यांतरिक्षतः ॥ ५४ ॥ भक्ष
यित्वाविषंखादे द्विषदिव्येजयोभवेत् ॥ स्त्रीरजोबालमोटींच पिष्ट्वाहस्तंप्रलेपयेत ॥ ५५ ॥
तप्तलोहान्वितेदिव्ये कृतदोषोविशुध्यति ॥ भृंगीमूलंरोचनाज्यं पिष्ट्वापाणौप्रलेपयेत् ॥ ५६ ॥
ललाटेतिलकंकृत्वा तप्तदिव्येजयोभवेत् ॥ मरीचंमागधांचैलां चर्वित्वागलितेसति ॥ ५७ ॥
रवितंडुलजेदिव्ये कृतदोषोविशुध्यति ॥ आज्यंशर्करयापीत्वा चव्यंवानागरंवचां ॥ ५८ ॥
तप्तलोहंलिहेत्पश्चा त्कृतदोषोविशुध्यति ॥ मंडूकवसयापिष्टै र्लज्जामूलैरलक्तकैः ॥ लिप्तपा
णिर्नरःसत्यं तप्तदिव्येविशुध्यति ॥ ५९ ॥ * ॐ अग्निंदहंतिकाधरे सोमंदंहंतिकेहेकलायुता
यीनातावत्रौद्रदिव्यपतिंतावेव ईश्वरवुमंसाखुएतथं भवबनश्रीमहादेवकीआज्ञा ॥ अयंमंत्रः
स्तप्तेघृते तैलेदिव्येसिद्धोभवति ॥ १४ ॥ * ॐ लोहज्वालेनप्रज्वालेकेलामातु हौवरुकेदारा
कापटीलाहापादौतुषारु ॥ अयंतप्तलोहदिव्यस्तंभनमंत्रः ॥ १५ ॥ अथाग्निस्तंभनं ॥ जप्त्वा
नरोटकींदेवीं तांवामहिषमर्दनीं ॥ अंगारराशिमध्येतु प्रविष्टोसौनदह्यते ॥ ६० ॥ * ॐ २०
औंकटीरच्छयधणे पासेकटीजंवर्णीय्रसिअलिशालामुदितेवशेनरकीजंमर्न्हीं र्न्हींफट् ॥ १६ ॥

*ॐ ह्रीं महिषवाहिनीमहाविद्ये जंभयमोहय उच्छेदय २ अग्निस्तंभय २ ठठः ॥ एवंमंत्रद्वयं पूर्वसेवायुतंजप्तेसिद्धिः ॥ १७ ॥ अथमंत्रंहुंहेशस्यहनुमंतोपिवापुनः ॥ नारायणस्यसूर्यस्य जपेद्वाब्रह्मदस्यच ॥ अयुतंपूर्वसेवायां ततोंगारैर्नबाध्यते ॥ ६१ ॥ *ॐ तत्तात्तत्ताअंगा रिभेदमय मधमबंधकुमारिमुह्यातिसिद्धिः ॥ शियालासलसदगौरी महादेवकीआज्ञा ॥१८॥ *ॐ नमोयकलुनीरुतिकानीजलेबलेप्रज्वले ॥ प्रमाणुचंडेश्रीमहादेवकी आज्ञापावेवापुशले ॥ १९ ॥ आग्नीधतीकोधरेधयो मैगलहयुवायुमाजन्नकीयोसाश्वियोहनुमंतजलेयु प्रज्वले युदज्जेयुईश्वर महादेवकीआज्ञापूजायावे बपालयुवाशलाहु ॥ अग्नीज्वलतीमधरीदिनोहम धुमेवैश्वानर धमावियोदेयुनारायण साखुनारायणसोअग्निउपयिकदौकरी मैघुलुजुयुजायां नैच्छदद्ली वट्टीयुजार्याजलेन प्रज्वलेइंकामिलेआज्ञाया पूनायापाय टालेश्रीसूर्यकोआज्ञा अहोसूर्यआपादावीदीप्ते मुज्जाहीज्जाहोडककायो तामेरीहत्यादुआग्निकुंडेब्रह्मांड ज्जालाउ परुआणो पाणिरेएलाआणिदे वैश्वानरनायुमे रीदिमोघाराधककायु मारोजीमहमुह २०* ॐ गुरुमदिशादिकल्कां महमदुगतिहिओं ॥ २१ ॥ एवमुक्तमंत्राणांपूर्वसेवा अष्टोत्तरशतंकु र्यातासिद्धिर्भवति ॥ ततोभिमंत्रितंश्वेतैरंडदंडेनअंगाराराशिंघट्टयित्वा अग्निस्तंभनंमंत्रमेकंज

कक्ष पेत् ॥ ६२ ॥ ततोनिर्भयोभूत्वामंत्रं पठन्नंगारराशिंविचरेत् ॥ नदह्यतेऽतिसिद्धियोगः ।६३। पुटी.
कुमारीसूरणंपिष्ट्वा लिप्तहस्तोनरोभवेत् ॥ दीप्तांगारैस्तप्तलोहैमंत्रयुक्तोनदह्यते ॥ ६४॥ पाठा
२१ मूलंघृतंदंते लौहपिंडंसुधामितं ॥ लिप्यमानंनदह्यंति मंत्रराजप्रभावतः ॥ ६५ ॥ उलूकबक प० ७
मंडूक वसामादायलेपयेत् ॥ अनयालिप्तगात्रस्तु नाग्निनादह्यतेनरः ॥ ६६ ॥ * ॐ नमोभग
वतेचंद्रकांतशुभे व्याघ्रचर्मनिवासिनिवनमालिनीस्वाहा ॥ २२ ॥ इमंमंत्रंसहस्रैकंपूर्वसेवायु
तंजप्त्वाततस्तेनवन्हिमध्येनदह्यते ॥ * ॐ नमोभगवतेउड्डामरेश्वरायधातय २ त्रासय २
चल २ हर २ सिद्धःस्वाहा ॥२३॥ उक्तयोगद्वयेअसौमंत्रः ॥ मंडूकवसयापिष्ट्वानिबद्धक्षत्वचंततः
॥ लिप्तगात्रोनरोवन्हि स्तंभयत्येवतध्रुवं ॥ ६७ ॥ स्त्रीपुष्पंखरमूत्रंच पचेद्भकवसायुतं ॥ तेनै
वलिप्तहस्तस्तु तैलाज्यांभ्यांनदह्यते ॥६८॥ कुमारीतैललिप्तस्तु हस्तोलोहेनदह्यते ॥ जलू
कापाटलीमूलं शैवालंकुसुमंसमं ॥ मंडूकवसयापिष्टं लिप्तगात्रोनदह्यते ॥६९ ॥ * ॐअग्नि
बलंतीमैधरी मतिहरुमैमवैश्वानररूपंवियोगौरीमहेश्वरसांखु ॥ २४ ॥ उक्तयोगानामयंमंत्रः ॥
मंडूकपित्तमादाय मेषस्यवसयासह ॥ सज्जूलुकाप्रलेपेन वन्हिस्तंभनमुत्तमं ॥ ७० ॥ २१
* ॐ नमोभगवतेचंद्रकांत शतव्याघ्रचर्मपरिनद्धवसनेचलनमालयेस्वाहा ॥ २५ ॥ ॥

उद्भ्रांतपत्रनिर्मोल्द मेरंडंपारिभद्रकं ॥ मंडूकवसयासार्धं पृष्ठाग्मृद्वाग्निनापचेत् ॥ ७१ ॥ तेन
पादप्रलेपेन भ्रमेदंगारपर्वते ॥ बककांडंसमात्दृत्य मंडूकवसयासह ॥ गुटिकांकारयेत्तेनाक्षि
पेद्वन्हौततोभ्रमेत् ॥ ७२ ॥ * ॐ नमोभगवतेचंद्ररुचिकालद्विहस्तितक्रमस्तंसहनचं
द्ररूपेण अग्निपुत्रवरंकटुकटुठःठः ॥ २६ ॥ उक्तयोगत्रयेअयंमंत्रः ॥ वामपादंवामहस्तं कृकला
सस्यपूर्ववत् ॥ संग्राह्यासिक्थकैर्वेष्ट्य वन्हिस्तंभोमुखेस्थिते ॥ ७३ ॥ तस्यैववामहस्तंच पा
रदेनविमर्दयेत् ॥ वेष्टयेन्नागपत्रेण वन्हिस्तंभोमुखेस्थिते ॥ ७४ ॥ * ॐ अमृतायइडेपिंग
लेस्वाहा २७ ॥ कृकलासयोगानामयंमंत्रः ॥ भृंगराट्कदलीकंदं मंडूकवसयापचेत् ॥ मृद्वग्नि
नाततोलेपा त्पादयोर्वन्हिसंचरः ॥ ७५ ॥ श्वेतगुंजारसेनैव सर्वांगेलेपमाचरेत् ॥ अंगाररा
शिमध्येतु भ्रममाणेनदह्यते ॥ ७६ ॥ * ॐ वज्रकिरणेअमृतंकुरुकुरुस्वाहा ॥२८॥ उक्तयोगा
नामयंमंत्रः ॥ सप्तधाहिमवन्मंत्रं जप्त्वातोयेनताडितः ॥ वन्हिःशाम्यतिरौद्रोपि दह्यमाने
गृहेसति ॥ ७७ ॥ हिमाचलोत्तरेभागे मारीचोनामराक्षसः ॥ तस्यमूत्रपुरीषाभ्यां
हुताशंस्तंभयामिस्वाहा ॥ ७८ ॥ गोपालजलशूकाच मंडूकवसयात्रिभिः ॥ लिप्तेवस्त्रेधृतो
वन्हि र्नदहेद्वस्त्रमद्भुतं ॥ ७९ ॥ रसमेरंडपत्रस्य शिरीषस्यचपत्रकं ॥ ताभ्यांतुल्यं पचे

च्छीर्षे नरतैलेनकंबलं ॥ ८० ॥ लिप्त्वाप्रज्वलितंधार्यं शिरस्थोग्निर्नदह्यति ॥ तिलतैलाक्तसू
त्रेण विलेप्यंकांस्यभाजनं ॥ ८१ ॥ अधःप्रज्वालयेदग्निं सक्षीरंपायसंपचेत् ॥ नसूत्रंदह्यते
चित्रं पायसंकामलामहं ॥ ८२ ॥ भूर्जपत्रपुटेतैलं कंदलस्यपुटेपिवा ॥ क्षिप्त्वाबाह्येलिपेत्तैलं
छिन्नभांडमुखेपुनः ॥ ८३ ॥ संस्थाप्यलेपयेत्संधिं गोमयेनतुतत्पुनः ॥ स्थितंचुल्यामधोवन्हिं
प्रज्वाल्यवटकान्पचेत् ॥ ८४ ॥ लोहपात्रइवाश्चर्यं पुटीतत्रनदह्यते ॥ वार्ताककांजिकैर्लिप्तं वे
ष्टयंतैलाक्ततंतुभिः ॥ ८५ ॥ तत्पुनःपाचयेद्वन्हौ नसूत्रंदह्यतेद्भुतं ॥ सप्तधाभावयेत्सूत्रं कन्य
कासंभवैर्द्रवैः ॥ ८६ ॥ योगपट्टंकृतंतेन क्षिप्तौवन्हौनदह्यते ॥ सूत्रंयथावरांकेन लिप्तंकुर्यात्त
तःपुनः ॥ ८७ ॥ यज्ञोपवीतकंतंतु क्षिप्तौवन्हौनदह्यते ॥ सूत्रैःप्राणणयाकोच्छै योगपट्टंतुका
रयेत् ॥ ८८ ॥ यज्ञोपवीतकंवाथ क्षिप्तोवन्हौनदह्यते ॥ दग्ध्वादौतुलसीकाष्ठं शाल्मल्योवा
थसेचयेत् ॥ ८९ ॥ खरमूत्रैस्तदंगारं ज्वालांचुल्यांनिवेशयेत् ॥ काष्ठभारशतेनापि अन्न
पाकोनजायते ॥ ९० ॥ मूलंतुश्वेतगुंजोत्थंवन्हौ मंत्रयुतंक्षिपेत् ॥ तस्योपरियुतंचान्नं मांसेना
पिनपच्यते ॥ ९१ ॥ पिप्पलीमरीचोचूर्णं चर्वयित्वाततःपुनः ॥ दीप्तांगारंनरोभुक्ता नवक्त्रं
दह्यतेक्वचित् ॥ ९२ ॥ * ॐ ह्रीं नमोमहामायेवन्हिरक्षरक्षस्वाहा ॥ २९ ॥ अनेनमंत्रेणोक्तप्रयो

गायोज्याः ॥ अथजलस्तंभः ॥ पद्मकंनामयद्द्रव्यं सूक्ष्मचूर्णंतुकारयेत् ॥ वापीकूपतडागेषु
निक्षिप्तंबध्यतेजलं ॥ ९३ ॥ * ॐ नमोभगवतेरुद्राय जलंस्तंभयठः ऐं । ३० । अयंमंत्रःस
र्वजलस्तंभेषुयोज्यः ॥ अगस्त्यपुष्पनिर्यासं माहिषीपयसापिबेत् ॥ खादेत्तन्नवनीतंचजला
न्मौनावसीदति ॥ ९४ ॥ * ॐ नमोभगवतेरुद्रायचल २ यदींद्रबकहलप्रिये कलहंसध्व
निएह्येहिस्वाहा ॥ ३१ ॥ त्रिलोहवेष्टितंहस्तं कृकलासस्यदक्षिणं ॥ समंत्रंधारयेद्द
क्के स्वेच्छयासंचरेज्जले ॥ समुद्रोपिनसंदेहो नरस्तोयेनबाध्यते ॥ ९५ ॥ * ॐ अनयउद
स्वाहा।३२।मूलंश्वेतंतुगुंजायाः कुसुंभरसपेषितं ॥ तेनैवरंजयेद्वस्त्रं तद्वस्त्रंस्वांगवेष्टितं ॥९६॥
गंभीरजलमध्येतु यावदिच्छतितिष्ठति ॥ जलस्तंभमिदंख्यातं गुंजामंत्रेणसिध्यति ॥९७॥
अलांबुफलचूर्णंतु पक्वंश्लेष्मातजंफलं ॥ पिष्ट्वातेनांजिनंलिप्त्वा नरोद्वंगुलमात्रकं ॥ ९८ ॥
तच्छुष्कंनिक्षिपेत्तोये तडागेवानदीन्हदे ॥ तस्योपरिस्थितोयोसौ नकदाचिन्निमज्जति।९९।
श्लेष्मातालांबुपिष्टेन कर्तव्यंपादुकाद्वयं ॥ गोधाचर्ममयंबुध्नं कृत्वागूढश्चरेज्जले ॥ १०० ॥
श्लेष्मांतभवचूर्णंतु वापीकूपतडागके ॥ क्षिपेद्रात्रौभवेद्बंधोमुत्तयर्थंलवणंक्षिपेत ॥ १ ॥
श्लेष्मांतकस्यचूर्णंतु लेप्यंशुष्कंतुमृद्घटे ॥ घनमंगुलमानंस्या च्छोषयेपूरयेज्जलं ॥ क्षणार्धे

भिद्यतेकुंभो जलंबद्धंतुतिष्ठति ॥ २ ॥ * ॐ नमोभगवतेरुद्रायजलं स्तंभयठःठःठःठःठःठः
॥ ३३ ॥ त्रयाणामुक्तयोगाना मयमेवमंत्रः ॥ मकरस्यशृगालस्य नकुलस्यवसायुतं ॥ ३ ॥
जलसर्पशिरोपेत मक्षतैलेनपाचयेत् ॥ तेननस्यंकर्णलेपं कृत्वासंस्तंभयेज्जलं ॥ ४ ॥ * ॐ
नमोभगवतेरुद्रायव्याघ्रचर्मपरिधानायजलंस्तंभय २ ठःठः ॥ ३४ ॥ चतुर्दिनंनक्तभोजी
कृत्वालिंगार्चनंजपेत् ॥ अयुतेनैकजप्तेन सिद्धिभाग्भवतिध्रुवं ॥ ५ ॥ इतिश्रीसिद्धनागार्जु
नविरचिते कक्षपुटेगत्यादिस्तंभनंनाम सप्तमःपटलः ॥ ७ ॥ ॥ ॥ ॥

अथसेनास्तंभनं ॥ लक्षमेकंजपेन्मंत्रंवलाशतरुजेंधनैः ॥ मध्वाज्यसंयुतैर्होमा त्कालकर्णीप्र
सीदति ॥ १ ॥ सैन्यधारादिखड्गांबु गतिस्तंभकरीभवेत् ॥ सततंस्मरणान्मंत्रीविविधाश्च
र्यकारकः ॥ २ ॥ * ॐ चण्यूं चण्यूं कालकर्णिकेठःठः ॥१॥ द्विरंडदंडमध्यस्थं परसैन्यंविचिं
तयेत् ॥ तत्क्षणाद्भंगमायाति स्तंभितंवावतिष्ठते ॥ ३ ॥ ॥ * ॐ तद्विरंडायस्वाहा ॥ २ ॥
रक्तधत्तूरमूलंवा कंदलंलांगलीभवं ॥ कदलीकंदसंयुक्तं चितिभस्मंचपेषयेत् ॥ ४ ॥ समांसं
मर्कटीपत्रं मर्दलग्रासमध्यगं ॥ कुर्यात्तद्वाद्यमार्गेण श्रुत्वासेनापलायते ॥ ५ ॥ श्वमज्जाम

धुनापिष्ट्वा ललनाजारसंयुतं ॥ समरेलिप्तगात्रस्तु अवध्योदैवतैरपि ॥ दुष्टैश्चक्षेत्रपालैश्चावि
षसर्पैर्नबाध्यते ॥ ६ ॥ * ॐ नमोभगवतेरुद्रायशंखचक्र गदाधरायचिलि २ गिलि २ स्वा
हा ॥ ३ ॥ वराहपित्तमादाय देवदालीसुरांबिका ॥ ललनाजारसंयुक्ता समंगात्रेषुलेपयेत् ॥
येयुध्दाभिमुखायांति पतंतिमृतवत्क्षितौ ॥ ७ ॥ * ॐ नमोभगवते रुद्रायचंद्रवेतालिनेरौद्र
करालिनेहाहाहेहेस्वाहा ॥ ४ ॥ सारिकाहारिणी पित्तंनिर्गुंडीशशिपित्तकं ॥ कुष्टंचमधुनापि
ष्ट्वासर्वगात्रेषुलेपयेत् ॥ संमुखोयोभवे च्छत्रुःपतत्येवमहीतले ॥ ८ ॥ ॐ नमोभगवतेचंद्राशि
रसेमुकुलेहरहरस्वाहा ॥ ५ ॥ वर्षमात्रंमृतायास्तु कन्यायाःकृष्णमांसकं ॥ वामहस्तकनिष्टां
चसमादायपृथक्पृथक् ॥ ९ ॥ सिंदुरांतर्गतंरक्षे त्कृष्णमांसेनसंस्पृशेत् ॥ स्वयंस्वनाभितर्ज
न्या शत्रुंपश्येत्पतत्यसौ ॥ १० ॥ तस्याःकनिष्ठयानाभौ स्पर्शादुत्पातमाप्नुयात् ॥ लांगली
गृहगोधाच वन्हीपारावतंशिरः ॥ ११ ॥ चूर्णयेत्सर्षपैःसार्धं स्वगात्रंतेनलेपयेत् ॥ तंदृष्ट्वा
तत्क्षणाच्छत्रुःयुध्यमानःपलायते ॥ १२ ॥ * ॐ नमोभगवतेरुद्रायनमः शिखिनेकरालाय
ज्वलज्वालहलकस्वाहा ॥ ६ ॥ अनेनोक्तयोगद्वयंसाधयेत् ॥ शारिकांहारितालंतु जरायु
जंबुकाश्वयोः ॥ घृतेनपेषयेत्तुल्यं स्वगात्रंतेनलेपयेत् ॥ १३ ॥ संग्रामेसंकटेघोरे शत्रुसैन्ये

जयोभवेत् ॥ संमुखेयोभवेच्छत्रुः पतत्येवमहीतले ॥ १४ ॥ * ॐ नमोभगवतेउड्डामरेश्वरा
यभगवते चंद्रगोपहरणेचरुकमिदंगृह्ण २ स्वाहा ॥ ७ ॥ कृष्णश्वानस्यपुच्छंतु कृष्णमार्जार
पुच्छकं ॥ वृषभस्यचपुच्छंतु आर्द्रमादायपेषयेत् ॥ १५ ॥ गुटिकांकारयेत्तेन तिलकंकारये
त्ततः ॥ कृत्वांजलिपुटेयस्यकृतेसौपतातिक्षितौ ॥ १६ ॥ अजोत्थक्षीरपानेतुस्वस्थोभवाति
तत्क्षणात् ॥ धत्तूरस्वरसैःसिक्त वर्तिदीपस्यगंधतः ॥ १७ ॥ नरःपतत्यसौशीघ्रं नस्यात्सौवी
रसःसुखी ॥ यावकैरंजयेद्वर्तिं जलूकांचूर्णपूरितं ॥ करस्थानास्थितांदीप्तांदृष्ट्वापातयतिध्रुवं
॥ १८ ॥ * ॐ नमोभगवतेउड्डामरेश्वरायभ्रामय २ पातय २ ठः ठः ॥ ८ ॥ अथशस्त्रदू
षणं ॥ पुरुषंकृष्णसर्पेण दंशयित्वैवताच्छिरः ॥ छित्वासर्पस्यरक्तेन सर्वशस्त्राणिलेपयेत् ॥ १९ ॥
कुर्यात्तदस्त्रैर्यत्सृष्टिंसद्योयातियमालयं ॥ हालाहालंवत्सनाभं लांगलीचित्रमूलकं ॥ २० ॥ मक्षि
कापूर्णनाभिंतु सुश्वेतागृहगोधिका ॥ तत्पिष्ट्वालिप्यशस्त्राणि पूर्ववज्जायतेफलं ॥ २१ ॥
नीलीकारसगुंजाथ मर्कटीगृहगोधिका ॥ छुछुंदरीसमायुक्तां पिष्ट्वाशस्त्राणिलेपयेत् ॥ २२ ॥
अत्यल्पंछिद्यमानेपि म्रियतेचनसंशयः ॥ * ॐ नमोभगवतेउड्डामरेश्वराय दह २ पच २
घातय २ हिलि २ स्वाहा ॥ ९ ॥ शस्त्रदूषणत्रयेअयंमंत्रः ॥ षड्बिंदुमक्षिकानीला चूर्णैर्खर्जु

रमूलकं ॥ २३ ॥ लेपयेत्सर्वशस्त्राणि तद्घातेकृमिरुद्भवेत् ॥ कृमिकोपान्म्रियत्याशु विष्णुना
यदिरक्षितः ॥ २४ ॥ जलूकांमक्षिकांनीलां षट्बिंदुनाप्रलेपयेत् ॥ तच्छस्त्रछेदमात्रेणम्रिय
तेह्यमरोपमः ॥ २५ ॥ * ॐ नमोभगवतेउड्डामरेश्वरायदह २ भिन्न २ खड्गंगृण्ह २ स्वाहा
ठःठः ।९। उक्तयोगद्वयेमंत्रः ॥ हालहलंवत्सनाभं वृश्चिकोंगृहगोधिका ॥ छुच्छुंदरीकृष्णसर्प
गृहगोधाशिरांसिच ॥ २६ ॥ षड्बिंदुकरवीरोस्थं मदनस्यफलंतथा ॥ एतानिसर्वचूर्णानि
उष्ट्रीक्षीरेणपेषयेत् ॥२७॥ एषकांडप्रलेपस्तु राजशत्रुविनाशकृत् ॥ कृष्णसर्पशिरस्त्वष्टौ तत्तु
ल्यंचित्रमूलकं ॥२८॥ हालाहलंपलान्पंच हरितालंचतुष्पलं ॥ वृश्चिकंगृहगोधाचषड् बिंदु
करवीरकं ॥२९॥ लांगलीपलकंपंच छुछुंदर्याश्वतत्समं ॥ त्रिफलंपंचषट्कंच पलाशंपलषोडश
॥ ३० ॥ लांगलीकरवीरंच नागकेसरकंतथा ॥ प्रत्येकंत्रिफलंचूर्ण प्रत्येकंवसयासह ॥३१॥
एकीकृत्यप्रलेपोयं सर्वशस्त्रेपुलेपितः ॥ परसैन्यारिवर्गेषु स्पृष्टेस्यान्मरणंध्रुवं ॥ ३२ ॥ वा
पीकूपतडागानां जलमंतेनदूषयेत् ॥ पिबंतितज्जलंयेतु म्रियंतेतुशिवोदितं ॥ ३३ ॥ ॐ
नमोभगवतेउड्डामरेश्वरायदह २ पच २ मथ २ मारय २ ठःठःस्वाहा।१०।कृकलासस्यरक्तेन
मांसेनवसयाथवा ॥ लेपयेत्सर्वशस्त्राणि स्पर्शनान्मारयेद्रिपून् ॥ ३४ ॥ ॐनमोभगवतेरुद्रा

कक्ष

२५

यघातय २ ठःठः।११।पूजापूर्वमघोरस्य पंचलक्षमिमंजपेत् ॥ ब्रह्मचारीजितक्रोधः पशुसंब- पुटी.
धवर्जितः ॥ ३५ ॥ कुलाचाररतोवीरः पश्चिमाम्नायदीक्षितः ॥ दिनांतेनक्तभुक्सिद्धो भूमि
शायीजितेंद्रियः ॥ ३६ ॥ अलिनातर्पयेत्पूर्वं जपेद्रुद्राक्षमालया ॥ पंचलक्षंकृतेजापे होमंकुर्या प०८
द्दशांशतः ॥ ३७ ॥ शिवशक्तिसमुद्भूते षट्कोणेमेखलान्विते ॥ हस्तमात्रप्रमाणेन सानले
तर्पयेदमुं ॥ ३८ ॥ महास्यमहिकर्णंच चंद्रसूर्याग्निलोचनं ॥ संदंष्ट्राभंमहाजिव्हं मूर्ध्ववक्त्रं
विचिंतयेत् ॥ ३९ ॥ घृताक्तंहविरादाय मृगमुख्यातुमुद्रया ॥ भैरवायमहारौद्रे जुहुया
न्मंत्रसिद्धये ॥ एवंसंतोष्यदेवेशं मंत्राश्चात्रैवकथ्यते ॥ ४० ॥ * ॐ अघोरेऐंघअघोरे-ह्रीं
घोरघोरश्रीश्वसर्वर्पतः शर्वैफंरुद्ररूपेसौनमस्ते॥१२॥एषाविद्याअघोराख्या सर्वशास्त्रेषुगोपि
ता ॥ प्रस्फुरापश्चिमाम्नायेपंच प्रणवसंयुता ॥ ४१ ॥ प्रस्फुराशंभुदेवेन मेरुतंत्रेप्रकाशिता
॥ पूजनाज्जपनाद्धोमादस्त्रासिद्धिमवाप्नुयात् ॥ ४२ ॥ यथासंप्राप्यतेवीर स्तथेदानींनिगृह्यते
॥ विलेप्यसर्षपान्मंत्री ब्रह्मपुष्पाणिहोमयेत् ॥ ४३ ॥ अष्टोत्तरसहस्त्रंतु संख्यासर्वत्रसिद्धदा
॥ ब्राह्मीसंतोषमायाति ब्रह्मास्त्रंसाप्रयच्छति ॥ ४४ ॥ कल्पांतक्रुद्धकालाग्निः सदृशंकुंडमध्य
तः ॥ उत्तिष्ठत्यस्त्रमत्युग्रं देवासुरभयप्रदं ॥ गृहीतंपाणिनास्त्रंच सर्वैश्वर्यमवाप्नुयात् ॥४५॥ २५

॥ अघोररूपेश्रीब्राह्मिअवतर ब्रह्मास्त्रंदेहिमेदेहिस्वाहा ॥१३॥ मेषरक्तेनसंलिप्त लांगलीपुष्प
होमतः ॥ अष्टोत्तरसहस्रेण माहेशीशस्त्रदाभवेत् ॥ ४६ ॥ कालानलसमप्रख्यं दुर्जयन्निर्ज
रैरपि ॥ तदादायकरेमंत्री साधयेद्विविधाश्रयः ॥ ४७ ॥ अघोररूपेश्रीमाहेश्वरिअवतर २
पावकास्त्रंदेहिमेदेहिस्वाहा ॥ १४ ॥ माहिषोत्थेनरक्तेन संयुक्ताकंकुमाहुतीः ॥ अष्टोत्तरसह
स्रंतु कौमारीशक्तिदाभवेत् ॥४८॥ तयाकरस्थयामंत्री साधयेदवनीतले ॥ सर्वराजकम क्रम्य
महेंद्रइवराजते ॥ ४९ ॥ अघोररूपेश्रीकौमारि शक्तिशस्त्रंदेहिमेदहिस्वाहा ।१५। ऊलूकशोणि
ताभ्यक्त बिभीतपत्रहोमतः ॥ अष्टोत्तरसंहस्रंतु हुत्वातुष्यतिवैष्णवी ॥५०॥ चंद्रहासंचसादत्ते
करस्थश्चक्रवर्तिजित् ॥ अवत्यसौमहावीरा राजतेवरूणोयथा ॥ ५१ ॥ श्रीवैष्णविअवतरख
ड्गंदेहिमेदेहिस्वाहा ।१६। मीनस्नेहसमायुक्त वरुणेंधनहोमतः ॥ अष्टोत्तरसहस्रेण वरुणास्त्रंल
भेन्नरः ॥५२॥ मंत्रीपाणिगतंदृष्ट्व. तदस्त्रंवसुधातले ॥ प्लावयंतिजलौघेन मेघादारुणगर्जि
ताः ॥ ५३ ॥ अघोररूपेश्रीवाराहि अवतर २ वारुणास्त्रंदेहिमेदेहिस्वाहा ॥ १७ ॥ वज्रोप
ल्लवदूर्वाभ्यां होमादेवप्रसीदाति ॥ अष्टोत्तरसहस्रेण कुंडमध्योद्गताशनिं ॥ ५४ ॥ गृहीत्वापा
णिनामंत्री मारयेदुष्टभूभृतः ॥ तदीयंराज्यमासाद्य कुर्याद्धर्ममनेकधा ॥ ५५ ॥ ॐ अघोर

कक्ष रूपेश्रीइंद्राणि अवतर २ वज्रंदेहिमेदेहिस्वाहा।१८। अष्टोत्तरसहस्रंतु साज्यंश्रीफलहोमतः ॥ पुटी.
त्रिशूलंकुंडमध्योत्थं महालक्ष्मीप्रसीदति ॥ दुर्जयोदेवदैत्यानां कैलासमनुगच्छति ॥ ५६ ॥
२६ ॐ अघोररूपेश्री महालक्ष्मिअवतर २ शूलंदेहिमेदेहिस्वाहा १९ अश्वरक्तेनसंलिप्तं देवदारुविध प०८
नंहुते ॥ चतुर्दशसहस्राणि विपरीतप्रयोगतः ॥ ५७ ॥ देहिमेरथमुच्चार्य मंत्रांतेसाधकोत्तमः
॥ लभतेनंदिगोपाख्यं रथंप्राहिप्रसादतः ॥ ५८ ॥ श्वेताश्वकिंकिणीजाल मंडितंश्वेतकेतनं
॥ तमारुह्यमहावीरो विचरेद्भुवनत्रये ॥ ५९ ॥ ॐ वाराहिदेहिमेअवतर २ अक्ष्मींब्रश्रेयिं
रूपं घोरअदेहिमेरथं ॥२०॥ पूजांवक्ष्येअघोरस्य शस्त्राणांसिद्धिदायिनीं ॥ शुद्धेशुभेगृहेकुर्या
त्सर्वरक्षांशिवोदितां ॥ ६० ॥ अश्वत्थंखादिरोत्थंचं देवदारुबिभीतजं ॥ उदुंबरोत्थंचिंचो
त्थं वटोत्थंप्लक्षसंभवं ॥ ६१ ॥ कीलकंपूर्वमारभ्य रुद्रांतांनखमत्क्रमात् ॥ सुकीलकान्ह
स्तमात्रान् ब्रह्माद्यैरनुमंत्रितान् ॥ ६२ ॥ कृत्वैनंभस्मनास्नात्वा रक्तकृष्णांबरःशुचिः ॥ केश
जंवाथदर्भोत्थं धार्ययज्ञोपवीतकं ॥ ६३ ॥ पंचमुद्रान्वितोवीरो मृगचर्मकृतासनः ॥ करशु
द्धिंप्रकुर्वीत पंचभिःप्रणवैःक्रमात् ॥ ६४ ॥ त्वक्छिरःशूलिकावक्त्र नेत्रेष्वेकैकशोगतः ॥ पंच
भिःप्रणवैश्चात्र स्वस्वनामान्वितंन्यसेत् ॥ ६५ ॥ * ॐ ऐंह्रींश्रींफ्रेंह्सौंपंचप्रणवाः।२१।रोच २६

नामघुकर्पूरं कुंकुमंचंदनंतथा ॥ एतैर्मंडलमालिख्य चतुरस्रंसमंशुभं ॥ ६६ ॥ तन्मध्येष्टद
लंपद्मं मद्यपात्रंचकारयेत् ॥ सशक्तिपरमेशानं यजेत्त क्रमउच्यते ॥ तद्यथा ॥ ६७ ॥ *
ॐ अघोरेऐंब्राह्मिअवतर २ नमःपूर्वस्यां ॥ ॐ अघोरेन्हींमाहेश्वरिअवतर २ नमःआग्नेये ॥
ॐ घोरघोरेकौमारिअवतरनमःदक्षिणस्यां ॥ श्रींविष्णावि० ॥ नैर्ऋते ॥ ॐ सर्वतःशतवाराहि
१० पश्चिमे ॥ ॐ फ्रंइद्राणि १० वायव्ये ॥ ॐ रूद्ररूपेचामुंडे १० उत्तरे ॥ ॐ ह्सौंनमस्तेमहा
लक्ष्मि १० ऐशान्ये ॥ ॥ होममध्येसहस्रसंख्यासर्वसिद्धिदा ॥ होममध्येमूलविद्ययादेवं
पूजयेत् ॥ ॥ ॐ श्रीकंठादिगुरूभ्योनमः ॥ ॥ अथक्षेत्रपालपूजा ॥ ॥ ॐ क्षांक्षींक्षूं
क्षैंक्षौंक्षः ॥ श्रीक्षेत्रपालायनमः ॥ ॥ बलिंगृण्ह २ स्वाहा ॥ मुद्राबंधनं ॥ ॥ अंगुष्ठौ
गर्भितौकृत्वा कमलेकर्णिकाइव ॥ अंगुल्यष्टकपत्राष्टौ पद्ममुद्रात्वियंभवेत् ॥ ६८ ॥ मुष्टिद्वय
कनिष्टाभ्यां विदार्यसृक्किणीद्वये ॥ करालीयंभवेन्मुद्रा हाहाजिव्हाप्रचालनात् ॥ ६९ ॥ क
न्यासाग्राथितानाम्ना कुंच्यादंगुष्टयोर्द्वयोः ॥ मध्यमाभ्यांसमाक्रम्य तर्जन्यग्रौमितौस्म
तौ ॥ ७० ॥ नीतौपराङ्मुखौनासा पृथ्वलालांविचिंतयेत् ॥ ॥ स्वाहाहुंफेकृतौकाय च
लनान्भैरवीमता ॥ ७१ ॥ मुखस्याविवृत्ताकारा करणाद्विवृतानना ॥ मुद्राभवतिसामर्थ्य दा

यिकाशंकरोदिता ॥ एषापूजासमाख्याता कर्तव्यामंत्रसिद्धये ॥ ७२ ॥ अथाशनिस्तंभनं ॥ रविवारेमृतायागौः कीलैस्त्वग्यत्रतन्यते ॥ चतुर्दिक्षुचतुःकीलान् गृहीत्वाचिन्ह येत्स्वयं ॥ ७३ ॥ रक्षयेत्तान्प्रय नेन रुद्रमंत्रेणमंत्रितान् ॥ चतुर्णांदापयेद्धस्ते येधार्वतिसु वेगतः ॥ ७४ ॥ पूर्वदिक्पूर्वगंकीलं दक्षिणेदक्षिणंतथा ॥ पश्चिमेपश्चिमंकीलं उत्तरेउत्तरं नयेत् ॥ ७५ ॥ अश्वारूढश्चवागच्छे त्पद्भ्यांवाथसुवेगतः ॥ अशनिःशलभामेघायांतिवर्षोप लाःक्षयं ॥ ७६ ॥ यावद्गच्छतियांद्वारं तावद्बाधानविद्यते ॥ गत्यंतेसंस्थितंतत्र याममात्रंजपे न्मनुं ॥ ७७ ॥ कीलकान्निखनेत्तत्र प्रत्यागच्छेत्सुमंत्रितं ॥ कीलकान्प्रातरादाय रक्षयेत्स्वगृहे सदा ॥ ७८ ॥ विद्युत्पातोनतत्रास्ति ग्रामेवानगरेपिवा ॥ एवंयदायदाबाधा तदाकार्यंपुनश्च तैः ॥ ७९ ॥ ॐ नमोभगवतेउड्डामरेश्वराय सर्वदुष्टमेघाशनीनांस्तंभय २ नाशय २ स्वाहा ठःठः ॥ ८० ॥ चंद्रसूर्योपरागेतुवामलूकसमुद्भवं ॥ तरणींग्राहयेच्छुत्धौ रक्षासूत्रेणवेष्टयेत् ॥ ८१ खड्गंमुष्टौतुसंस्थाप्य पुनस्तांबंधयेद्दृढं ॥ वैराइयस्पर्शमात्रेण त्रिधास्त्रंखंडितंभवेत् ॥ ८२ ॥ इतिश्रीसिद्धनागार्जुन विरचितेकक्षपुटे सेनास्तंभननामाष्टमःपटलः ॥ ८ ॥ ॥ ॥

॥ अथमोहनं ॥ महिषीनीलसर्पस्य रक्तेचूर्णंतुभावयेत् ॥ कृष्णधत्तूरपंचांगं तत्धूपोमोहकृ
न्नृणां ॥ १ ॥ गुडंकरंजबीजंच घुणचूर्णेनसंयुतं ॥ समंपानेऽथवाधूपो मोहंप्रकुरुतेन्नृणां ॥
॥ २ ॥ हस्तिनीमहिषीरक्तं धत्तूरःफणिफेनकं ॥ मयूरस्यमलैस्सार्धं धूपोह्यंत्यतमोहकृत् ॥
॥ ३ ॥ वृश्चिकोद्भवचूर्णेन धूपोमोहकरोन्नृणां ॥ गरलंधूर्तपंचागं महिषीशोणितंकणा ॥४॥
निशायांकुरुतेमोहं धूपोगुग्गुलसंयुतः ॥ कुक्कुटांडकपालानि हलिनीतालकंवचा ॥ ५ ॥ क
नकाग्नियुतोधूपः स्वच्छस्यावेश्यकारकः ॥ तृणांतरजलूकाया विष्ठाचाजगरोद्भवा ॥ ६ ॥
तच्चूर्णेधूपितेरात्रौ मुह्यंतिप्राणिनोध्रुवं ॥ हलिनीविषधत्तूर शिखिविष्ठाभिरन्वितः ॥ ७ ॥
समंभागस्तथाधूपो मोहयत्येवनिश्चितं ॥ विशालाग्निशिलाचूर्णं लांगलीशिखिनोमलं ॥८॥
॥ महिषाक्षंचतुल्यंस्या त्धूपोमोहयतेनरं ॥ तालकोन्ननबीजानि पानान्मोहयतेनरं ॥ ९ ॥
समंक्षीररसितांकौटैः स्वच्छःपानाद्भवेन्नरः ॥ छुछुंदरीसर्पमुंडं वृश्चिकस्यतुकंटकं ॥ १० ॥ हरि
तालसमंधूपो मोहावेशकरोन्नृणां ॥ घुणचूर्णंविषंनिंबं मोहनीलांगलीकला ॥ ११ ॥ विशा
लास्वर्णबीजानि सर्षपामादनंफलं ॥ रक्ताश्वमारचूर्णंतु समभागंतुभावयेत् ॥ १२ ॥
१० आदित्यफलतूलंच तंतुवर्तिंविधायच ॥ कुसुंभतंतुभिर्गाढं मायाबीजेनवेष्टितं ॥ १३ ॥ स

तथाकनकद्रावै र्भावयेच्छोषयेत्पुनः ॥ डुंडुभोजलसर्पोयो वसांतस्यसमाहरेत् ॥ १४ ॥ वसा
लिप्तांपूर्ववर्तिं प्रज्वाल्यधारयेद्गृहे ॥ येपश्यंतिगृहेबाह्ये मुह्यंतिनिपतंतिच ॥ १५ ॥ मदनो
दुंबरश्चिंचा प्रियंग्वामलकीफलं ॥ बदरीचफलान्येषां प्रतिसप्तसमाहरेत् ॥ १६ ॥ पुष्यार्के
नरमूत्रेण कुमार्युत्थरसेनच ॥ संपेष्यगुटिकाकार्या तिलकोमोहकारकः ॥१७॥ ॐ जंजंभायै
नमः १ ॐ क्षुंबंस्तंभायैनमः २ ॐ स्म्यंमोहायैनमः ३ ॐ डयंशोषायैनमः ४ ॥ ॐ महा
भैरवायनमः ५ ॥ ॐ श्रीभैरवानंदआज्ञा श्रीवीरभद्रआज्ञा ॥ एवंजंभादिमंत्रैर्मोहप्रयोगा
अष्टोत्तरशतमभिमंत्र्यप्रयोज्याः ॥ प्रत्ययानयनंवच्मि येनमोहोविनश्यति ॥ शतपुष्प घृतं
क्षीरं श्वेतार्कंचपिबेत्सुखं ॥ गोसर्पिपुरधूपेन मोहात्स्वस्थोभविष्यति ॥ १८ ॥ अथोच्चाटनं
यथातथ्यंप्रवक्ष्यामि शत्रूणांदुष्टचेतसां ॥ उच्चाटोद्वोटविस्फोट व्याध्युन्मादादिकारणं॥१९॥
पशुसस्यार्थनाशंच प्रवक्ष्यामिसमासतः ॥ वेदशास्त्रागमाद्यैश्च ब्रह्मविष्णुमहेश्वरैः ॥ २० ॥
कथितंसर्वदासर्वैं दुष्टेदंडोविधीयते ॥ येनात्हृतंगृहंक्षेत्रं कलत्रंधनधान्यकं ।२१। मानोवाखंडि
तोयेन तस्यदंडोविधीयते ॥ उड्डीशंयोनजानाति सरुष्टःकिंकरिष्यति ॥ २२ ॥ तस्मात्स
र्वप्रयत्नेन दुष्टोदंडोविधीयते ॥ योनहन्यतिकोपेन सोतिशोकेनसिध्यति ॥ २३ ॥ पंचां

गुलंचित्रकस्य मूलंग्राह्यंपुनर्वसौः ॥ सप्ताभिमंत्रितंगेहे निखन्योच्चाटनंभवेत् ॥ २४ ॥ * ॐ लोहितमुखेस्वाहा।६।स्वात्यामौदुंबरंबुध्नं मंत्रितंचतुरंगुलं ॥ योयस्यनिखनेद्गेहेतस्यैवोच्चाटनंभवेत् ॥ २५ ॥ * ॐ गिलिगिलिस्वाहा ॥७॥ भरण्यामंगुलैकंतु उलूकास्थिचकीलकं ॥ सप्ताभिमंत्रितंयस्य निखन्योच्चाटनंभवेत् ॥ २६ ॥ ॐ दह २ हन २ स्वाहा ॥८॥ काकोलूकस्यपक्षांस्तु हुत्वाह्यष्टाधिकंशतं ॥ यन्नाम्नामंत्रयोगेन समस्तोच्चाटनंभवेत् ॥ २७ ॥ ॐ नमो भगवतेरुद्रायदंष्ट्राकरालाय कपिलरूपायअमुकंसपुत्रपशुबांधवैः सहहन २ दह २ पच २ शीघ्रमुच्चाटयहुं फट्स्वाहाठःठः ॥ ९ ॥ पादरज्जुःशवात्ग्राह्या शत्रुनाम्नातु निक्षिपेत् ॥ गृहे उच्चाटयेच्छीघ्रं कोपान्मंत्रंसमुच्चरेत् ॥ २८ ॥ नरास्थिकीलकद्वारे निखन्याच्चतुरंगुलं ॥ मंत्रयुक्तमरिद्वारे सत्यमुच्चाटनंभवेत् ॥ २९ ॥ ॐ नमोभगवतेरुद्राय अमुकंगृण्ह २ पच २ त्रासय २ त्रोटय २ नाशय २ पशुपतिराज्ञापयति। १०। मध्यान्हेलुठतेभूमौ गर्दभोयत्रधूलिकां ॥ उदङ्मुखउदीच्यांतु गृण्हीयाद्वामपाणिना ॥ ३० ॥ यद्गृहेक्षिप्यतेधूलि स्तस्यैवोच्चाटनंभवेत् ॥ काकस्यमस्तकंग्राह्यं तिलतैलेनपाचयेत् ॥ तत्तैलाभ्यंगमात्रेण शत्रोरुच्चाटनंभवेत् ॥ ३१ ॥ ॐ नमोभगवतेरुद्राय ज्वालाग्निसंख्यादंष्ट्राद्रावणायस्वाहा ॥ ११ ॥

 उक्तयोगद्वयेयंमंत्रः ॥ अश्वत्थकीलमश्विन्यां निखनेत्सप्तमंत्रितं ॥ पण्यांगनागृहेसत्यं शीघ्र
मुच्चाटकारकं ॥ ३२ ॥ ॐ नमोखंगुरवःखारिणीस्वाहा ।१२। कृत्तिकासर्जजंकीलं निखनेत्सप्त
 मंत्रितं ॥ यस्यगेहेसवैसर्वैः शीघ्रमुच्चाट्यतेगृहात् ॥ ३३ ॥ ॐ नमोभगवतेहतु २ स्वाहा ।१३।
निंबकीलकमार्द्रायां निखनेत्सप्तमंत्रितं ॥ यस्यगेहेसवैशत्रुः शीघ्रमुच्चाटयेतगृहात् ॥ ३४ ॥
ॐ नमोभगवतिकामरूपिणिस्वाहा ।१४। शिवालयाद्भौमवारे आदायचतुरष्टिकाः ॥ प्रत्येकंप्र
तिकोणेतु निखनेच्छत्रुमंदिरे ॥ ३५ ॥ निखनेतद्गृहद्वारे अधःपुष्पासचंदनं ॥ सप्तरात्रान्नसं
देहो महदुच्चाटनंभवेत् ॥ ३६ ॥ ॐ नमोभगवतेउड्डामरेश्वरायवायुरूपायबुलुबुलुठःठः १५
धात्रीफलस्यचूर्णंतु अंकुलीतैलभावितं ॥ उच्चाटकृद्भवेन्मूर्ध्नि स्नानात्गोक्षीरतःसुखी ॥ ३७ ॥
गुंजामूलंगृहद्वारे निखन्योच्चाटनंभवेत् ॥ तथैवमूलनक्षत्रे न्यस्तंखादिरबुध्नकं ॥ ३८ ॥
ब्रह्मदंडीचिताभस्म चित्तिस्थानास्थिचाहरेत् ॥ समंसूकरमांसंच कच्छपस्याशिरस्तथा ॥
॥ ३९ ॥ नृकपालेविनिक्षिप्य निखनेच्छत्रुमंदिरे ॥ सकुटुंबंसमूलंच सत्यमुच्चाटयेत्क्षणात्
॥ ४० ॥ नखानराहिमांसंच गृध्रास्थीनिविषंसमं ॥ गोपादंमाहिषीपादं निखनेच्छत्रुमंदिरे
॥ ४१ ॥ किंवाउलूकपक्षाणि महदुच्चाटनंभवेत् ॥ ब्रह्मदंडीचिताभस्म चित्रकंरुधिरंविषं ॥४२॥

सूकरस्यतुरोमाणि वीरातिक्तीसनिंबकं ॥ सप्ताहंशत्रुनाम्नातु ह्युत्वोच्चाटोभवेन्नृणां ॥४३॥ * ॐ
नमोभगवतेउड्डामरे श्वरायउत्सादय २ उच्चाटय २ हन २ ठःठः १६ गुंजामूलादीनामुक्तानाम
यंमंत्रः ॥ कृष्णपक्षेशनौभौमे भरण्यार्द्राथकृत्तिका ॥ चितिकाष्ठाग्रमादाय कीलकंचतुरं
गुलं ॥४४॥ वेष्टयेच्छत्रुकेशैस्तु आग्नेय्यांदिशिमंत्रयेत् ॥अष्टोत्तरशतंजप्त्वा सूर्यंदृष्ट्वातिकोपनः ॥
तंयस्यनिखनेद्द्वारे शीघ्रंच्चामुटनंभवेत् ॥ ४५ ॥ ॐ ऱ्हींयम २ उलूकेकरालेविद्युज्जिव्हे अ
मुकमुच्चाटय २ हुंफट् ॥ १७॥ छागरक्तंविषंराजी चित्यंगारैसहैकतः ॥ नामग्रस्तंलिखेन्मत्रं
काकपक्षतिरोषतः ॥ स्मशानेनिखनेत्तंचदेशादुच्चाटयेद्रिपून् ॥ ४६ ॥ ॐ द्रांदेद्रांवद्रांदद्रांत
द्रांउच्चाटय २ द्रांठः॥ १८ ॥ उष्ट्रारूढंरिपुंध्यात्वा हन्याद्दंडेनमंत्रतः ॥ दक्षिणादिक्त्रिसप्ताहं
देशादुच्चाटयेद्रिपुम् ॥४७॥ * ॐ ऱ्हींयम २ उलूकेकरालेविद्युज्जिव्हे अमुकमुच्चाटयहुंफट् १९
॥ काकपक्षखौग्राह्यं वेष्टयेदहिकंचुकैः ॥ कुसुंभसूत्रैस्तद्बा ह्येवेष्टितव्यंततःपुनः ॥ ४८ ॥ निं
बपत्रैरिपोर्नाम लिखित्वावेष्टयेच्छतं ॥ तद्वाहिश्चित्तिभस्मेन मृतवस्त्रेणवेष्टयेत् ॥ ४९ ॥
तदस्यनिखनेद्द्वारे तस्यैवोच्चाटनंभवेत् ॥ अथःपुष्पीसुरामांसी चितिभस्मसमन्वितं ॥ ५० ॥
॥ कूर्ममंडूकपात्रस्थं निखनेच्छत्रुवेश्मनि ॥ उच्चाटितोभवेच्छत्रुः सप्तरात्रान्नसंशयः ॥ ५१ ॥

कक्ष * ॐ नमोभगवतेउड्डामरेश्वरायउत्सादय २ उच्चाटय २ विद्वेषय २ हन २ ठःठः २० उक्तयो पुटी.
गद्दयेमंत्रः ॥ रवौगृध्रालयेग्राह्यो पुनःकाकालयोरवौ ॥ चितिकाष्ठंरवौपश्चा त्सर्वंतु
३० र्यरवौदहेत् ॥ ५२ ॥ ग्रामाद्बहिश्चतद्भस्मस्थापयेन्निक्षिपेद्रिपोः ॥ मूर्धन्युच्चाटितोगच्छे द्ग्राम १०९
यस्नानतःसुखी ॥ ५३ ॥ कृकलासंनिहत्यादौ स्नापयेत्पूजयेत्पुनः ॥ श्वेतवस्त्रेणसंवेष्ट्य
किंचित्कुर्याच्चरोदनं ॥ ५४ ॥ ततःकाकालयंग्राह्यं चंडालानांगृहांतिके ॥ स्मशानखर्परेतौच
दहनीयौचतुष्पथे ॥ ५५ ॥ तद्भस्मवस्त्रसंबत्धं क्षिपेद्यस्यगृहोपरि ॥ उच्चाटनंभवेत्तस्य श्रीपु
त्रपशुबांधवैः ॥ ५६ ॥ निंबात्काकालयंदग्ध्वा ब्रह्मदंडीचभस्मना ॥ म्लेंच्छचांडालविप्रा
णां त्रयाणांचितिभस्मच ॥ ५७ ॥ भूमधूच्छिष्टसंयुक्तां गुटिकांकारयेद्दृढां ॥ शत्रोःशिर
सिनद्यांच क्षिपेदुच्चाटयेद्रिपुं ॥ ५८ ॥ * ॐ नमोभगवतेउड्डामरेश्वरायदंष्ट्राकरालायकपि
लरूपायअमुकंसपुत्रबांधवंहन २ दह २ पच २ मथ २ शीघ्रमुच्चाटय २ हुंफट्ठःठः २१ उ
क्तयोगत्रयाणामयंमंत्रः ॥ चतुर्दिङ्मृत्तिकाग्राह्या ग्रामस्यनगरस्यवा ॥ वृषभस्यमलैःसार्धं
पंचपुत्तलिकाःक्रमात् ॥ ५९ ॥ तांग्रामस्यचतुर्दिक्षु एकेकांनिखनेत्पुनः ॥ पंचमींग्राममध्ये ३०
तु कुंडेवानिखनेद्भुवि ॥ ६० ॥ हुनेदष्टसहस्रंतु तत्रैवंकरकानले ॥ तद्भस्ममुष्टिमादाय त

स्मिन्ग्रामेविनिक्षिपेत् ॥ सप्ताभिमंत्रितंकृत्वा ग्रामस्योच्चाटनंभवेत् ॥ ६१ ॥ ॐ नमोभगव तेमहाकालाय दह २ जंभय २ मोहय २ स्मर २ निग्रहठःठःहुंफट्स्वाहा ॥ २२ ॥ ब्रह्मदं डीचिताभस्म शिवलिंगंसुलेपयेत् ॥ ॥ गृध्रास्थिचमनुष्यास्थि केशैश्चांडालविप्रयोः ॥ सूत्रेणचदिशोर्बध्वा देशस्योच्चाटनंभवेत् ॥ ६२ ॥ * ॐ नमः कालरात्रिशूलहस्तेमहिष वाहिनिरुद्रतालकृतशेखरेआगच्छ २ भगवतिअतुलवीर्येसर्वकर्माणिमेवशंकुरु २ महेश्वरआ ज्ञापयतिश्रींश्रींस्वाहा ॥ २३ ॥ इतिश्रीसिद्धनागार्जुनविरचितेकक्षपुटे मोहाद्युच्चाटनंनाम नवमःपटलः ॥ ९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ अथमारणं ॥ नरास्थिकीलकंपुष्ये गृहीत्वाचतुरंगुलं ॥ निखनेत्तुगृहेयस्य भवेत्तस्यकुलक्ष
११ यः ॥ १ ॥ * ॐ भूंभूंफट्स्वाहा ।१। अश्वास्थिकीलमाश्विन्यां निखनेच्चतुरंगुलं ॥ शत्रोर्गृहे निहंत्याशु कुटुंबंवैरिणांकुले ॥ २ ॥ * ॐ खुरखुरेस्वाहा ॥ २ ॥ सर्पास्थ्यंगुलमात्रेण आ

श्लेषायांरिपोर्गृहे ॥ निखनेत्सप्तधाजप्तं मारयेद्रिपुसंततिं ॥ ३ ॥ ॐ शोषणेस्वाहा । ३ । क
दंबकाष्ठकीलंतु नक्षत्रेश्रवणेपिच ॥ निखनेद्वैरिणांगेहे मारयेन्मंत्रयोगतः ॥ ४ ॥ ॐ जय
तिजयतिस्वाहा ४ भूतात्काकालयोग्राह्य स्तस्याग्नौदह्यतेचसः ॥ गुलिकेनतुतद्भस्मशत्रुमूर्ध्नि
विनिक्षिपेत् ॥ म्रियतेनात्रसंदेहो गृहेक्षिप्तेकुलक्षयः ॥ ५ ॥ ॐ नमोभगवतेरुद्राय मारय २
नमः ॥ ५ ॥ षड्बिंदुवृश्चिकौग्राह्यौ विषंतद्वानरीफलात् ॥ एतच्चूर्णंप्रदातव्यं शत्रुशय्या
सनादिषु ॥ ६ ॥ जायतेस्फोटकास्तीव्रा दशाहान्मरणंध्रुवं ॥ मातुलिंगस्यबीजानि कीटंष
ड्बिंदुसञ्ज्ञकं ॥ ७ ॥ कपिकच्छुकरोमाणि हिंगुबैभीतकंफलं ॥ एतानिसमचूर्णानि तथामंडलका
रिका ॥ ८ ॥ पूर्ववत्क्षिप्यतेरात्रौ मारणंभवतिध्रुवं ॥ तिलान्यलंसकुमुदं समांशंरक्तचंदनं
॥ ९ ॥ पिष्ट्वाकुक्कुटपित्तंच लेपनेनसुखावहं ॥ स्वर्णकेशंतुसंग्राह्य तदास्यशत्रुजंमलं ॥ १० ॥
क्षिप्त्वातद्रक्तसूत्रेण वेष्टयित्वापुनःपुनः ॥ भल्लातककरंडस्थं रुध्वातन्मारयेद्रिपुम् ॥ ११ ॥
प्रक्षालनाच्छनैर्गद्भि स्तज्जीवात्तस्यजीवनं ॥ स्नानंभूमूत्रभूमृद्वा सर्पवल्केविनिक्षिपेत् ॥ १२ ॥
वेष्टये कृष्णसूत्रेण मार्गमध्येअधोमुखं ॥ निखनेन्म्रियतेशत्रु स्तस्योच्चाटेसुखीभवेत् ॥ १३ ॥
गर्दभस्यास्थिचादाय शिरःकृष्णोरगस्यच ॥ निखनेद्गृहस्यतुद्वारे मारणोच्चाटनंभवेत् ॥ १४ ॥

ॐ नमोभगवतेउड्डामरेश्वरायअमुकंमारय २ उक्तयोगानामयमेवमंत्रः ।६। ग्राह्याकृष्णचतु
र्दश्यां शाखांभूततरुस्थितां ॥ मृतकस्य हृदिन्यस्य भूतकाष्ठैःशवंदहेत् ॥ १५ ॥ तच्छाखां
गारमादाय मत्रंशवपुटेलिखेत् ॥ भूतवृक्षोऽस्थितांगारं लिखेन्मंत्रंमृतोभवेत् ॥ १६ ॥ ॐ
नमोभगवतेउड्डामरेश्वरायअमुकंहर २ भक्ष कालरूपेणस्वाहा ॥७॥ वामदंतंकुलीरस्य अवो
भागस्थमाहरेत् ॥ शराग्रंतत्फलंकुर्या द्धनुश्चर्चितिजेंधनैः ॥ १७ ॥ गवांशिरोगुणंकृत्वा
शत्रुंकुर्यांच्चामृन्मयं ॥ तंहन्यात्तेनबाणेन म्रियतेतत्क्षणाद्रिपुः ॥ १८ ॥ * ॐ नमोभगवते
रुद्रायययमरूपिणेकालेसंशयावर्तेसंहारेशत्रुंअमुकंहन २ धुनु २ पाचय २ घातय २ हुंफट्ठः
ठः ।८। गोबालांगलिकामूलं कृकलासशिरस्तथा ॥ इंद्रगोपंचसशिखां अस्थिमूत्रंगजस्यच
॥ १९ ॥ हालाहलंन्नमूत्रेण समभागंसुपेषयेत् ॥ तस्यस्पर्शनमात्रेण स्फोटकैर्म्रियतेरिपुः
॥ २० ॥ ऊर्णनाभिंचषट्बिंदुं समांशंकृष्णवृश्चिकं ॥ यस्यांगेनिक्षिपेच्चूर्णं सप्ताहःस्फोटकै
र्मृतिः ॥ २१ ॥ मयूरपिच्छैर्नीलाब्जं पिष्ट्वालेपैःसुखावहं ॥ रिपुविष्ठांवृश्चिकंचखनित्वाभुवि
निक्षिपेत् ॥ २२ ॥ अच्छाद्यश्रावकेणाथ तत्पृष्ठेमृत्तिकांक्षिपेत् ॥ म्रियतेमलरोधेन उद्धृते
सौसुखीभवेत् ॥ २३ ॥ यांमृतांभरणीभांमे तद्भस्मादायरक्षयेत् ॥ रिपुविष्ठासमायुक्तं शरा

वंसंपुटोदरे ॥२४॥ मृतकेशैस्तदावेष्ठ्य शून्यागारेषुलंबयेत् ॥ यावच्छुष्यतिसाविष्ठा तावच्छ
त्रुर्मृतोभवेत् ॥२५॥ मुंडमादायगोर्नासांतद्वक्रेसर्षपान्क्षिपेत् ॥ मृदालिप्यचतद्वन्हौ गृहीत्वा
 सर्षपांस्तथा ॥ यस्यांगेप्रक्षिपेत्तंतु स्फोटकैर्म्रियतेरिपुः ॥२६॥ *ॐनमोभगवतेउड्डामरेश्वरायमा
रय २ अमुकंकालरूपिणेठः ९ उक्तयोगानामयंमंत्रः ॥ श्वेतापराजिकाकुष्टं लवंगमगरुंविषं ॥
शशवाराहमायूर गोधानांपित्तरक्तकं ॥ २७ ॥ महानिंबस्यपत्राणि समंसप्तदिनंहुनेत् ॥ मारये
दद्भुतंशत्रुं यदिसाक्षान्महासुरः ॥ २८ ॥ * ॐ नमोभगवतेउड्डामरेश्वरायशत्रुंगृण्ह २ स्वा
हा १० स्थानभ्रष्टस्यलिंगस्य मूर्ध्निमंत्रंसमालिखेत् ॥ सपुष्पछागरक्तेन चित्यंगारविषेणच
॥ २९ ॥ लिखित्वारोषचित्तेन तच्छेषैर्लेपयेत्करौ ॥ अश्वकूर्मासनेस्थित्वा ततोमंत्रमिमंजपेत्
॥ ३० ॥ ॐ नमोभगवतेअक्षकर्णेचतुर्भुजेउर्ध्वकेशे विकृताननेकालरात्रिमानुषाणांवसारु
धिरभोजने अमुकस्यप्राप्तकालस्यमृत्युप्रदेहुंफट्दहन २ दह २ मांसरुधिरंपिब पच २ हुंफट्
॥ ११ ॥ अमुंमंत्रंजपेद्रात्रौ रोषचित्तोरिपुंस्मरेत् ॥ अर्धरात्रेतुहस्ताभ्यां मार्जयेल्लिंगमस्तकं
॥ ३१ ॥ भ्रष्टेमंत्रेमस्तकस्थे तत्क्षणान्म्रियतेरिपुः ॥ दृष्टप्रत्ययएवायं सिद्धयोगउदाहृतः ॥
॥ ३२ ॥ रक्ताश्वमारजौबाण श्वानपृष्ठास्थिजंधनुः ॥ मृतकेशैर्गुणंकुर्या दुत्तरादक्षिणामुखं

॥ ३३ ॥ ठकारसदृशान्कुर्यात् सिंदूरैःसप्तमंडलान् ॥ कुक्कुटंशत्रुनाम्नातु सप्तमेमंडलेस्थितं ॥
॥ ३४ ॥ प्रत्येकंमंडलेपूज्यं धनुर्बाणंचमंत्रतः ॥ क्रमाच्चमंडलेप्राप्ते ततोहन्याच्चकुक्कुटं ॥ मंत्रे
णम्रियतेसोपि दूरस्थोपिरिपुःक्षणात् ॥ ३५ ॥ * ॐ हस्थखगमुकुखुकमलुगरुमुवालुंल
गगान् अवेतानिमारुह्यनानुसिंधुवीरुवायुनारसिंहवीरप्रचंडकांशक्तिलेलैजिसुलावोतिसुलेगुं
जिसुछोडावेतिसुछोडुं ॥ * ॐ नमोनारसिंहायकपिलजलायक्षमोघवासत्यगतायमहाउग्रच
द्ररूपाय ॐ ऱ्हींऱ्हींक्षां ॐ फट्स्वाहा १२ सहस्रंजपः ॥ करवीरपुष्पैर्दशांशहोमः सर्वकार्य
सिद्धिः ॥ १३ ॥ इतिश्रीसिद्धनागार्जुन विरचितेकक्षपुटेमारणंनाम दशमःपटलः ॥ १० ॥

॥ अथविद्वेषणं ॥ यःकाकोलूकपक्षांस्तु ययोर्नाम्नातुहोमयेत् ॥ उभयोर्नश्यातिप्रीतिः कुरु
पांडवयोरिव ॥ १ ॥ काकोलूकखरश्वानांचतुर्णांग्राहयेच्छिरः ॥ निखनेद्द्वारदेशेतु तद्गृहे
कलहःसदा ॥ २ ॥ ब्रह्मदंड्यास्तुमूलानि काकमस्तकमेवच ॥ जातीपुष्परसैर्भाव्यं

कक्ष सप्तरात्रंततःपुनः ॥ ३ ॥ विद्वेषकारकोधूपः शिखिपिच्छाहिकंचुकं ॥ मुखमार्जाररोमा पुटी.
णि विप्रस्यक्षपणस्यच ॥ ४ ॥ एषविद्वेषकोधूपः पत्युःपित्रोःसुतस्यच ॥ उलूकजिव्हामादा
३३ य रसैर्दार्व्यैस्तुभावयेत् ॥ ५ ॥ सोदराणामयंधूपो भवेद्विद्वेषकारकः ॥ अथःपुष्यीसोमवारे प. ११
सूत्रणावेष्टयमंत्रयेत् ॥ ६ ॥ भौमवारेसमुध्दृत्य पाटयेत्तांद्विधासमं ॥ यस्यानाम्नाक्षिपेन्नद्यां
सास्त्रीसत्यंपतिंत्यजेत् ॥ ७ ॥ काकोलूकस्यपक्षांस्तु मार्जारस्यनखानिच ॥ पादपांशुस्तयो
र्ग्राह्यं कटुतैलेनहोमयेत् ॥ ८ ॥ एकविंशद्दिनैस्तेषां विद्वेषोजायतंध्रुवं ॥ आर्द्रायांविप्रमार्जा
र मूषिकाक्षपणस्यच ॥ ९ ॥ केशरोमाणिसंगृह्य सम्यक्चूर्णंप्रकल्पयेत् ॥ तल्लिप्तदर्पणालो
का द्विद्विषंतिपरस्परं ॥ १० ॥ वंध्यवृक्षस्यशुष्कस्य काष्ठमेकंसमाहरेत् ॥ तद्भिद्यात्क्रकचने
व तच्चूर्णंचांतरिक्षतः ॥ ११ ॥ महिषीछागयोर्मेदो घृतदीपस्यकज्जलिः ॥ अंजिताक्षोनरः
पश्ये तेद्विषंतिपरस्परं ॥ १२ ॥ गृहीत्वातद्वयोर्मध्ये निक्षिपेद्वेषकृत्ततः ॥ चिल्हामार्जारवा
राह रोमाणिमूषकस्यच ॥ अनेनधूपमात्रेण विद्विषंतिपरस्परं ॥ १३ ॥ * ॐ नमोमहाक
पालिनि वृकोदरेदंडपाशधरे अमुकस्यअमुकेनसह विद्वेषंकुरु २ स्वाहा १ धत्तूरकरसैर्लिप्त्वा ३३
चितांगारंततोलिखेत् ॥ नाममंत्रयुतौयंत्रौस्थापयेतौपृथक्पृथक् ॥ १४ ॥ नद्यामुभयती

रस्थे निखनेद्वृक्षमूलके ॥ यन्नाम्नालिखितौयंत्रौ तयोर्द्वेषःप्रजायते ॥ १५ ॥ चतुर
स्रद्वयोर्मध्ये मंत्रगर्भितंनामलिखेत्सिद्धिर्भवति ॥ एकहस्तेकाकपक्ष मुलूकस्यापरेकरे ॥
॥ दर्भवद्धारयेद्यत्नात्त्रिसप्ताहंजलांजलीन् ॥ १६ ॥ नित्यंनद्यांप्रदातव्या अष्टोत्तरसहस्रकं
॥ परस्परंभवेद्द्वेषःसिद्धयोगउदाहृतः ॥ १७ ॥ ॐ आमोदाकिप्रमोदाकिगौरेअमुकस्य
अमुकेनसहकाकोलूकादिवत्कुरु २ स्फ्रींस्वाहा ॥ २ ॥ अथव्याधिजननं ॥ विषमु
ष्टचुद्भवैःकाष्ठैः करंडंकारयेद्बुधः ॥ पिचुमंदोद्भवैःकाष्ठैः पिधानंकारयेद्दृढं ॥ १८ ॥ तत्रमध्यं
क्षिपेद्भृंग मुत्तानंजीवितान्वितं ॥ वांतिमुच्छिष्टसिक्थंवा शत्रोस्तस्योदरेक्षिपेत् ॥ १९ ॥
कीलयेत्कंटकेनैव निखनेत्संपुटेक्षितौ ॥ व्याधिस्तत्रभवेच्छत्रोः पुनस्तत्क्षालनात्सुखी॥२०॥
भल्लातकरसोगुंजा ऊर्णनाभिस्तुचूर्णितं ॥ क्षिपेद्गात्रेभवेत्कुष्ठं सिताक्षीरंपिबेत्सुखी ॥ २१ ॥
वानरीफलरोमाणि विषभलातकंचुकं ॥ गुंजायुतंक्षिपेद्गात्रे स्याल्लूतावेदनान्विता ॥ २२ ॥
उशीरंचंदनंचैव प्रियंगुरक्तचंदनं ॥ तगरंपेषयेत्तोयेलेपाल्लूताविनाशयेत् ॥ २३ ॥ कृष्ण
सर्पशिरोग्राह्यं तद्वत्केसर्षपान्क्षिपेत् ॥ भल्लाततैलेनाषिक्तान् कृष्णसूत्रेणवेष्टयेत् ॥ २४ ॥
१२ वल्मीकमृत्तिकालिप्तं स्मशानेतुविपाचयेत् ॥ सुपक्कंसर्षपंग्राह्यं वानरीरोमसंयुतं ॥ २५ ॥

शरद्ग्रीष्मवसंतेषु गात्रेवामूर्ध्निनिक्षिपेत् ॥ प्रस्वेदाज्जायतेलूता शत्रूणांवेदनान्विता ॥२६॥
प्रियंगुशर्कराकुष्ठं रक्तपंकजकेसरैः ॥ गिरिकर्णिनिशानिंब मजाक्षीरेणलेपयेत् ॥ सप्ताहा
ज्जायतेस्वस्थः कृपाचेद्रक्षयेद्रिपून् ॥ २७ ॥ * ॐ नमोभगवतेउड्डामरेश्वरायभूवाहने
उन्मत्तस्वाहा ॥ ३ ॥ उक्तयोगानामयमेवमंत्रः ॥ बहुरूपधरोयस्तं संचूर्णंकृकलालसं ॥
रक्तसर्षपशालिंच निष्कैकंभोजनेक्षिपेत् ॥ २८ ॥ गलत्कुष्ठीभवेच्छत्रु र्नस्वस्थोजायतेक्वचि
त् ॥ कृकलासंग्रामचिल्लि शाकंरक्तंचसर्षपं ॥ २९ ॥ पिष्ट्वातद्भक्षणेदेय मंगस्फोटकरंरिपोः
॥ श्वेतापराजितागुंजा सुश्वेताचजयंतिका ॥ ३० ॥ पिष्ट्वातत्पानमात्रेण समंत्रेणनिवर्तते
॥ वालकंचंदनंद्वेच लेपोप्यत्रसुखावहः ॥ ३१ ॥ * ॐ नमोभगवतेउड्डामरेश्वरायकंपनेधू
ननेमुंच २ दुर्गंसः ॥ ४ ॥ कृकलासोद्भवंचर्म रिपुंमंत्रेणपूरयेत् ॥ मुखंबध्वाश्ववालेन भू
म्यांखन्यादधोमुखः ॥ ३२ ॥ मूत्ररोधोभवेत्तस्य उत्धृत्यक्षालनात्सुखं ॥ तांबूलेनैवयोगेन
तद्वत्स्यान्मुखरोगकृत् ॥ ३३ ॥ उलूकमस्तकंग्राह्यं लवणेनप्रपूरयेत् ॥ सप्ताहंताम्रपात्रस्थ
मक्षकांक्षंनचांजयेत् ॥ ३४ ॥ दृष्टिस्तंभकरंस्तत्स्या न्मरीचाक्षफलंवचा ॥ अंगुलंत्वनुराधायां
मंकुलीमूलमाहरेत् ॥ चक्षुरोगकरंगेहे निखनेद्वैरिणांध्रुवं ॥ ३५ ॥ * ॐ अंधेहरअंधेहर

स्वाहा ॥ ५ ॥ धत्तूरकाष्ठैर्दग्ध्वादौ भ्रमरंमधुपूरितं ॥ जलकुंभेक्षिपेत्तंतु तत्पानाद्बाधिरो
रिपुः ॥ ३६ ॥ जातीपुष्परसंपीत्वा स्वस्थोभवतितत्क्षणात् ॥ स्नुहिक्षीरंयवक्षार मुद्धृतं
पादपांशुकं ॥ सममेतत्प्रयोगेण शत्रुःखंजोभवत्यलं ॥३७॥ * ॐ नमोभगवतेउड्डामरेश्वरा
यखंजनेसंकोचनेठःठः ॥६॥ तंदुलींपिप्पलींशिग्रु मारनालेनपेषयेत् ॥३८॥ लेपेपानेखंजना
स्युः शत्रूणांनात्रसंशयः ॥ ३९ ॥ कृष्णसर्पस्यरक्तेन नीलमाक्षिकपोतविट् ॥ पिष्ट्वापिलेपये
द्यस्तु खंजोभवतितत्क्षणात् ॥ ४० ॥ तिलतैलेबलायुग्मं पिष्ट्वालिप्त्वासुखीभवेत् ॥ श्वेता
शीर्षशिलातालं रौद्रतैलेनपाचयेत् ॥ अभ्यंगेनांगसंकोचं स्वस्थस्तैलात्करंजजात् ॥ ४१ ॥
॥ * ॐ नमोभगवते चंद्रशेखरायउड्डामरेश्वरायबलमालिनेस्वाहा ॥ ७ ॥ रक्तेन
कृकलासस्यसर्पस्यहरितस्यच ॥ रंजितेलंघितेसूत्रे योषिद्रक्तंस्त्रवत्यलं ॥ ४२ ॥ उल्लंघनेपु
नःस्वस्था जायंतेवरयोषितः ॥ स्त्रीमूत्रभूमौसार्द्रायां निखनेत्कृष्णवृश्चिकं ॥ ४३ ॥ वरांगे
जायतेदुःखमुद्धृतेचपुनःसुखं ॥ जंबीरबुध्नंहस्तर्क्षे दत्तेस्त्रीदुर्भगाभवेत् ॥ ४४ ॥ * ॐ नमो
भगवतेउड्डामरेश्वरायअमुकींगृण्ह २ ठःठः ॥ ८ ॥ उक्तयोगानामयंमंत्रः ॥ भृंगीमूलंसमु
द्धृत्य कृष्णाष्टम्यांचचूर्णयेत् ॥ भक्ष्येपानेक्षिपेन्मूर्ध्नि ज्वरातिसारकृद्भवेत् ॥ ४५ ॥ वाजि

कक्ष कर्णीयमूलेन स्वास्थमुत्पद्यतेपुनः ॥ मुंडमांसमुलूकस्य समंचखरकाकयोः ॥ ४६ ॥ संग्रा पुटी.
ह्यदौसमुच्चार्य मुपवासीजपेन्मनुं ॥ ज्वरेणगृह्यतेशत्रु रहोरात्रंकृतेजपे ॥ ४७ ॥ शुचिर्भूत्वा
३५ समाविष्ठः संमुखंस्नानमाचरेत् ॥ आतुरश्चस्वर्यचैव देवाग्रेजायतेसुखी ॥ ४८ ॥ वल्गुलीव प. ११
दनेक्षिप्तं तांबूलंवैरिणांमुखात् ॥ दंतकाष्ठंचवातेषांगोनासावदनेक्षिपेत् ॥४९ ॥ आस्यरोगो
भवेत्तस्य दुष्टानांदंडईदृशः ॥ कृष्णसर्पमुखेन्यस्ता शत्रूणांमूत्रमृत्तिका ॥ ५० ॥ वेष्टयेत्कृ
ष्णसूत्रेण मूत्ररोगेणबाध्यते ॥ श्वेतस्यकरवीरस्य मूलंपुष्पंतुचूर्णयेत् ॥ ५१ ॥ विल्वम
ज्जायुतंभक्ष्ये दत्तंस्याच्छर्दिकृद्रिपोः ॥ करंडोकरकाष्टेन कर्तव्यःसपिधानकः ॥ ५२ ॥ पूरये
द्रिपुवक्रस्थ तांबूलंमुखरोगकृत् ॥ सर्वेषांमुखरोगाणा मुत्पद्यतेतुसुखावहं ॥ ५३ ॥ भावये
त्पूगखंडानि वज्रीक्षीरेणसप्तधा ॥ तांबूलैर्यस्यतद्दत्तं तस्योष्टेश्वेतकुष्ठकृत् ॥ ५४ ॥ तांबूले
इंद्रगोपंच दत्वास्येश्वेतकुष्ठकृत् ॥ प्रत्यायनयथापूर्वं भक्ष्यावासोमराजिका ॥ ५५ ॥ * ॐ
नमोभगवतेरुद्रायोड्डामरेश्वराय अमुकंरोगेणगृण्ह २ पच २ ताडय २ छेदय २ हुंफट्ठःठः
॥ ९ ॥ उक्तयोगानामयंमंत्रः ॥ अजागोघृतधूपेनसुखंसंजायतेध्रुवं ॥ ॥ धत्तूरबीजेंद्रयवं
पारावतमलंसमं ॥ ५६ ॥ ग्रहावेशकरोधूपो रामाणांनात्रसंशयः ॥ * ॐ गृण्ह २ वारा ३५

हेसुभगेठःठः ।१०। उक्तयोगानामयंमंत्रः ॥ लिखेन्नामांकितंमंत्रं स्मशानोद्धृतकर्पटे ॥ यस्यना
म्नाजपेन्मंत्रं पिशाचैर्गृह्यतेतुसः ॥ ५७ ॥ * ॐ नमोभगवतेसितरूपायसर्वभूताधिपतये
पिशाचायनित्यक्रूरायदंष्ट्रिनेकरालिनेनिग्रहाद्युच्चाटनविनाशकर अमुकंहन २ दह २ गृण्हा
पयहुंफट्ठःठः ॥ ११ ॥ त्रिरात्रोपोषितोभूत्वा रात्रौकृष्णचतुर्दशीं ॥ धूपंदत्वामहेशस्य अष्टो
त्तरसहस्रकं ॥ ५८ ॥ पूर्वोक्तेनैवमंत्रेण ततःस्वस्थोभवेद्ध्रुवं ॥ सामुद्रंलवणंवन्हि केवलंवा
समुद्रकं ॥ ५९ ॥ वल्गुन्याउदरेन्यस्तं सर्वमंत्रपुटेदहेत् ॥ खानेपानेर्पयेद्यस्य तस्यचक्षुः
प्रशाम्यति ॥ ६० ॥ अथोन्मत्तीकरणं ॥ तालंधत्तूरबीजंच घुणचूर्णंतुभक्षयेत् ॥ ६१ ॥ दत्तं
मत्तोभवेच्छत्रुः सिताक्षीरात्पुनःसुखी ॥ तालकंलशुनंधूर्तंमूर्ध्नि क्षिप्तंपिशाचकृत् ॥ ६२ ॥ सुरा
मांसंशिताक्षीरैर्भक्ष्यपानात्पुनःसुखी ॥ तिलतैलाज्यमधुना लिप्त्वामत्स्यंप्रदीपयेत् ॥ ६३ ॥
तत्कज्जलंसुरापाने योज्यमुन्मत्तकारकं ॥ मध्वाज्याभ्यांस्वर्णमक्षीक्षिप्त्वातत्कृतकज्जलं ६४
दत्तंयस्यसुरापाने उन्मत्तोसौप्रजायते ॥ सैंधवंगोघृतंतुल्यं वाराहस्यतुपित्तकं ॥ ६५ ॥
अजाक्षीरेणतद्योज्यं पानोन्मत्तविनाशकृत् ॥ मयूरपारावतकुक्कुटानां ग्राह्यंपूरीषंकरकंचरक्तं
॥ ६६ ॥ तन्मूर्ध्निदत्तंकुरुतेपिशाचं निवर्ततेमुंडिकमस्तकेतु ॥ गुडंकरंजबीजंच घुणचूर्णं

समंशतं ॥ ६७ ॥ फलकास्येप्रदातव्य मुन्मत्तोभक्षणाद्भवेत् ॥ शर्कराशतपुष्पाज्य क्षीरपा
नेसुखावहं ॥ ६८ ॥ * ॐ उन्मत्तकारिणिदिष्ठेठःठः ॥ उक्तयोगानामयंमंत्रः ॥१२॥ इति
श्रीसिद्धनागार्जुनविरचिते कक्षपुटेएकादशःपटलः ॥ ११ ॥ ॥ ॥ ॥

॥ कृष्णजीरकचूर्णेन अंजितोश्वोनपश्यति ॥ तक्रेणक्षालयेच्चक्षुः स्वस्थोभवतिघोटकः ॥१॥
घ्राणेछुछुंदरीचूर्णे दत्तेपततिघोटकः ॥ स्वस्थश्चंदनपानेन नस्याद्वाथनसंशयः ॥ २ ॥ अ
श्वास्थिकीलमश्विन्यां कुर्यात्सप्तांगुलंततः ॥ निखनेदश्वशालायां मारयत्येवघोटकं ॥ ३ ॥
* ॐ पच २ स्वाहा ॥१॥ उक्तयोगेष्वयंमंत्रः ॥ पुनर्वसौवाक्षकीलं निखनेत्सप्तमंत्रितं ॥ ग
वांस्थानेनसंदेहो दुग्धनाशकरंपरं ॥ ४ ॥ मंत्रितंशततारायां वराहस्थ्नाचकीलकं ॥ पंचां
गुलंतन्निखने द्गेहेहंतिचतुष्पदः ॥५॥ ॐ नमोभगवतेरुद्रायपच २ स्वाहा॥२॥भौमेसक्रांत्ति
केग्राह्यं श्वमलंचित्तिभस्मच ॥ आग्नेय्यांदिशितंदद्या न्निखनेच्छत्रुवेश्मनि ॥ ६ ॥ गृहपातो

भवेत्याशु ग्राहयेच्चाग्नेयींदिशं ॥ कृत्तिकायांकदंबस्य कीलमंकुलसंभवं ॥ मंत्रितंनिखनेद्गेहे
तद्गृहंदह्यतेक्षणात् ॥ ७॥ * ॐ नमोभगवतेरुद्रायगृहंदह २ स्वाहा ॥ ३ ॥ आश्लेषायांतुस
र्पास्थि कीलकंचांगुलोन्मितं ॥ मंत्रितंनिखनेद्यत्र गृहसर्पाभवंतिहि ॥ ८ ॥ * ॐ धनधन
स्वाहा ॥४॥ अश्वस्थवृक्षमारुह्य पूर्वसेवायुतंजपेत् ॥ करवीरकपुष्पैश्च दशांशंहोममाच
रेत् ॥ ९ ॥ तद्धोमभस्मयद्गेहे क्षिप्तंतन्नश्यतिध्रुवं ॥ पण्यागारेक्षिपेद्यस्य पण्यराशिर्वि
नश्यति ॥ १० ॥ * ॐ नमोभगवतेरुद्रायोड्डामरेश्वरायनमः ॥ कालायशंखपालाय चंडवे
गिनेदह २ हुंफट्स्वाहा ॥ ५ ॥ निंबात्काकालयोग्राह्य श्चित्यग्नौदह्यतेतुसः ॥ शत्रोर्गृहोप
रिन्यस्त स्तद्भस्मकुलिकोदये ॥ गृहपातोभवेत्याशु शिरस्युच्चाटकोभवेत् ॥ ११ ॥ ॐ नमो
विद्वेषणे २ अमुकंविद्वेषय २ उच्छेदय २ अतीवीर्येउन्मादयतुस्वाहा ॥ ६ ॥ भरण्यां
सप्तमंत्रेण चितिकाष्ठस्यकीलकं ॥ अष्टांगुलंतुनिखने न्मद्यशालांविनश्यति ॥ १२ ॥
* ॐ नमोभगवतेरुद्रायस्वाहा ॥ ७ ॥ पुनर्वसौचित्रकाष्ठ कीलकंद्व्यंगुलंखनेत् ॥ सप्ताभि
मंत्रितेक्षेत्रेतस्य सस्यंविनश्यति ॥ १३ ॥ * ॐ लोहितमुखेस्वाहा ॥ ८ ॥ पूर्वाफाल्गुनि
१३ नक्षत्रे जातीकाष्ठस्यकीलकं ॥ अष्टांगुलप्रमाणंतु निखनेद्राजकेगृहे ॥ शताभिमंत्रितंयेन

तस्यवस्त्राणिनाशयेत् ॥ १४ ॥ ॐ कुरुस्वाहा ॥ ग्राह्यमुत्तरफाल्गुन्यां बदरीकाष्ठलीलकं ॥
अष्टांगुलंतुनिखने न्नाशयेज्जीवरेगृहे ।१५। ॐ ज्वरस्वाहा (ॐ जुरेस्वाहा) ९ हस्तर्क्षेत्र्यंगु
लंकीलं करवीरककाष्ठजं ॥ निखनेत्कुंभकारस्य शालायांभांडनाशकृत् ॥ १६ ॥ गोक्षुरंमेषशृं
गंच बीजंवाकोकिलाक्षजं ॥ सूकरस्यमलंवाथ मूलंवाश्वेतगुंजजं ॥ १७ ॥ पाकस्थानेतुभां
डानां क्षिप्त्वास्फोटयतेध्रुवं ॥ तालंकरंजबीजंवा टंकणेननवांकनं ॥ कृत्वाभाडंस्फुटत्येव
उक्तानांमंत्रउच्यते ॥ १८ ॥ ॐ मदनमदनस्वाहा ॥१०॥ मधूककाष्ठकीलंतु चित्रायांचतु
रंगुलं ॥ निखनेत्तैलशालायां तैलंतत्रविनश्यति ॥ १९ ॥ कोकिलाक्षस्यबीजानितैलयं
त्रस्यमध्यतः ॥ निक्षिपेत्तैलद्रव्येवा तैलंतत्रननिःसरेत् ॥ २० ॥ * ॐ दहदहस्वाहा ॥ ११
रजकस्थानमृद्ग्राह्या वज्राकारंतुकारयेत् ॥ पण्यागारेथवाक्षेत्रे क्षिप्तंतत्रविनाशयेत् ॥ २१ ॥
ॐ नमोभगवतेवज्रिणेपातयवज्रंसुरपतिराज्ञापयतिह्रुंफट्स्वाहा ।१२। यत्रेंद्रचापउत्तिष्ठे त्तद्व
ल्मीकस्यमृत्तिकां ॥ आदायकारयेद्वज्रं षट्कोणंदृढमद्भुतं ॥ २२ ॥ क्षेत्रमध्येक्षिपेत्प्रातः सस्य
नाशोभवेद्ध्रुवं ॥ सुराभांडेविनिक्षिप्तं तद्भाडंचविनश्यति ॥ २३ ॥ * ॐ नमोभगवतेवज्र
किरणेवज्रंपातय २ एह्येहिभगवन्सुरपतिराज्ञापयतिस्वाहा ॥१३॥ गंधकंचूर्णितंक्षेप्यं जल

कुंभ्यांतुतेनवै ॥ नश्यंतेसर्वशाकानि सेकादुपवनानिच ॥ २४ ॥ वालुकाःश्वेतसिद्धार्था न्त्र
क्षिपेत्क्षेत्रमध्यतः ॥ शलभाःसारसाःकीटा वराहमृगमूषिकाः ॥ शशकास्तत्रनोयांति मंत्र
विद्याप्रभावतः ॥ २५ ॥ * ॐ नमःसुरेहोवलजलजःपरिपरिशिलिशिलिस्वाहा ॥१४॥ॐ
सुरासुरांनमकृत्य इमांविद्यांप्रयोजयेत् ॥ विद्यांप्रयोजकार्येयं विद्यामेसिध्यतेशिवा ।२६।
॥ जंबूकानांमूषकाणां मृगाणांवृकाणांशशकानामन्येषांप्राणिनां दृष्टिबंधंकरोम्यहं ॥
आर्द्रपापेकृतघ्नस्य तेनपापेनलिप्यते ॥ २७ ॥ * ॐ यदिमंत्रोनव्यतिक्रममेतिस्वाहा
॥ १५ ॥ एतन्मंत्रद्वयेनवालूकाभिसहश्वेतसर्षपान्सप्तवार मभिमंत्र्यक्षेत्रमध्येनिक्षिपेत्
सर्वोपद्रवाःनश्यंति ॥ ॥ मूषजंबूककीटानां कुरुतेतुंडबंधनं ॥ विद्यामंगलनाथस्य मंत्रो
वाभैरवस्यच ॥ २८ ॥ * ॐ नमोमंगलनाथायतद्यथांहर २ शिलिसर्वेषांत्वंप्राणिनांतुंडं
बंधंकुरु २ जंबकमूषककीटपतंगादिप्राणिनांतुडंबंधंकुरु २ हुंफट्स्वाहा ॥१६॥ ॐ उज्जनी
नगरभैरवऊंबोलंमहादेवउहराडाफलुभोएहनुमंतुसाक्षीअस्तिअस्तु ॥ अनेनमंत्रेणसप्ताभि
मंत्रितंवाटिकामध्ये निक्षिप्यपुष्पफलंसमस्तं निरुपद्रवंभवति ॥ १७ ॥ अथषंढीकरणं॥
नरोमूत्रयतेयत्र तत्रकृष्णंतुवृश्चिकं ॥ निखनेज्जायतेषंढो ह्युवृतेत्तुपुनःसुखी ॥२९ ॥ अजा

 मूत्रेणसंभाव्य निशाषड्बिंदुचूर्णकं ॥ पानाशनंप्रयोगेण षंढत्वंजायतेनृणां ॥३०॥ तिलगो
क्षुरयोश्चूर्णं छागीदुग्धेनपाचितं ॥ शीतलंमधुनायुक्तं पिबेत्पंढत्वसिद्धये ॥ ३१ ॥ जलूका
 दग्धचर्णंतु नवनीतेनभक्षितं ॥ यावज्जीवंनसंदेहो यूनांपंढत्वकारकं ॥ ३२ ॥ धत्तूरपुष्पभ
क्ष्येण पुनःसंपद्यतेसुखं ॥ अमायांतुरवौग्राह्यं करंजस्यतुमूलकं ॥ ३३ ॥ सगुडंभक्षयेत्सद्यः
षंढत्वंजायतेनृणां ॥ षण्णांवृषाणांसंग्राह्य मंतरिक्षेणगोमयं ॥ ३४ ॥ साध्यस्यप्रातिमांतन
कृत्वांडंतस्यबंधयेत् ॥ तत्क्षणाज्जायतेषंढो मंत्रेणानेननिश्चितं ॥ ३५ ॥ * ॐ नमोभगव
तेउड्डामरेश्वरायकामप्रचंडवाहनवैनतेयमुखेनषंढयपंढयस्वाहा ।१८। अयंमंत्रःसर्वपंढी कर
णेषुप्रयोज्यः ॥ ॥ नक्षत्रेत्वनुराधायां लांगुलीमूलमुद्धरेत् ॥ निशिमूत्रस्थलेपुं
सोनिखनेत्षंढतांव्रजेत् १९ समुत्धृत्यपुनःस्वास्थ्यं पूर्वमंत्रेणयोजयेत् ॥ ३६ ॥ अथभगबं
धनं ॥ ॥ स्वदाररक्षणार्थं भगवान्विश्वामित्रेणकृतं ॥ तद्यथा ॥ पूर्वोक्तलांगलीमूलं
वामपादस्यपांशुकं ॥ साध्यास्याग्राहयेद्धीमान् द्वयेनशुक्तिसंपुटे ॥ ३७ ॥ लेपयेद्भगबंधःस्या
त् तक्रैःक्षाल्यंविमुक्तये ॥ स्मशानचैलमादाय वामपादस्यपांशुकं ॥ संध्यायायांबंधयेत्तेन
पोटलीभगबंधनी ॥ ३८ ॥ अमुकींभगबंधामिविस्फुरंध्रशोणितं ॥ मयाकृतभगबंधस्य

नास्तितस्याचिकित्सकः ॥ ३९ ॥ यतिर्वापतिपुत्रोवा येचान्येभगमर्दकाः ॥ सर्वैतेविमुखा यांतिवर्जयेत्कामुकैस्तथा ॥ ४० ॥ * ॐ चिंढचिढिस्वाचिढिस्वाचिढिठःठः ॥ २० ॥ उक्त योगानामयमेवमंत्रः ॥ तच्चैलंचंदनंक्षीरैः क्षाल्यंमद्योभवेद्भगः ॥ यंत्रमंत्रादितंत्रेण यत्किं चिच्छत्रुणाकृतं ॥ ततस्यैवभवेद्येन ससिद्धोमंत्रउच्यते ॥ ४१ ॥ सप्ताभिमंत्रितंतोयं शुद्धंप्रा तःपिबेन्नरः ॥ तस्यशत्रुकृतोदोषः शत्रोरेवभविष्यति ॥ ४२ ॥ * ॐ वज्रमुष्ठिवज्रकपाटव ज्रबंधोदशमेद्वारुवज्रपाणिवियोचांगेडायिनिडाकिनितुच्छवपुःसंगेमंत्रजपौशत्रुभवौडाकिनि डाकिनीवावजारेजीवुभातेकरेतिचणकर पाणिकरेरेमूआकरे ॥ २१ ॥ पन्नेकरेहासेकरे कीटणीपत्तलीअली ॥ पोखुंचरीकरेएतेविज्ञान महुनिलगेगजेमुहिकरे ॥ वाहुडीतिरके ।मस्तकूवटेहुंमेसिद्धिं गुरुपाउश्रीमहादेवकीआज्ञा ॥ २२ ॥ * ॐ रक्तजटरक्तजयपाट नहुनसिखीरक्तधारणअष्टमानुचारुसिद्धखंडंतीश्रीगोरखु ॥ हरायादेवअन्नअथ अहथविज्ञा नीविज्ञान करेपातिविज्ञानकरे ॥ एतेविज्ञानमुखीनलगे गजेमुहिकरबाहुडि तिसएकमस्तके कुयाडेहमैसिद्धगुरु ॥ पाऊश्रीगोरक्षकीआज्ञा ॥ २३ ॥ हलहळपाणीमल हलयसे चतुर्दशभुवनेभेदुविनः ॥ शेहुंहुंफट्सोविद्वषानसुडेकिनिमंत्राविनष्टाआदि त्यकेरीमंडमरी

तुवरवरुसारु ॥ हेबंधौबंधौदशमद्वारु विरुपाक्षकियासारि बंधौएकरमैकीनहिवैसानुहु
सित्थेविरूपाक्षिकीआज्ञा ॥ ॥ रक्तजटारक्तपुटारक्तपुरसोरु उल्लंतुतीहेदुवाहो
वोडकं ॥ तिजेमुहिकरतिबहुडितिस्के मस्तकुमंडतिहुमेसिद्धवादकी आज्ञापुरम
सिद्धगुरुअपि ॥ ॥ * ॐ रक्तजटरक्तपुटरक्तहेरुनविदुपूर्वहोतीचिडिआयुः ॥ मुखबोलि
चेसुनहिजोमुजेकरे वोदुतिस्केउल्लटवेदहुंस्मीदेवकीआज्ञा ॥ २४ ॥ * ॐ वसुमातेअधिले
अमावास्यामंगळवारेजाईलेहो ॥ ॥ चापोउपकुचापौआपाहरवति सघटीकोणीकरेमे
दुःख तूरसेरमैरखतेमैसिद्ध वसुमतीपावुआज्ञा ॥ २५ ॥ * ॐ पाऊरखेपाइलकी देवी
जंचारखेमहेश्वरीहृदय रखेकालिकायाजोगिनी जतुरखेचामुंडेब्रह्मविष्णुमहेश्वर ॥ २६ ॥
तिलिमिलिदितिन्नापटी तीणिभुवमखयुग ॥ युतवनच्छुटेगुरूश्रीभैरैकीआज्ञा ॥ २७ ॥ इ
तिशिखाबंधनमंत्राः ॥ एतेष्वेकैकमंत्रेण प्रातःशुद्धंजलंपिबेत् ॥ कुयंत्रंनश्यतिक्षिप्रं म्रियमा
णोपिजीवति ॥ ४३ ॥ ॥ अथग्रहक्लेशनिवारणं ॥ तक्रपिष्टेनतालेन लिंपेत्पुत्तलिकांकृतां
॥ तामादायगृहाद्यांति मक्षिकानात्रसंशयः ॥ ४४ ॥ गुडार्कदुग्धकुलमाष तिलचूर्णसमान्वि
तं ॥ अर्कपत्रेषुविन्यस्तं मूषिकंहरतंगृहात् ॥ ४५ ॥ धत्तूरबीजचूर्णंतु विषंवापेषितंतिलैः ॥

तैरवविषपाषाणं मीनतैलेनपेषितं ॥ ४६ ॥ वटिकास्थापयेद्गेहे जलंरात्रौनिरुंधयेत् ॥ भक्ष
णेनक्षयंयांति तृषार्तामूषकाध्रुवं ॥ ४७ ॥ ॥ तालकछागविण्मूत्रं पलांडुसहपेषितं ॥ आ
लिप्यमूषकंतेन सजीवंतं विसर्जयेत् ॥ ४८ ॥ ॥ तद्दृष्ट्वैवगृहंत्यक्त्वा सद्योनियांतिमूषकाः ॥
गंधकंहरितालंच ब्राह्मीत्रिकटुकैःसह ॥ ॥ रवौनृमूत्रेतत्पिष्ट्वा लिप्तेमूषेतुपूर्ववत् ॥ ४९ ॥
मार्जारस्यमलंतालं पिष्ट्वामूषकमालिपेत् ॥ तमादायगृहंत्यक्त्वा सद्योनियांतिमूषकाः ॥
॥ ५० ॥ मघायांबुध्नकंक्षेत्र स्थापयेन्मधुकोद्भवं ॥ पक्षिणांमूषकाणांच जायतेतुंडबंधनं ॥
॥ ५१ ॥ मूषकाकर्षकंदीपं सांबरीगुडतैलतः ॥ कुलीरवयसाचूर्णं कृतंतस्यैवकर्परे ॥ ५२ ॥
दीपोमत्कुणसंघातं रात्रावाकर्षयेद्ध्रुवं ॥ स्थलकुंभीजटांबध्वा शयनाद्यांतिमत्कुणाः ॥ ५३ ॥
रोहीसतृणपुष्पाणि वर्तिमध्येनिवेशयेत् ॥ तद्दीपदर्शनादेव क्षिप्रंनश्यंतिमत्कुणाः ॥ ५४ ॥
अर्कतूलमयावर्तिं भावयेद्यावनेनच ॥ दीप्तांतत्कटुतैलेन निःशेषायांतिमत्कुणाः ॥ ५५ ॥
अर्जुनस्यफलंपुष्पं लाक्षाश्रीवासगुग्गुलुं ॥ श्वेतापराजितामूलं भल्लातकविडंगकं ॥ ५६ ॥
धूपःसर्जरसोपेतः प्रदेयोगृहमध्यतः ॥ सर्पाश्चमत्कुणामूषाः गंधाद्यांतिदिशोदश ॥ ५७ ॥
गुडश्रीवासभल्लात विडंगत्रिफलायुतं ॥ लाक्षारसोर्कपुष्पंच धूपोमशकमत्कुणान् ॥ ५८ ॥

नाशयेन्नात्रसंदेहः सर्पमूषकवृश्चिकान् ॥ मुस्तासिद्धार्थभल्लात कपिकच्छुफलंगुडं ॥ ५९ ॥
चूर्णभानुफलोपेतं दहेत्सर्जरसान्वितं ॥ मत्कुणामूषकाःसर्पा मूषावावीयकीटकाः ॥ ६० ॥
पलायंतेगृहंत्यक्त्वा यथायुध्येषुकातराः ॥ राजवृक्षफलंबध्वा खट्वायांमत्कुणापहं ॥ ६१ ॥
लाक्षासर्जरसोशीर सर्षपापत्रकंपुरं ॥ भल्लातकाविडंगानि रेणुकांपुष्करंतथा ॥ ६२ ॥ अर्जु
नस्यचपुष्पाणि समंचूर्णप्रधूपयेत् ॥ सर्पकीटकपुष्पाणि पलायंतेनसंशयः ॥ ६३ ॥ बर्बुरो
मशकान्हंति धूपाद्वागृहधारणात् ॥ सर्पकीटकभूतानि पलायंतेनसंशयः ॥ ६४ ॥ इतिश्री
सिद्धनागार्जुनविरचितेकक्षपुटेउन्मत्तीकरणादिद्वादशःपटलः ॥ १२ ॥ ॥ ॥

॥ अथकौतुकं ॥ ॥ नासारंध्रद्वयंलिप्त्वा गोघृतेनततोमुखे ॥ क्षिपेद्दिंवीफलंयश्च कुयोगै
र्नसबाध्यते ॥ १ ॥ तगरांजितनेत्रेवा तगरेणाथधूपितः ॥ पूर्वरक्षाविधिंकृत्वा पश्चात्कौतु
कमाचरेत् ॥ २ ॥ विनारक्षांविधानेन यःकरोतिससीदति ॥ स्मशानतरुमूलेन कीटोत्पा

तांगुलीयकं ॥ ३ ॥ मृतनिर्माल्यसंयुक्तं रक्तसूत्रेणवेष्टयेत् ॥ तेननिःशेषलोकस्य जायतेदृष्टि
बंधनं ॥ ४ ॥ घुणतालकपंचांगं कनकेनयुताथवा ॥ मुद्रिकासर्वलोकस्य पाणिस्थांदृष्टिबंध
कृत् ॥ ५ ॥ स्वपादेधारयेदेतान्पश्चात्सिध्यातिकौतुकं ॥ भौमेपुष्येतुसंग्राह्यं कृकलासंम
नोहरं ॥ ६ ॥ स्थापयेन्नवभांडेतु रक्तपुष्पैश्चपूजयेत् ॥ धूपदीपाक्षतैर्गंधै नैवेद्यैर्मंत्रसंयुतैः ॥
॥ ७ ॥ वामहस्तकनिष्ठायाः स्वस्यरक्तेनसेचयेत् ॥ सप्ताहंपूजयेद्देवं शस्तंस्यात्सर्वकर्मसु ॥
॥ ८ ॥ * ॐ ऱ्हीं ऱ्हीं ऱ्हीं स्वाहा १ अनेनमंत्रेणपूजाकाले शतमष्टोत्तरंजपेत् ॥ तेनसर्व
सिद्धिकरंभवति ॥ तंमृतंछाययाशुष्कं चूर्णयित्वाकटिंलिपेत् सवस्त्रमपितंलोकानग्न मालो
कयंतिहि ॥ ९ ॥ वलयीकृत्यतच्चूर्णं कूर्परेमणिबंधके ॥ काकवद्दृश्यतेलोकै स्तत्क्षणान्नात्र
संशयः ॥ १० ॥ तच्चूर्णंतालपत्रेतु लेपितंसर्पवद्भवेत् ॥ मयूरंतुशिलातालं भोजयेद्दिनसप्त
कं ॥ ११ ॥ तद्विष्ठालिप्तहस्तस्थं दृश्यंशक्रोपिनेक्षते ॥ नागवल्लीदलैर्लिप्तं भूमौक्षिप्तंसमुत्प
तेत् ॥ १२ ॥ तच्चूर्णंकौमुदंकंदं नागवल्लीदलान्वितं ॥ पेषयित्वालिपेद्भांडे तद्भांडेनविशेज्ज
लं ॥ १३ ॥ सप्ताहंतिलतैलेन भावयेदातपेखरे ॥ अंकोलबीजचूर्णंतु शोष्यपेष्यपुनःपुनः ॥
॥ १४ ॥ तत्तैलंग्राहयेद्यत्नात् तैलकारस्ययंत्रतः ॥ अथवाकांस्यपात्रेद्वेतेनकल्केनलेपयेत् ॥

कक्ष ॥ १५ ॥ उत्थाप्यस्थापयेद्धर्मे संमुखंतुपरस्परं ॥ तयोरधःकांस्यपात्रे पतितंतैलमाहरेत्
॥ १६ ॥ इदमेवांकुलंतैलं सर्वयोगेषुयोजयेत् ॥ लिप्तमंकुलतैलेन मुंडितंतत्क्षणाच्छिरः ॥ पुटी.
४१ ॥ १७ ॥ पूर्ववत्पूर्यतेकेशैः सद्यएवनसंशयः ॥ तत्तैललिप्तमाम्राडरोपितंभुवितत्क्षणात् ॥ प.१३
॥ १८ ॥ सफलोजायतेवृक्ष स्तत्क्षणान्नात्रसंशयः ॥ पद्मिनीबीजचूर्णंतु भाव्यमंकुलतैलतः
॥ १९ ॥ जलेन्यस्तंमहाश्चर्यं तत्क्षणात्कमलोद्भवं ॥ बीजंनीलोत्पलोद्भूतं लिप्तमंकुलतैलतः
॥ २० ॥ न्यस्तंजलेमहाश्चर्यं जायतेपुष्पसंभवः ॥ यानिकानिचबीजानि जलजस्थलजा
निच ॥ २१ ॥ अंकुलीतैललिप्तानि क्षणात्तान्युद्भवंतिवै ॥ यस्यकस्यापिबीजस्य पिष्टंतत्तै
ललेपितं ॥ २२ ॥ बडिशस्थजलेक्षिप्तं संजीवंस्यात्समुधृतं ॥ यत्किंचित्धातुमूलोत्थं पत्रपु
ष्पफलादिकं ॥ २३ ॥ अंकुलीतैललिप्तं तदन्यंरूपंभवेद्ध्रुवं ॥ छत्राकमंकुलीतैलं स्नुक्पत्रश
शजंमलं ॥ २४ ॥ तालकंकाष्ठविस्फोटं शिखिपित्तेनसंयुतं ॥ रवौकन्यकयापिष्टं छायाशु
ष्कंवटीकृत्तं ॥ २५ ॥ तयाकुमुदनालस्य स्पर्शात्सर्पाकृतिर्भवेत् ॥ दृस्यंतेरक्तगुंजाश्च श्वेतास्त
ल्लेपनाद्ध्रुवं ॥ २६ ॥ वटिकास्पर्शमात्रेण मृत्तिकाकोद्रवायते ॥ ताम्रभांडानिसर्वाणि तया
लिप्तानिहेमवत् ॥ २७ ॥ दृश्यंतेतप्ततोयेन क्षालितानितुताम्रवत् ॥ अपूपवद्ब्रह्मपत्रं कपि

स्थंलड्डुवत्फलं ॥ २८ ॥ नृमुंडवन्नारिकेलं आश्चर्यंदृश्यतेजनैः ॥ अक्षपत्रंतयालिप्तं दृश्यते
कांस्यभाजनं ॥ २९ ॥ स्नुहिपत्रंतयालिप्तं शुकवद्दृश्यतेजनैः ॥ तयालिप्तेनृकर्णेतु दृश्यतेच्छि
न्नशीर्षवत् ॥ ३० ॥ रवींदुग्रहणंभाति तयालिप्तेतुदर्पणे ॥ अंगुलीचतयालिप्ता द्विधासंदृ
श्यतेध्रुवं ॥ ३१ ॥ भांडपाकस्थलातेस्म कुंभकारस्थलाद्भवेत् ॥ तद्भस्मगुटिकासार्धं मुष्टिबंधं
भुविक्षिपेत् ॥ समुद्रोदृश्यतेलोकैः सत्यंचित्रंशिवोदितं ॥ ३२ ॥ आश्चर्यगुटिका ॥ स्नुक्षीरं
कौतुकंबीजं चूर्णंरक्तंभवेद्युतं ॥ वस्त्रेणवेष्टितंधारा क्षुरस्येवातिरंहसा ।३३। छिद्यतेकेशसंघा
तं नवस्त्रमतिकौतुकं ॥ गुंजाफलंशुकंपित्तं लेपयेत्काष्टपादुकां ॥ ३४ ॥ विनाबंधंनरोगच्छे
त् क्रोशमेकंनसंशयः ॥ लघुदारमयंपीठं गुंजापिष्टेनलेपयेत् ॥ ३५ ॥ शुष्कमेवजलैःसार्धं
मुपविष्ठंनमुंचति ॥ गुंजाबीजंत्वचोन्मुक्तं चूर्णभाव्यंनृमूत्रके ॥ ३६ ॥ सप्तवारंततःकांस्ये
लिप्तमंकुलवद्भवेत ॥ तैलमादायतल्लिप्तं पूर्ववत्पादुकागतिः ॥ ३७ ॥ कोरंटकस्यबीजानि
निंबर्निर्यासससंयुतं ॥ पिष्ट्वाप्रलेपयेत्पादौ पूर्ववत्पादुकागतिः ॥ ३८ ॥ वज्रोक्षीरेणसंभिन्ना
तैलाद्र्रावर्तिकाजले ॥ ज्वालितादीपवत्तिष्टे द्यावद्वर्तिनसंशयः ॥ ३९ ॥ स्त्रीजरायुप्रधूपेन
भित्तिचित्रंप्ररोदति ॥ गुग्गूलेनपुनःस्वास्थ मित्याश्चर्यपरंपरा ॥ ४० ॥ सिक्थकंकज्जलं

 लाक्षा एभिःपुत्तलिकाकृता ॥ स्त्रीजरायुप्रधूपेन रोदतीतिमहाद्भुतं ॥ ४१ ॥ शिलातालक
सिंदूररोचनांजनहिंगुलं ॥ कूर्मभुक्तमिदंपश्चात् तद्विष्ठांलेपयेत्करे ॥ ४२ ॥ तदानृत्यान्निव
 र्तंते दर्शनान्मुष्टिबंधनात् ॥ नवकूर्मंतुसप्ताहं तालकंभोजयेच्छुभं ॥ ४३ ॥ तन्मलैर्लेपयेत्पा
णिं मुष्टिबंधान्नटांतरे ॥ निवर्त्तंतेनटाःसर्वे सभानृत्यतिकौतुकं ॥ ४४ ॥ उलूकस्यकपालेन
घृतेनात्हृतकज्जले ॥ तेननेत्रांजितेचित्रं रात्रौपठतिपुस्तकं ॥ ४५ ॥ उलूकत्हृदयंपित्तं काक
पित्तंचशोणितं ॥ एतद्वर्त्यांजनेरात्रौ विचरेद्दिवसेयथा ॥ ४६ ॥ रजनीचरजीवानां विषर
क्ताक्षिकूर्णकं ॥ अंजिताक्षोनरस्तेन कृष्णरात्रौतुपश्यति ॥ ४७ ॥ करस्थान्येववस्तूनि
यथासूर्योदयेतथा ॥ शिखिपारावतध्वांक्ष खंजरीटपुरीषजा ॥ ४८ ॥ गुटिकास्पर्शमात्रे
ण तालयंत्रंभवत्यलं ॥ सतूलात्रिशिरापृष्ठे शरावेणनिरोधयेत् ॥ ४९ ॥ गोमयेरोधयेत्सिद्धं
क्षणार्धेनततःपुनः ॥ उत्तिष्ठतिशिलाश्चर्यं समाकृष्टेशरावके ॥ ५० ॥ भलूकव्याघ्रमहिष
चाषगृध्रविलोचनैः ॥ स्त्रोतोंजनयुतंचाज्यं दिवावत्पश्यतेनिशि ॥ ५१ ॥ * ॐ नमोभगव
तेरुद्रायज्योतिषांशिवापतयेदातव्यस्यतेबीजंमेदेहिस्वाहा ॥ २ ॥ अनेनमंत्रेणसर्वाण्यं ४२
जनानिशिवाग्रेदापयेत् ॥ पाठामूलंगलेबध्वा क्षीरभांडस्यतद्दधि ॥ जायतेतत्क्षणादेव

सत्यमेतन्नसंशयः ॥ ५२ ॥ गंधकोत्थेनधूपेन पुष्पाणामन्यवर्णता ॥ कृष्णश्वानंमृतंरक्षे
द्याव कृमिकुलाकुलं ॥ ५३ ॥ श्वेतस्योपोषितस्यैव कुक्कुटस्यतुतान्कृमीन् ॥ यथेष्टंभक्षणेद
द्या द्दिष्टांतस्यसमाहरेत् ॥ ५४ ॥ तयाललाटेतिलकं कृत्वान्नंवीक्ष्यतेतुयत् ॥ तदन्नंकृमिव
ल्लोके भक्षमाणैर्विलोक्यते ॥ ५५ ॥ पलायंतेचतंदृष्ट्वा मूर्च्छंतिचपतंतिच ॥ कटुतुंब्युत्थतैलेन
पारावतचटोद्भवं ॥५६॥ मलंचांशिखिमूलंचपेषितंगर्दभास्थिच ॥ ललाटेतिलकंतेन कृत्वासौ
दृश्यतेजनैः ॥ ५७ ॥ दशास्योनात्रसंदेहो यथालंकेश्वरोनृपः ॥ शिग्रुबीजोत्थितंतैलं पारा
वतपुरीषकं ॥ ५८ ॥ वराहस्यवसायुक्तं शिखिमूलंसमंसमं ॥ ललाटेतिलकंतेनयः करोति
सर्वेजनः ॥ ५९ ॥ पंचास्योदृश्यतेलोके यथासाक्षात्सदाशिवः ॥ सद्योहतस्यवीरस्य ग्राह्यं
चोरस्यवाशिरः ॥ ६० ॥ तद्वक्त्रेकृष्णधत्तूरबीजंवाप्यसमृत्तिकं ॥ रात्रौकृष्णचतुर्दश्या मा
षाढभैरवंयजेत् ॥ ६१ ॥ नानाबल्युपहारेण पुष्पधूपाक्षतादिभिः ॥ शिरःखनेत्कृष्णभूमौ
भुक्तोच्छिष्टेनसेचयेत् ॥ ६२ ॥ दीपंरात्रौसदादद्या द्रक्तवर्त्याज्यसंयुतं ॥ सफलंतुभवेद्याव
तावद्रक्षेच्चपूजयेत् ॥ ६३ ॥ ग्राह्यंकृष्णचतुर्दश्यां बलिंदद्याच्चकुक्कुटं ॥ पंचांगंपेषयेत्सार्धं व
१० टिकांकारयेद्दृढां ॥ ६४ ॥ ललाटेतिलकंकुर्या त्सनरोदृश्यतेजनैः ॥ तादृक्शतसहस्रैस्तु रू

पैनैंवात्रसंशयः ॥ ६५ ॥ रात्रौकृष्णचतुर्दश्यां मयूरास्येविनिक्षिपेत् ॥ भृंगीबीजंमृदंकृष्णां
कृष्णभूमौनिवापयेत् ॥ ६६ ॥ तज्जातभृंगीसंग्राह्या तयाकुर्याच्चरज्जुकां ॥ तद्बद्धकर्णःपुरुषो
मयूरोदृश्यतेजनैः ॥ ६७ ॥ सद्योगेकृष्णमार्जार मुखेचैरंडबीजकं ॥ तज्जातैरंडबीजाना
मर्कवस्त्रेनिधापयेत् ॥ ६८ ॥ तंप्रपश्यंतिमार्जारं मनुष्यानात्रसंशयः ॥ शृगालश्वानमेषा
जवदनेवापयेत्पृथक् ॥ ६९ ॥ मयूरास्येयथाभृंगी जातासिद्धिश्चतादृशी ॥ मृतायाश्वपची
नारी तस्यायोनौतुखादिरं ॥ ७० ॥ कीलकंनिखनेत्पश्चाद्द ग्ध्वायातंसमुद्धरेत् ॥ तेनैवतिल
कंकृत्वा श्वपचीरूपधृग्भवेत् ॥७१॥ रक्तगुंजाफलावाप्य स्त्रीकपालेचसेचयेत् ॥ जातंफलंक्षिपे
द्वक्त्रे स्त्रीरूपोदृश्यतेनरः ॥ ७२ ॥ विषमुष्ट्युत्थिततैलसर्पपित्तंचरोचना ॥ सकुष्टंतिलकंयस्य
तं पश्यंतिमयूरवत् ॥ ७३ ॥ विषमुष्ट्युत्थतैलेन पाणिलेपेनकुंजरः ॥ भल्लूकपादलेपेन जि
व्हालेपेनचंद्रमाः ॥ ७४ ॥ गणेशःकुक्षिलेपेन स्त्रीवत्सर्वांगलेपतः ॥ कपोतोमुखलेपनदृश्य
ते नात्रसंशयः ॥ ७५ ॥ रात्रावंकुलतैलेनलिप्तांगोदृश्यतेनरः ॥ दीर्घदंष्ट्रोर्ध्वरोमाचरूपंरौ
द्रंवहेन्नरः ॥ ७६ ॥ नवभांडविनिक्षिप्याछिन्ननासांतुमूषिकां ॥ सनासंकृकलासंच पृथग्भां
डेविनिक्षिपेत् ॥ ७७ ॥ उपवासत्रयेजाते तयोर्दद्याच्चभोजनं ॥ मलंतयोःपृथकगृह्य तेनना

सांप्रलेपयेत् ॥ ७८ ॥ छिन्ननासांसदृश्येतु क्षौरैर्लैपान्निवर्तते ॥ पयस्विनीमृतंबालं गृही
त्वातस्यचोदरे ॥ ७९ ॥ हरिद्रांखंडशःकृत्वा क्षिपेद्यावत्प्रपूरयेत् ॥ तंरात्रौनिखनेद्भूमौमंत्रे
णानेनपूजयेत् ॥ पंचाहांतेसमुधृत्यरजनींशोष्यपेपयेत् ॥ ८० ॥ * ॐ अक ॐ रः ॥ अ
नेनमंत्रेणबालादि सर्वयोगांतंकुर्यात्कर्माणि ॥ ८१ ॥ श्वेतदूर्वारनालैश्च हरिद्रांतांप्रलेपयेत्
ग्रं ॥ तंलिप्तांदेहःपुरुषः पंचधादृश्यतेजनैः ॥ ८२ ॥ तांनिशांसर्पपांन्श्वेतान् पिष्ट्वाचांकोलतैल
तः ॥ तल्लिप्तांगंनरंसर्वे चित्रंपश्यंतिसप्तधा ॥ ८३ ॥ गोमूत्रेणपुनःस्नाना देकएवप्रदृश्यते
॥ अलक्तंतांनिशांपीष्टा देहसंधिंप्रलेपयेत् ॥ ८४ ॥ भिन्नःसंदृश्यतेतस्या पूर्वस्नानान्निवर्त
ते ॥ हरिद्रांकोलतैलाभ्यां लिप्तांगोदृश्यतेनरः ॥ ८५ ॥ राक्षसोतिमहारौद्रो ह्यस्यस्ना
नान्निवर्तते ॥ नरादिसर्वजीवानां ग्राह्यंसद्योहतंशिरः ॥ ८६ ॥ तस्यकृष्णचतुर्दश्यां शण
बीजान्वितंवपेत् ॥ भृंगीधत्तूरवातारि गुंजाभिश्चैवसंयुतं ॥ निखनेत्कृष्णभूम्यांतु बलिपूजा
समन्वितः ॥ सेचयेत्फलपर्यंतं तत्तद्वीजानिचाहरेत् ॥ ८७ ॥ तत्तद्वीजेगतेवक्रे तत्तद्रूपाभ
वत्यलं ॥ इत्येवंकौतुकंलोके नानारूपस्यदर्शनं ॥ ८८ ॥ मुक्तबीजोभवेत्स्वस्थोनात्र कार्या
विचारणा ॥ कृकलासस्यरक्तेन अर्धंलिप्तंतुदर्पणं ॥ ८९ ॥ संस्थापयेद्गिरेर्मूर्ध्नि ग्रहणंदृश्यते

जनैः ॥ भौमवारेमृतायास्तु तच्चितांगारमाहरेत् ॥ ९० ॥ मुष्टिद्वयेनतद्बध्वा निमज्यजलम
ध्यतः ॥ उर्ध्वौदक्षिणबाहुस्थां द्यथातोयैर्नसच्यते ॥ ९१ ॥ तच्छुष्कंचापरंसिक्तं पृथग्रक्षे
त्प्रयत्नतः ॥ शुष्कांगारकृतारेखा क्षीरभांडस्यपूर्वतः ॥ ९२ ॥ चित्रंशुष्यतितत्क्षिप्र मार्द्रां
गारेणत पुनः ॥ अग्रतोरेखयापूर्णं भवत्येवातिकौतुकं ॥ ९३ ॥ चौरस्यनासिकादंत चूर्णं
पाणौप्रलेपयेत् ॥ तस्यस्पर्शात्स्फुटंत्येव नारिकेलानिनिश्चितं ॥ ९४ ॥ भल्लूकास्थिभवैस्तै
लै सर्वान्संधींन्प्रलेपयेत् ॥ संधौसंधौनारिकेलं धारयेद्यस्तुकौतुकं ॥ ९५ ॥ स्फुटंतिपीडना
देव नारिकेलानिकौतुकं ॥ तथैवांकुलतैलेन स्फुटंत्येवनसंशयः ॥ ९६ ॥ कृष्णसर्पस्यवौग्राह्यं
तद्वक्त्रेकृष्णमृत्तिकां ॥ क्षिप्त्वाथवापयेत्तत्र कामधत्तूरबीजकं ॥ ९७ ॥ तथामत्स्यमुखेमृच्च त
द्बीजंचप्रवापयेत् ॥ पृथक्पृथकाक्षिपेद्भूमौ तयोःशाखांसमाहरेत् ॥ ९८ ॥ सर्पस्यशाखयाम
त्स्य स्पर्शेसर्पोभवत्यलं ॥ मत्स्यस्यशाखयास्पर्शे पुनर्मत्स्याभवंतिवै ॥ ९९ ॥ सफलेचणक
क्षेत्रे धौतवस्त्रंविलोलयेत् ॥ प्रातःप्रातःप्रयत्नेन दिनानामेकविंशतिः ॥ १०० ॥ ततस्तद्वस्त्र
खंडंतु जलैःसिक्तंनिपीडयेत् ॥ मृत्तिकायांततोधान्यं वापयेत्तत्प्ररोहति ॥ १ ॥ तद्वस्त्राच्छा
दितेशीघ्रं सर्वधान्यानिकौतुकं ॥ निक्षिपेत्सर्वधान्यानि सार्द्रेगर्दभचर्मणि ॥ २ ॥ सिच्या

त्कुक्कुटरक्तेन त्रिसप्ताहंतनित्यशः ॥ जातांकुराणिसंरक्षे न्निर्वापिजायतेक्षणात् ॥ ३ ॥ तद्धा
न्यंफलपर्यंतं लोकेभवतिकौतुकं ॥ स्नुह्यश्वत्थवटानांच क्षीरमौदुंबरस्यच ॥ ४ ॥ काकोदुंब
रिकाक्षीरंलोह चूर्णंचगंधकं ॥ इष्टिकांवैसर्जरसं तिलतैलंचसिक्थकं ॥ ५ ॥ क्रमोत्तरगुणंमर्द
कुर्यात्तेनकुठारकं ॥ च्छुरिकफलकुंतंच वज्रंनाराचईरितं ॥ ६ ॥ कुठारेणाश्मवृक्षादि स्फो
टयेच्छेदयेदपि ॥ भेदयेत्कुंतकांडाभ्यां यत्किंचित्खेटकादिकं ॥ ७ ॥ भिद्यतेनात्रसंदेहो
सिग्धकाग्रेश्वकौतुकं ॥ हरितालंशिलाचूर्णं कंगुणीतैलभावितं ॥ ८ ॥ तल्लिप्तवस्त्रशिरसि
स्थितंपश्यतिवन्हिवत् ॥ सिंदूरंगंधकंतालं समंपिष्ट्वामनःशिलां ॥ ९ ॥ तल्लिप्तवस्त्रछन्नांगो
रात्रौसंदृश्यतेग्निवत् ॥ दूरस्थितस्यलोकस्य जायतेकौतुकंमहत् ॥ १० ॥ खद्योतालातचूर्णंन
ललाटेतिलकेकृते ॥ रात्रौसंदृश्यतेज्योतिस्तस्मिन्स्थानेतुकौतुकं ॥ ११ ॥ त्र्यूषणंचर्वयेदादौ
तत्कल्कंनरमूत्रकं ॥ एकीकृत्यलिपेच्छीर्षं वर्तितत्रैवधारयेत् ॥ १२ ॥ ज्वलितोनदहत्येव केश
मात्रंनसंशयः ॥ वदनेकृष्णसर्पस्य यवबीजानिवापयेत्॥ १३ ॥ फलितेतानिबीजानि समा
दायसुरक्षयेत् ॥ क्षिपेत्सर्पकरंडेतु तदेकंनास्त्यसौफणिः ॥ १४ ॥ मुक्तेसौदृश्यतेसर्प इतिचि
त्रंमहाद्भुतं ॥ पाषाणभेदमूलेतु चर्वितेसतिभक्षयेत् ॥ १५ ॥ पाषाणान्बदरांडा भांश्चणका

निवकौतुकं ॥ तुंबिनीफलपृष्ठेतु छिद्रंकृत्वातुपारदं ॥ १६ ॥ निक्षिपेन्निष्कमात्रंतु वर्तिंगंधक
पूरितां ॥ ज्वलंतींनिक्षिपेच्छिद्रे रुध्धतुंबीखमुत्पतेत् ॥ १७॥ अस्पष्टपुरुषायास्तु नार्याःप्रथ
मजंरजः ॥ वस्त्रेणग्राहयित्वातु ततोगच्छेन्नदीतटं ॥ १८ ॥ मत्स्यग्राहीयदापक्षी मत्स्यमा
दातुमुद्यतः ॥ तदाभूमौतुतद्वस्त्रं रुंधयेत्सचरुध्यति ॥ १९ ॥ तत्पक्षिणंसमत्स्यंतु गृहीत्वाचू
र्णयेत्पृथक् ॥ पक्षिचूर्णेनसंस्पृष्टंवस्तुं यद्वाखमुत्पतेत् ॥ २० ॥ मत्स्यंदृष्ट्वासमायाति कर्म
ध्येतुकौतुकं ॥ ऋतौस्त्रीयोनिमध्यस्थंसौवीरंदिनसप्तकं ॥ २१ ॥ तंहुत्वापावकेचित्रं आर्द्रएव
प्रदृश्यते ॥ मातुलिंगस्यबीजानि पुष्पेसौवीरमंजनं ॥ २२ ॥ एकीकृत्यैवजुहुया द्वात्रींकाष्ठा
न्वितेनले ॥ विषंसितासमायुक्तं भुक्ताभेकोमृगोभवेत् ॥ २३ ॥ तच्चूर्णंजुहुयादग्नौ लकुलीशः
प्रदृश्यते ॥ सदृश्यतेरुद्रगणो लंबमानेसितेपुटे ॥ २४ ॥ मुनिपुष्परसै पुष्पेघृष्ट्वाश्रे।तांजनं
ततः ॥ अंजिताक्षोनरःपश्ये न्मध्यान्हेतारकागणं ॥ २५॥ मातुलिंगस्यबीजोत्थं तैलंताम्रस्य
भाजने ॥ स्थापयेदातपेपश्ये न्मध्यान्हेसरथंरविं ॥२६॥ अक्षपत्ररसैःसिध्धं गुंजामूलंजनां
तिके ॥ अंजिताक्षोनरःपश्येत पिशाचानतिकौतुकं ॥ २७॥ अगारंशिखिपित्तेन पिष्ट्वाचाग्र
दलेलिखेत् ॥ पावकंतन्मुखेधृत्वा बहिर्ज्वालासुदृश्यते ॥ २८॥ धत्तूरतैलसंयुक्ता विषचूर्णेनलो

लिता ॥ वर्तिःसाज्वालितालोके पुष्पवद्दृश्यतेध्रुवं ॥ २९ ॥ रात्रौविहंगपुच्छेतु निधायाशिखिम
लिकां॥ ३०॥ उल्कामिवप्रपश्यंती संचरंतीनभस्थले॥ ग्राह्यंगवयविष्ठाया गोलकंकामिनारतौ
॥ ३१ ॥ स्थापयेच्छयनस्याधो बद्धलिंगंभवेद्ध्रुवं ॥ मुक्तेतस्मिन्भवेन्मुक्ति श्चित्रंहास्यमिहा
द्भुतं ॥ ३२ ॥ ग्राह्याणिचशुनोर्यत्ना द्रोमाणिरतिबद्धयोः ॥ स्थापयेच्छयनस्याधः पूर्ववद्दृ
श्यतेफलं ॥ ३३ ॥ भल्लातकभवंतैलं मृतमत्स्येषुलेपयेत् ॥ तेजीवंतिजलेक्षिप्ताः सद्यःसद्यो
हताइव ॥ ३४ ॥ मंडूकस्यवसांदीप्ता मरण्येज्वालयेन्निशि ॥ चतुर्दिक्षुचतन्मध्येसागरो दृ
श्यतेजनैः ॥ ३५ ॥ लघुखर्जूरखद्योत भूलताश्वेतमभ्रकं ॥ पेषयेच्छिखिपित्तंच मुष्ट्याबध्वा
तुतन्निशि ॥ ३६ ॥ गृहोपरिविनिक्षिप्तं दृश्यतेज्वलदग्निवत् ॥ धारिकाबीजपिष्टेन पिंडंकृ
त्वाप्रयत्नतः ॥ ३७ ॥ बहुकालंप्रदीपस्तु प्रज्वलेदतिकौतुकं ॥ स्मशानादग्निमादाय चतुरं
गारसंमितं ॥ ३८ ॥ शर्कराच्चचरुस्तस्मा द्गोनासावसयालिपेत् ॥ नीलगव्येविनिक्षिप्तं का
ष्ठमध्येविनिक्षिपेत् ॥ ३९ ॥ आदित्यरश्मिसंपर्कात् ज्वलत्येवनसंशयः ॥ तत्काष्ठकौतुकंलो
के जायतेशिवभाषितं ॥ ४० ॥ उन्मत्तस्यचकाष्ठानि कोद्रवस्यतृणानिच ॥ संदह्यबंधयेद्व
स्त्रे तप्तकुंडेविनिक्षिपेत् ॥ ४१ ॥ अग्निःप्रज्वलतेनित्यं काष्ठेक्षिप्तेनसंशयः ॥ श्वेतगुंजारसै

कक्ष श्वाहो सितसूत्रंविभावयेत् ॥ ४२ ॥ तत्सूत्रंवर्तिकादीपं प्रज्वाल्यग्राह्यकज्जलं ॥ तेनांजितो पुटी.
नरश्श्वित्रं दिवापश्यतितारकां ॥ ४३ ॥ रक्तार्जुनस्यमूलेन तिलकेजलघर्षिते ॥ कृतेत्वयुतह
४६ स्तोसौ दृश्यतेराक्षसाकृतिः ॥ ४४ ॥ कृकलासस्यसंग्राह्यं पुच्छंदक्षिणपार्श्वतः ॥ त्रिलोकवे प. १३
ष्टितंवक्त्रे धृतेचानंतरूपधृक् ॥ ४५ ॥ *ॐ संकोचय २ स्वाहा ॥ ४ ॥ अनेनमंत्रेणअष्टोत्तरस
हस्रजप्तेसिद्धिः ॥ सिंदूरवर्णभूनागवर्तिदीपस्यतेजसा ॥ यद्वस्तेदृश्यतेचित्रं वस्तुतःस्वर्णवद्भ
वेत् ॥ ४६ ॥ कार्पासबीजंसर्पस्य वक्त्रेक्षिप्त्वाखनेद्भुवि ॥ तज्जातवर्त्तिकादीपः सर्पतैलेनदी
पीतः ॥ ४७ ॥ गृहेपश्यतियद्रात्रौ तत्तत्सर्पोपमंभवेत् ॥ एरंडतैलजंदीपं शमीपुष्पं
हिकंचुकं ॥ ४८ ॥ सकार्पासंभवेद्वर्ति श्वित्रंपश्यतिपूर्ववत् ॥ श्वेतार्कतूलजावर्तिः सर्पतैलयु
तानिशि ॥ ४९ ॥ प्रज्वाल्यसर्पवत्सर्वं गृहंपश्यतिकौतुकं ॥ मंडूकवसयादीपे सर्वंप
श्यतिसर्पवत् ॥ ५० ॥ वश्यस्थानेतुवाप्रोक्ता इंद्रवारुणिकावटी ॥ तयातुतिलकंकृत्वा दृष्टे
न्नेकटुताभवेत् ॥ ५१ ॥ हस्तार्केसिंधुवारस्य मूलंचोदग्गतंहरेत् ॥ स्पर्शनेबंधविच्छेदं कु
रुतेशीघ्रमद्भुतं ॥ ५२ ॥ मांसंरक्तोत्पलंतुल्यं कृकलासंतुभोजयेत् ॥ तन्मलैर्गुटिकास्पर्शा ४६
त्तालयंत्रंभिनत्यलं ॥ ५३ ॥ सुपक्वामिष्टिकांकृष्णां वर्ज्ञींप्राहुस्तयोगतः ॥ सूक्ष्मचूर्णंतुतांकृ

त्वा लोहकीटमथापिवा ॥ ५४ ॥ सूत्रैरज्जुंदृढांकृत्वा तिलतैलेनलेपितां ॥ तच्चूर्णलोलितांकृ
त्वा मघालोहंभिनातित्यलं ॥ ५५ ॥ द्विहस्तलोहनाराच यंत्रान्महिषशृंगजान् ॥ प्रवेशये
न्महींचित्र मुल्धर्तुकेननोबलं ॥ ५६ ॥ अदृश्यकरणप्रकरणे यः कृष्णशुनकःकथ्यतेतस्यात्रप्र
योगःकथ्यते ॥ तन्मासंसाधितंग्राह्यं तन्मंत्रेणाभिमंत्रितं ॥ भूदारवटपुष्पैस्तु वेष्टयित्वास्थि
तंकरे ॥ ५७ ॥ स्पृष्टमात्रेमहाश्चर्यं तालयंत्रंभिनत्यलं ॥ तन्मांसंवटपत्रेण वेष्टितंहस्तमध्य
गं ॥ ५८ ॥ ब्रह्मांडेपिस्थितःपक्षी दृश्यतेपतातिध्रुवं ॥ तन्मांसंराजवृक्षस्य पुष्पस्थंहस्तकंय
दि ॥ ५९ ॥ तदावृक्षान्वनगतान् चित्रंपश्यतिमानवः ॥ तन्मांसंहस्तमध्यस्थं जनानांजा
यतेरणं ॥ ६० ॥ शिरीषपुष्पैस्तन्मांसं वेष्टितंहस्तधारितं ॥ स्पृष्टमात्रेततोयाति नारिणाम
तिकौतुकं ॥ ६१ ॥ कच्छपस्यशिरोग्राह्यं लज्जारीमिंद्रगोपकं ॥ काकजंघातमात्कीटं त
थाशतपदीक्रमी ॥ ६२ ॥ पंचभिर्वटिकाकार्या नामिकामध्यपर्वगा ॥ तद्दर्शनात्स्तनंहंति
स्पृष्टंवाथमहाद्भुतं ॥ ६३ ॥ कनिष्ठानामिकामध्ये दर्शादायातितत्पुनः ॥ तयागुटिकयालेपा
ल्लिंगसंकोचनंभवेत् ॥ ६४ ॥ निर्लिंगोदृश्यतेमर्त्यः क्षालितेनपुनर्भवेत् ॥ मातृवाहकृमेश्चूर्णं
कूर्माहीतैलपाचितं ॥ ६५ ॥ तेनालिप्तस्तनोगच्छेत् तत्क्षणाद्दारयोषितां ॥ मर्कटस्य

दश ॥ ९ ॥ पायसंहोमयेत्पश्चा त्सहस्रैकेनासिद्धति ॥ नित्यंलोकसहस्रस्य भोजनंसाप्र
यच्छति ॥ लक्षायुर्दिव्यवर्षाणां दत्तेसाशंकरोदितं ॥ १० ॥ * ॐ जलपाणीपीज्वल
पीज्वलहुंब्लूं ॥ ६ ॥ भक्षमुत्पलशाखोत्थं हुत्वामंत्रमिमंजपेत् ॥ लक्षैकादशमावर्त्य हुत्वाम
ध्येशशिग्रहे ॥ ११ ॥ अथवामालतीपुष्पैर्हुत्वाभानुसहस्रकं ॥ भानुर्मुक्तोभवेद्यावत् पूर्णां
तेसिध्यतिध्रुवं ॥ सहस्रायुस्तथादत्ते सहस्राणांचभोजनं ॥ १२ ॥ * ॐ प्रभूतेसुलोचनेब्लूं
ब्लूं ।७। शंखलिप्तपटेदेवीं गौरवर्णांधृतोत्पलां ॥ सर्वालंकारिणींदिव्यां समालिख्यार्चयेत्ततः
॥ १३ ॥ जातीपुष्पैःसोपचारैः सहस्रैकंततोजपेत् ॥ त्रिसंध्यंसप्तरात्रंतुततोरात्रौशुचिर्ज
पेत् ॥ १४ ॥ अर्धरात्रेगतेदेवी समागत्यप्रयच्छति ॥ पंचविंशतिदीनारान् प्रत्यहंपरितो
षिता ॥ १५ ॥ * ॐ ह्रींरतिप्रियेस्वाहा ॥ ८ ॥ एकविंशद्दिनंयावदुदयास्तमयंजपेत्
॥ नित्यंसायंस्वमाहारपिंडंहर्म्योपरिक्षिपेत् ॥ १६ ॥ त्रिसप्ताहेनसातुष्टा शय्यांगत्वापि
शाचिका ॥ पंचविंशतिदीनारान् ददातिप्रतिवासरं ॥ १७ ॥ कर्णेकथयतिक्षिप्रं यद्यत्पृच्छ
तिसौक्रमात् ॥ * ॐ वःवःकेबलिकेगृण्हपिंडंपिशाचिकेस्वाहा ॥ ९ ॥ गृहेवारण्यएकांते ल
क्षमेकंजपेन्मनुं ॥ पुष्पंधूपंचरुंपूजां नित्यंकुर्यात्प्रयत्नतः ॥ १८ ॥ पंचामृतैर्दशांशेन हुनेद्दे

वीप्रयच्छति ॥ दीनाराणांसहस्रैकं प्रत्यहंतोषितासती ॥ १९ ॥ * ॐ गुलुगुलुवसुमतिप्र
वजानिहुलुहुलुचंद्रेचंद्रगिरेस्वाहा ॥ ६ ॥ एकलिंगेमहादेवं त्रिसंध्यंपूजयेत्सदा ॥ धूपंदत्वाज
पेन्मंत्री ब्रूतेसात्वंकिमिच्छसि ॥ २० ॥ देविदारिद्र्यदग्धोहं तन्मेनाशकरीभव ॥ ततोददाति
सातुष्टा वित्तायुश्चिरजीवितं ॥ २१ ॥ * ॐ ह्रीं आगच्छआगच्छसुरसुंदरिस्वाहा ॥७॥ कुंकु
मेनसमालिख्य भूमिदेशेसुलक्षणं ॥ प्रतिपत्तिथिमारभ्य पूजांकृत्वाजपेत्ततः ॥ २२ ॥ त्रिसं
ध्यांत्रिसहस्रंतु मासांतेपूजयेन्निशि ॥ संजपन्नर्धरात्रेतु समागत्यप्रयच्छति ॥ दीनाराणांस
हस्रैकं प्रत्यहंपरितोषिता ॥ २३ ॥ ॐ अनुरागिणिमैथुनिप्रियेस्वाहा ॥ नदीतीरेशुभेदेशे चं
दनेनसुमंडलं ॥ विधायपूजयेद्देवीं ततोमंत्रायुतंजपेत् ॥ २४ ॥ त्रिसप्ताहंजपेद्देवं प्रसन्ना
वितरेत्सदा ॥ दीनाराणांसहस्रैकं व्ययंकुर्याद्दिनेदिने ॥ विनाव्ययेनसाक्रुद्धा नददातिकदा
चन ॥ २५ ॥ ॐ ह्रीं सर्वकामदेमनोहरेस्वाहा ॥ ८ ॥ मंत्रायुतंजपेन्मंत्री प्रातःसूर्योदये
सति ॥ मासमेकंजपेदेवं पूजांकुर्याद्दिनेदिने ॥ २६ ॥ शंखलिप्तपटेसातु शुभ्रपुष्पैःसपाय
सैः ॥ दशांशंहोमयेत्साज्यै रिंधनैःकरवीरजैः ॥ ददातिशंखिनीतुष्टा नित्यंरूपकपंचकं ॥२७
* ॐ शंखधारिणिशंखाभरणेह्रींह्रींक्लींक्लींश्रींश्रींस्वाहा ॥ ९ ॥ सहस्राष्टमिमंमंत्रं जपेत्सप्तादि

४०००००

नावधि ॥ प्रत्यहंमणिभद्राख्यः प्रयच्छत्येवरूपकं ॥ २८ ॥ ❋ ॐ नमोमणिभद्रायनमःपूर्णभ
द्रायनमोमहायक्षसेनाधिपतयेमोटमोटधनदायस्वाहा ॥ १० ॥ चतुर्लक्षमिमंमंत्रं जपेत्त्यागी
प्रसीदति ॥ ददातिचिंतितानर्थां स्त्यागभोगायमंत्रिणः ॥ २९ ॥ ❋ ॐ अहोत्यागीमहा
त्यागार्थंदेहिमेवित्तंवीरसेवितंस्वाहा ।११। रात्रौरात्रौजपेन्मंत्रं सागरस्यतटेशुचिः ॥ लक्षजापे
कृतेसिद्धो दत्तेसागरचेटकः ॥ रत्नत्रयंतदामूल्यं यस्मिन्मंत्रीसुखीभवेत् ॥ ३० ॥ ❋ ॐ न
मोभगवतेरुद्रायदेहिरत्नानिजलराशेस्त्रीँर्नमोस्तुतेस्वाहा १२ एकासनेशुचौदेशेत्रिसंध्यंत्रिसह
स्रकं ॥ मासमेकंजपेन्मंत्री ततःपूजांसमाचरेत् ॥ ३१ ॥ पुष्पधूपादिनैवेद्यैः प्रदीपैर्घृतपूरितैः
॥ रात्रावभ्यर्चयेत्सम्यक् सुस्थिरःसुप्रसन्नधीः ॥ ३२ ॥ अर्धरात्रगतेदेवी समागत्यप्रयच्छ
ति ॥ रसंरसायनंदिव्यं वस्त्रालंकारभूषणं ॥ ३३ ॥ ❋ ॐ ह्रीं आगच्छ २ स्वामीश्वरी
स्वाहा ॥ १३ ॥ त्रिपथस्थोवटाधस्थो रात्रौमंत्रंजपेत्सदा ॥ लक्षत्रयंततःशीघ्रं सिद्धास्या
द्वटयक्षिणी ॥ ३४ ॥ वस्त्रालंकरणंदिव्यं रससिद्धिंरसायनं ॥ दिव्यांजनंचसातुष्टा साधका
यप्रयच्छति ॥३५॥ ❋ ॐ श्रींवटवासिनियक्षकुलप्रसूतेवटयक्षिणिएह्येहिस्वाहा १४ वटवृक्षं
समारुह्य लक्षमेकंजपेन्मनुं ॥ ततःसप्ताभिमंत्रेण कांजिकैःक्षालयेन्मुखं ॥ ३६ ॥ यामद्वयं

१००००० २००००० ३००००० १००००००

जपेद्रात्रौ वरंयच्छतियाक्षिणी ॥ रसंरसायनंदिव्यं क्षुद्रकर्माद्यनेकधा ॥ सिद्धानिसर्वकार्याणि नान्यथाशंकरोदितं ॥ ३७ ॥ * ॐ नमश्चंद्रस्त्रावेकर्णेकर्णकारणेस्वाहा ॥ १५ ॥ * ॐ नमोभगवतेरुद्रायचंडयोगिनेौस्वाहा ॥१६॥ मंत्रद्वयस्यैकैकैवसिद्धिः ॥ चिंचावृक्षतलेमंत्रं लक्षमावर्तयेच्छुचिः ॥ विशालावितरेत्तुष्टा रसंदिव्यंरसायनं ॥ ३८॥ ॐ ऐंविशालेशैंद्रांद्रूक्लींएह्येहिस्वाहा ॥ १७ ॥ नरास्थिनिर्मितांमुद्रां गलेपाणौचकर्णयोः ॥ धारयेज्जपमालांतु ताहशीतुस्मशानतः ॥ ३९ ॥ लक्षमेकंजपेन्मंत्रं साधकोनिर्भयःसुधीः ॥ ततोमहाभयात्सिद्धा ददात्येवरसायनं ॥४०॥ तेनभक्षितमात्रेण पर्वतानपिचालयेत् ॥ वलीपलितनिर्मुक्त श्चिरंजीवीभवेन्नरः ॥ ४१ ॥ ॐ ह्रींमहाभयेक्लैंहंसःस्वाहा ॥ १८ ॥ शुक्लपक्षेजपेत्तावद्यावद्दृश्येतचंद्रमाः प्रतिपत्पूर्वपूर्णांतं तावल्लक्षमिमंजपेत् ॥ अमृतंचंद्रिकादत्ते पीत्वायदमरोभवेत् ॥४२॥ ॥ * ॐ ह्रींचंद्रिकेहंसःस्वाहा ॥ १९ ॥ शक्रचापोदयेल्लक्षं निर्गुंडीतलमध्यतः ॥ जपेन्मत्रंततस्तुष्टा देवीपातालसिद्धिदा ॥ ४३ ॥ ऐंक्लींऐंद्रिमाहेंद्रिकुलु २ चुलु २ हंसःस्वाहा ॥ २० ॥ हृदिध्यात्वाज्जपेद्रात्रौ हंसवद्धंसचेटकः ॥ योगंददातिसंतुष्टो जरामृत्युविनाशनं ॥ ४४ ॥ * ॐ हंसःसर्वलोचनानिबंध २ देवीआज्ञापयतिस्वाहा ॥ २१ ॥ लिंगमूर्ध्निकरंवा

कक्ष मं दत्वालक्षंजपेन्मनुं ॥ वाक्सिद्धिंमंत्रिणोलिंगीचटकस्तुप्रयच्छति ॥ ४५ ॥ * ॐ लिंगो पुटी.
द्भवंरुद्रदेहिमेवाचांसिद्धिंवितानंपार्वतीपते ह्रांह्रींह्रूंह्रैंह्रौंह्रः ॥ २२ ॥ जपेन्मासत्रयंर
५० क्तकंबलःसुप्रसीदति ॥ मृतकोत्थापनंकुर्यात् प्रतिमाचालनंतथा ॥ ४६ ॥ स्यंरक्तकंबलम प.१४
हादेविद्रुतं अमुकमुत्थापय २ प्रतिमांचालयचालयपर्वतंकंपय २ लीलयाविलसद्विलसह्रुं
ह्रः ॥ २३ ॥ अष्टोत्तरशतंजप्त्वा यत्किंचित्स्वात्मनोहितं ॥ तद्बलिर्दीयतेतस्यै वटाधोमास
मेकतः ॥ ४७ ॥ ततोदेवीसमागत्य हस्ताद्गृण्हातिभोजनं ॥ तत्रैवसावरंदत्ते नित्यंसान्निध्य
कारणं ॥ ४८ ॥ अतीतानागतंकर्म स्वस्छास्वस्छंब्रवीतिसा ॥ प्रतिमाःपर्वतान्सर्वा न्चालयत्ये
वतत्क्षणात् ॥४९॥ * ॐ करंकमुखेविद्युज्जिव्हे ॐ ह्रंह्रंचेटकेजजःजःस्वाहा २४ पूर्वसेवायु
तंजप्त्वा कृत्वाहोमंदशांशतः ॥ घृताक्तैरजर्नीकुष्ठैपूर्णांतिचपुनर्जपेत् ॥ ५० ॥ आपादांतंलि
पेद्गात्रं रात्रौमंत्रंसमुच्चरेत् यावन्निद्रावशंयाति स्वप्नेददातिसागता ॥ वांच्छितंयच्छुभंकिंचि
त्स्यात्सिद्धंवानासिध्यति ॥ ५१ ॥ ॐ ह्रीं श्रींसःनमःस्मशानवासिनिचंडयोगिनि स्वाहा
॥ २५ ॥ * ॐ नमोभगवतिकर्णपिशाचिनिस्वाहा ॥ २६ ॥ मंत्रद्वयेएकमेवसाधनफलं ५०
करंजवृक्षमारुह्य जपेद्दशसहस्रकं ॥ तत्पंचांगैर्घृताभ्यक्तै दशांशंहोममाचरेत् ॥ ५२ ॥

तत्पंचांगेनकल्केन आपादांतंविलेपयेत् ॥ जपांतेपूर्ववत्स्वप्ने कथयेत्साशुभाशुभं ॥ ५३ ॥
॥ ॐ नमोभगवतेरुद्रायनमोभगवतेस्मशानवासिनेचंडयोगिनेस्वाहा ॥ २६ ॥ * ॐ
नमश्चंद्रस्राविणिकर्णाकर्णकारिणिस्वाहा ॥ २७ ॥ उभयोःपूर्वैवसिद्धिः ॥ पूर्वसेवायुतं
जप्तेकुष्ठकल्काभिमंत्रितं ॥ हस्तपादप्रलेपेन स्वप्नेवक्तिशुभाशुभं ॥ त्रैलोक्येयादृशीवार्ता
तादृशींकथयत्यलं ॥ ५४ ॥ * ॐ आगच्छ २ चामुंडेऱ्हींस्वाहा ॥ २९ ॥ रोचना
कुंकुमैःक्षीरैः पद्ममष्टदलंलिखेत् ॥ नीरजस्केभूर्जपत्रे मायाबीजंदलेदले ॥ ५५ ॥ लिखि
त्वाधारयेन्मूर्ध्नि इमंमंत्रंततोजपेत् ॥ पूर्वसेवांतुसप्ताह मेवंकुर्यात्प्रयत्नतः ॥ अतीताना
गतंसर्वं स्वप्नेवदतिदेवता ॥ ५६ ॥ ॐ ऱ्हींचिंचिनिपिशाचिनिस्वाहा ॥ ३० ॥ अलांबुमू
लिकांपुष्ये तथासर्पाक्षिमूलिकां ॥ संग्राह्यमंत्रितांयत्ना द्रक्तसूत्रेणवेष्टयेत् ॥ मंत्रेणमूर्ध्नि
बद्धातु वदत्येवशुभाशुभं ॥ ५७ ॥ * ॐ नमोभगवतेरुद्रायकर्णपिशाचायस्वाहा ॥ ३१ ॥
इतिश्रीसिद्धनागार्जुनविरचितेकक्षपुटेयक्षिणीसाधनंनामचतुर्दशःपटलः ॥ १४ ॥

कक्ष D-657 पुटी.

५१ प. १५

॥ अथांजनं ॥ अंजनानांतुसर्वेषां मंत्रसाध्यमघोरकं ॥ विनाघोरेणविघ्नाश्च नाशयंतिपदेप
दे ॥ १ ॥ दक्षिणामूर्तिमासाद्य जपेदष्टसहस्रकं ॥ ततःसर्वविधानानि सुखसाध्यानिचाह
रेत् ॥ २ ॥ ॐ बहुरूपंविश्वरूपं(विरूपाक्षं)विद्याधारंमहेश्वरं ॥ जपाम्यहंमहादेवं सर्वसिद्धि
प्रदायकं ॥ ३ ॥ * ॐ रुद्रायनमोरुद्ररूपायनमोबहुरूपायनमोविश्वरूपायनमोविश्वाय
नमस्तत्पुरुषायनमोयक्षरूपायनमएकायएकयक्षायनमएकरोमायनमएकमणायनमोवरदाय
नमस्त्र्यक्षायनमोनुदनुदस्वाहा ॥ १ ॥ सोपवासोजितेंद्रियो भूत्वामहेश्वरस्यपूजां कृत्वाइमं
मंत्रंजपेत् सिद्धिर्भवति ॥ कज्जलानांनिपाताय ग्राह्योयत्नेनपावकः ॥ दीक्षितस्यगृहाच्छ्रेष्ठं
चितायास्तुविशेषतः ॥ रजकस्यगृहाद्वापि तक्षकस्यगृहाच्चवा ॥ ४ ॥ ॐ ज्वलितद्युतिदे
हायस्वाहा ॥ २ ॥ अयंअग्निग्रहणमंत्रः ॥ * ॐ नमोभगवतेवासुदेवायधरधरबंधबंधश्रीप
र्वतेकुलपर्वतेवसुमतेस्वाहा ॥ ३ ॥ अनेनमंत्रेणअग्निंरक्षयेत् ॥ वर्तिबंधादिशांबंधपातालंबंध
मंडलंबंधबंधस्वाहा ॥ ४ ॥ अनेनमंत्रेणवर्तिमभिमंत्रयेत् ॥ * ॐ नमोभगवतेसिद्धशांब
रायज्वलज्ज्वलपातय २ बंध २ संहर २ दर्शय २ निधिंनमः ॥ ५ ॥ अनेनदीपंप्रज्वालयेत् ॥ ५१
* ॐ इंसर्वसिद्धेभ्योनमोविघ्नेस्वाहा ६ अनेनकज्जलंग्राह्यं ॥ ॐ कालिकारक्ष २ मर्दंजनं

नमोविघ्नेस्वाहा ॥ ७ ॥ अनेनयत्किंचिदंजनद्रव्यमभिमंत्रयेत् ॐ ॥ ऱ्हींसर्वेसर्वहितेऱ्हींक्लीं
सर्वेसर्वहितेसर्वौषधिप्राणिहितनिरते नमोनमःस्वाहा ॥ ८ ॥ अनेनांजनयोग्यमूलि
काअभिमंत्रयेत् ॥ आदौकेवलया हेमशलाकया नेत्रमंजयित्वाततस्तयैवशलाकया अंजनद्र
व्यमंजयेत् ॥ अंजयित्वांजनंपश्चा त्सप्तचाश्वत्थपत्रकं ॥ बंधयेत्प्रतिनेत्रंतु अछिद्रं
तदधोमुखं ॥ ५ ॥ तस्योपरिसितंवस्त्रं पट्टजंवाथबंधयेत् ॥ नांज्यादधिकहीनांगंश्वदष्टं
चाग्निदग्धकं ॥ ६ ॥ संपूर्णांगंशुचिस्नातं द्विदिनंनक्तभोजनं ॥ क्षीरशाल्यन्नभोक्तारंद्विदि
नांतेततोजपेत् ॥ अंजितस्यशिखाबंधं कर्तव्यंमंत्रमुच्यते ॥ ७ ॥ ॐ नमोभगवतेरुद्राय
ॐ नमोलहेहुलु हुलु बिहुलु २ रह २ "हर" यक्षरक्षपूजितेयक्षकुमार्यैसुलोचनेस्वाहा ॥ ९ ॥
॥ दक्षिणामूर्तिमाश्रित्यउदयास्तमयंजपेत् ॥ पूर्वसेवासमाख्याता शिखाबंधेशिवोदिता
॥ ८ ॥ अयंसर्वांजनानांविधिर्ज्ञेयः ॥ रोचनंकुंकुमंशंखं बालमोदातुचंदनं ॥ ९ ॥ राजा
वर्तंकुमारीच सौविरांजनपारदं ॥ कटूफलंकांचनीचैव सितपद्मस्यकेशरं ॥ १० ॥ यावकं
चघृतंक्षीरं समभागंचपेषयेत् ॥ स्मशानचैलमादाय पूर्वपिष्टेनलेपयेत् ॥ ११ ॥तद्वर्तिघृ
१८ तसंयुक्तां प्रज्वालयकज्जलंहरेत् ॥ सर्वांजनमिदंख्यातं पातालनिधिदर्शनं ॥ १२ ॥ शर

त्कालेतुसंग्राह्य मूलतांरक्तवर्णकां ॥ सिंदूरपूरितांकृत्वा रवितूलेनवेष्टयेत् ॥ १३ ॥ अतिकृ
ष्णतिलातैलं ग्राहयेद्रक्षयेत्सुधीः ॥ तैलवर्त्याप्रयोगेण कज्जलंचोत्तरायणे ॥ १४ ॥ ग्राह
यित्वांजयेच्चक्षु र्निधिंपश्यतिपूर्ववत् ॥ सप्तधापद्मसूत्राणि भावयेदिक्षुजैःरसैः ॥ १५ ॥ स
र्वांजनमिदंसिद्धं शंभुदेवेनभाषितं ॥ दीपकज्जलयोःपात्रंकर्तव्यंनरमुंडकम् ॥ १६ ॥ सर्वेषां
कज्जलानांतुशस्तंस्याच्छिवभाषितं॥श्रोतोंजनमुलूकस्य ग्राहयेदश्रुवारिणा॥१७॥तस्यवांडे
विनिक्षिप्य यावत्सप्तदिनावधि॥अनेनांजितनेत्रस्तुनिर्विघ्नंवीक्ष्यतेनिधिं ॥ १८ ॥परिमाणंच
जानाति गृण्हातिचयथासुखं ॥ अतिकृष्णस्यकाकस्याजिव्हामांसंसमाहरेत् ॥ १९ ॥ वेष्टये
द्रवितूलेन वर्तितेनैवकारयेत् ॥ अजाघृतेनदीपंतु प्रज्वाल्यापाद्यकज्जलं ॥ २० ॥
अंजिताक्षोनरस्तेन निधिंपश्यतिपूर्ववत् ॥ स्रोतोंजनमुलूकांडे तस्यजिव्हान्वितं
क्षिपेत् ॥ २१ ॥ सप्ताहांतेसमुद्धृत्य अंजनादीक्षतेनिधिं ॥ आश्लेषायांतुकृष्णाहेरंतधू
मेन कंचुकं ॥ २२ ॥ दग्ध्वास्रोतोंजनोन्मिश्र मंजनंनिधिदर्शकं ॥२३॥ नकुलस्यचभेकस्य
लोचनानिसमाहरेत् ॥ स्रोतोंजनसमायुक्तं मेषीतैलेनपेषयेत् ॥ २४ ॥ अंजिताक्षो
नरस्तेन निधिंपश्यतिपूर्ववत् ॥ उलूकचक्षुरादाय कुंकुमंरोचनंशशी ॥ २५ ॥ समांशंमधु

नापिष्टमेतत्सर्वांजनंपरं ॥ राजावर्तंचकर्पूरं रक्तचंदनमूलिका ॥ २६ ॥ रोचनंमधुसंयुक्तं
भवेत्सर्वांजनंपरं ॥ पारदंमधुकर्पूरं मधूकस्यचमूलिका ॥ २७ ॥ समंपिष्ट्वाभवेत्सिद्धं दिव्यं
सर्वांजनंपरं ॥ पुष्यार्केश्वेतगुंजाया विधिनामूलमाहरेत् ॥ २८ ॥ उलूकाक्ष्येनमधुना सर्वां
जनमिदंभवेत् ॥ स्रोतोंजनंसखद्योतं उलूकांडेविनिक्षिपेत् ॥ २९ ॥ सप्ताहांतेसमुद्धृत्य पा
तालमधुनांजयेत् ॥ दिवानक्षत्रवित्तानि करस्थानीवपश्यति ॥ ३० ॥ हरितालंवचालोध्रं
रेणुकाचांजनंतथा ॥ कृष्णपक्षेचतुर्दश्यां चूर्णीकृत्याविनिक्षिपेत् ॥ ३१ ॥ संपुटेताम्रजेतच्च
अघोरेणाथमंत्रयेत् ॥ अंजिताक्षोनिधिंपश्ये न्नरोनानाविधंभुवि ॥ ३२ ॥ रक्तागस्त्यस्यतै
लेन भूधात्रीमूलपेषितं ॥ कर्पूरेणयुतंचाज्यं सिद्धंसर्वांजनंपरं ॥ ३३ ॥ कुंकुमंरोचनंश्वेत
कांचनस्यैवपल्लवाः ॥ सुश्वेतंचजपापुष्पं नंद्यावर्तंसमंमधु ॥ ३४ ॥ सर्वांजनमिदंख्यातं
पातालनिधिदर्शनं ॥ रक्तनकृकलासस्य भावयित्वामनःशिलां ॥ ३५ ॥ तेनवांजितने
त्रस्तुनिधिं पश्यतिभूमिगं ॥ पारदंकाकमायूत्थं फलंकर्पूरकंमधु ॥ ३६ ॥ सूर्यावर्तसमायु
क्तं सिद्धंसर्वांजनंभवेत् ॥ हंसपादीजटामांसी कर्पूरंचमनःशिला ॥३७॥ सूतंदारुनिशाचैव
समभागानिपेषयन् ॥ दिव्यांजनमिदंख्यातं सर्वभूतवशंकरं ॥ ३८ ॥ सद्योहतमनुष्यस्य

पित्तमादायपूरयेत् ॥ शशिनारोचनेनैव धूमपाकेनशोषयेत् ॥ ३९ ॥ अष्टांहांतेजलैर्घृष्ट मं
जनंनिधिदर्शकं ॥ उलूकचक्षुस्तोयेन भावयेत्पट्टसूत्रकं ॥४०॥ तद्वर्त्यांकोलेनतैलेन प्रदीपेघृत
कज्जलं ॥ सर्वांजनमिदंसाज्यं पातालनिधिदर्शकं ॥ ४१ ॥ श्वेतगुंजारसैःसूत्रंदिन मेकंतुभाव
येत् ॥ वराहदंष्ट्राचूर्णंच सूत्रमध्येविनिक्षिपेत् ॥ ४२ ॥ दीपमंकुलतैलेन तद्वर्त्योद्धृतकज्ज
लं ॥ सिद्धंसर्वांजनंप्रोक्तमंजनांनिधिदर्शकं ॥ ४३ ॥ कृष्णाजपित्तंचमयूरपित्तमशोकमू
लंगतमुत्तराशां ॥ शशांकगोरोचनमाक्षिकंच सर्वांजनंनामशिवोपदिष्टं ॥ ४४ ॥ एतेसर्वां
जनाख्याताः प्रसिद्धाःशिवभाषिताः ॥ अगस्त्यवृक्षजांकृत्वा पादुकां निधिदर्शकां ॥
पादुकांजनयोगेन सिद्धयोगाभवंतिवै ॥४५॥ * ॐ नमोभगवतेरुद्रायउड्डामरेश्वरायशिलि २
भ्रमनेनालवेतनालिनीस्वाहा ॥ १० ॥ अनेनपादुकामभिमंत्रयेत् ॥ अथकुमारांजनं ॥
पुष्यनक्षत्रयोगेन पिंडीतगरुमूलकं ॥ षडंगुलमितांकुर्यां च्छलाकांरक्षयेत्ततः ॥ ४६ ॥ स्ना
पयेच्चशिलापृष्ठे कुमारंवाकुमारिकां ॥ तच्छिलास्नानतोयेन रोचनंहेमगैरिकं ॥ ४७ ॥ निघृ
ष्यमंजयेन्नेत्रं मंत्रयुक्तंचपूर्ववत् ॥ रक्षितायाशलाकावै तयैवांज्यान्निधिंलभेत् ॥ ४८ ॥ ति
लपर्ण्युद्भवंमूलं हस्तार्केविधिनोद्धृतं ॥ पातालमधुनायुक्तं जलघृष्टंतदंजयेत् ॥ ४९ ॥ निधिं

पश्यत्यसौसत्य माचार्यैसान्निधौस्थिते ॥ पुष्यार्केगस्त्यवृक्षस्य मूलमुद्धृत्यवारिणा ॥ ५० ॥
पिष्टंपातालमधुना संयुक्तंनिधिदर्शकं ॥ पिंडीतगरजंमूल मुदीच्यांगतमुत्धरेत् ॥ ५१ ॥
चंद्रसूर्योपरागेतु पातालमधुसंयुतं ॥ पेषयित्वांजयेन्नैत्रे सम्यक्पश्यतिभूनिधिं ॥ ५२ ॥ अ
थपादांजनं ॥ तुलसीमूलिकां पुष्येशनिवारेसमुद्धरेत् ॥ निघृष्यकांजिकेनाथ मधुनायुतमं
जयेत् ॥ ५३ ॥ पादजातंकुमारंवा कन्यकांवाततोनिधिः ॥ दृश्यतेनात्रसंदेहः पातालांतर्ग
तस्तथा ॥ ५४ ॥ पार्श्वपिप्पलजंमूलं पुष्यार्केविधिनोद्धृतं ॥ पातालमधुनायुक्तं पादजातां
जनंभवेत् ॥ ५५ ॥ तिलपर्ण्युद्भवंमूलं कृष्णपक्षेरवेर्दिने ॥ चतुर्दश्यांसमादाय जलेनसह
घर्षयेत् ॥ ५६ ॥ पातालमधुनायुक्तं पादजातांजनंभवेत् ॥ तिलपर्ण्युद्भवंमूलं कृष्णपक्षेर
वेर्दिने ॥ ५७ ॥ चतुर्दश्यांसमादाय जलेनसहघर्षयेत् ॥ मधुपुष्पंवचाक्षौद्रं रक्तागस्त्यं
चलज्जरी ॥ ५८ ॥ गुंजाचतिलपर्णीच पादजातांजनंभवेत् ॥ सुश्वेतकरवीरस्य पुष्यार्के
मूलमुद्धरेत् ॥ ५९ ॥ पातालमधुनायुक्तं पादजातांजनंभवेत् ॥ अथलेपांजनं ॥ ६० ॥ गो
क्षीरेणतुसंपेष्यतिलकोद्रवराजिका ॥ चणबीजंचसंपेष्य निशायांचनिधिस्थलं ॥ ६१ ॥
भ्रष्टोलेपोभवेद्यत्र प्रातस्तत्रनिधिंदिशेत् ॥ अर्जुनस्यकदंबस्य यवस्यखदिरस्यच ॥ ६२ ॥

कक्ष ब्रह्मवृक्षस्यपत्राणिकांजिकेनैवपेषयेत् ॥ निशायांलेपयेद्भूमिं कल्कंमंत्रेणमंत्रयेत् ॥ ६३ ॥ पुटी.
प्रातर्लेपोनयत्रास्ति तत्रैवनिधिमादिशेत् ॥ उमादिमातृसंयुक्त किरातंतत्रपूजयेत् ॥ ६४ ॥
५४ तत्रहोमःप्रकर्तव्यो निशायांघृतगुग्गुलैः ॥ प्रभातेतद्द्विवर्णंचेन्निधिस्तत्रविनिश्चितः ॥६५॥ प. १५
ॐ नमोभगवतेरुद्रायकल्कलेपांजनंदर्शयदर्शयस्वाहाठःठः ॥ ११ ॥ अनेनमंत्रेणकल्कलेपां
जनमभिमंत्रयेत् ॥ अथमंत्रांजनं ॥ प्रवेशेनगरस्यानु लक्षमेकंजपेन्मनुं ॥६६॥ पद्मसूत्रैर्घृतो
पेतैःकृतोहोमोदशांशतः ॥ प्रयंच्छत्यंजनंहंसी येनपश्यतिभूनिधिम् ॥ ६७ ॥ ॐ नमोहंसी
हंसजातेक्लींस्वाहा ॥ १२ ॥ मधुकस्यतलेमंत्रं चतुर्दशदिनंजपेत् ॥ नक्तभोजीचतुर्यामं तुष्टा
यच्छतिमेखला ॥ ६८ ॥ अंजनंविघ्ननिर्मुक्तं येनपश्यतिभूनिधिं ॥ ॐ भूमदनमेखनेठःठः ह्रीं
स्वाहा ॥ १३ ॥ एकलिंगंसमभ्यर्च्य षडंगेनातिभावितः ॥ पूर्वसंध्यांसमारभ्य कृष्णपक्षादिं
तोजपेत् ॥ ६८ ॥ सहस्राष्टमिदंनित्यं मासांतपूजयेत्पुनः ॥ सद्भक्त्यादेवतांलिंगे रात्रौमंत्रं
पुनर्जपेत् ॥ ६९ ॥ अर्धरात्रेगतेदेवी दत्तेदिव्यांजनंशुभं ॥ वस्त्रालंकरणंचैव षण्मासाद्देहासि
द्विदा॥७०॥ ॐ चर्कचर्कशन्मलास्वर्णरेखेस्वाहा॥१४॥इतिमंत्रजपः ॥ ॐ ह्रांहृदयायनमः ५४
ॐ ह्रींशिरसे स्वाहा ॥ ॐ ह्रूंशिखायैवौषट् ॐ ह्रैंकवचाय हुं ॐ ह्रौंनेत्रत्रयायवौ

षट् ॐ ह्रः अस्त्रायफट् ॥ इतिषडंगानि ॥ अर्धरात्रेसमुत्थाय सहस्रैकंजपेन्मनुं ॥ मासमे
कंततोदेवी निधिंदर्शयातिध्रुवं ॥ ७१ ॥ * ॐ ह्रांप्रमोदायैस्वाहा ॥ १५ ॥ दिनत्रयंनिराहारः
सतिसोमग्रहेजपेत् ॥ यावन्मुक्तिस्ततोदेवी यच्छत्यंजनमुत्तमं ॥ ७२ ॥ * ॐ ह्रींयक्षिणीभौ
मिश्रिणीरतिप्रियेस्वाहा ॥ १६ ॥ ससुगंधगृहेस्थाने चंदनेनसुमंडले ॥ कृत्वाहस्तप्रमाणेन
पूजयेत्तत्रपद्मिनीं ॥ ७३ ॥ धूपंसगुग्गुलंकृत्वा जपेन्मंत्रसहस्रकं ॥ मासमेकंततःपूजां कृत्वा
रात्रौपुनर्जपेत् ॥ अर्धरात्रेगतेदेवी दत्तेदिव्यांजनंशुभं ॥ ७४ ॥ * ॐ ह्रींपद्मिनीस्वाहा ॥ १७ ॥
वटवृक्षतलेकुर्याच्चंदनेनसुमंडलं ॥ यक्षिणींपूजयेत्तत्रनैवेद्यमुपदर्शयेत् ॥ ७५ ॥ शशमांसासवैः
पश्चा न्मंत्रमावर्तयेत्सुधीः ॥ दिनेदिनेसहस्रैकं यावन्मासंप्रपूजयेत् ॥ ततोदेवीसमागत्य
दत्तेदिव्यांजनंपरं ॥ ७६ ॥ * ॐ आगच्छआगच्छकनवतीस्वाहा ॥ १८ ॥ सृगालस्याक्षिकर्णेन
ह्यंजयेल्लोचनद्वयं ॥ भूतंपश्यत्यसौतस्मा त्संप्राप्नोतिमहानिधिं ॥ देवदालीरसैश्चक्षु रंजयि
त्वातुतत्फलं ॥ ७७ ॥ * ॐ गणपतयेनमः ॥ ॐ चामुंडायैनमः ॥ भूतंदर्शयदर्शयस्वाहा ॥
उक्तयोगद्वयस्यायमेवमंत्रः ॥ १९ ॥ इतिश्रीसिद्धनागार्जुनविरचितेकक्षपुटेसर्वांजनादिसा
१९ धनंनामपंचदशःपटलः ॥ १५ ॥ ॥ ॥ ॥ ॥ ॥

॥ अथज्ञातनिधानस्यग्रहणं ॥ ब्रह्मचारीसहस्रेण शिलामूलशतेनच ॥ रुद्रैंद्राणांसहस्रेण शिखा
बंधोविधीयते ॥१॥ * ॐ रक्ष विघ्नेस्वाहा ॥१॥ अनेनमंत्रेणसर्वसहायानां शिखाबंधनंकुर्यात्॥
शाबरंधारयेन्मंत्री रूपंसर्वार्थसिद्धये ॥ गुर्विणीयामृतानारी तत्केशैरुपवीतकम् ॥२॥ कृत्वातु
धारयेत्तस्या भस्मनोद्धूलयेत्तनुं ॥ नरमुंडधरोनग्नः शिखिपिच्छैःसुभूषितः ॥ ३ ॥ इत्येवं
रूपधृग्वीरः पूजांकुर्यान्निधिस्थले ॥ चतुरस्रंचतुर्द्वारं तन्मध्येष्टदलांबुजं ॥ ४ ॥ कृत्वैवमंड
लंमंत्री कुंकुमागरुचंदनैः ॥ तन्मध्येपूजयेच्छंभुंजलकुंभेशिवान्वितं ॥ ५ ॥ * ॐ ईशानाय
विद्याधिपयते आगच्छआगच्छबलिंगृहाण २ नमोविघ्नेस्वाहा ॥२॥ अनेनार्चयेत् ॥ अथाष्टद
लेकमले ब्राह्म्याद्याष्टकंपूजयेत् ॥ ३ ॥ * ॐ नमोब्राह्म्यैआगच्छ २ बलिंगृहाण २ एवंसर्वमातृ
णांतत्तन्नामयुतेनैवमंत्रेणैवपूजांकुर्यात् ॥ ४ ॥ * ॐ शक्तिपालायआगच्छ २ बलिं ॥ ५ ॥ एवं
सर्वद्वारपालाःपूज्याः ॥ नंदिनंचाश्रियंपूर्वद्वारेदेशेचपूजयेत् ॥ कीर्तिंचैवमहाकालं दक्षिणेपश्चि
मेपुनः ॥ ६ ॥ गणेशंचकुमारंच भृंगीदंडीचउत्तरे ॥ इत्येवंपूजनंकृत्वा अलिबल्युपहारकैः ॥
बलिंप्रदर्शयेन्मंत्री सहायांश्चाभिषेचयेत् ॥ ७ ॥ * ॐ बलिसुबलितृप्यंतु सिद्धिमादिशंतु नमो
विघ्नेस्वाहा ॥८॥ इतिबलिमंत्रः ॥ मंडलंपूजयेन्मंत्री सहायायसमर्चितं ॥ शिवकुंभाभंसास

र्वान्मंत्रेणैवाभिषेचयेत् ॥८॥ * ॐ नमोभगवतेआरभटेपिंगललोहपिंगललोहविधर २ पापं
नाशय २ दुराचारंहन २ अभिषेकितानांरक्ष २ अभिषेकपदंउपधारय २ कुरु २ समयभीषण
नमोविश्वैवौषट् ॥७॥ अयमभिषेकमंत्रः ॥ अभिषेकानंतरं समयंदर्शयेत् ॥ कौशंतेषांप्रदात
व्यं समयंशिक्षयेदमुं ॥ यत्रक्कापिनिधिंलज्जा गुरवेतन्निवेदयेत् ॥ ९ ॥ यद्ददातिगुरुस्तुष्टो
गृण्हीयात्ततत्समंसमं ॥ लब्ध्येनवचनंकार्यं दिसाक्षान्महान्नृपः ॥ १० ॥ गुरवेवासहायेभ्यो
योवादातुंनचेच्छति ॥ मंत्रमंजनसिद्धिंच हरंतिकिलदेवताः ॥ ११ ॥ इतिसमयदर्शनं
निधेःखननकालेतु जपेत्तिष्ठदघोरकं ॥ ध्यायेच्चशाबरंरूपं सर्वभूतभयावहं ॥ १२ ॥ मयूर
पिच्छसच्छन्नं गुंजाजालेनभूषितं ॥ दंतुरोर्ध्वगतिःश्यामं रक्तोत्पलनिभेक्षणं ॥ १३ ॥
किरातमीश्वरंध्यात्वा सर्वभूतफलप्रदं ॥ * ॐ ह्रीं ह्रीं ह्रूं ह्रूं अघोरअघोतरप्रस्फुर २
प्रकट २ कह २ शम २ जात २ दह २ पातय २ ॥९॥ * ॐ ह्रैं ह्रौं ह्रूं अघोरायस्वाहा
फट् ॥ १० ॥ इमंअघोरमंत्रं जपेत्पूर्वसेवायुतं ॥ दशांशेनैवहोमस्तु घृतैःसिद्धोभविष्वति ॥
खनमानेनिधौसर्पा निःसरंतिभयानकाः ॥ १४ ॥ औषधेनविनातेभ्यो भयंस्यान्मंत्रिणाम
पि ॥ तस्मादौषधयोगेन पादलेपेनतान्जयेत् ॥ १५ ॥ अर्कस्यकरवीरस्य पनसस्यचमू

लिकां ॥ पिष्ट्वापादप्रलेपात्तू दूरेगच्छंतिपन्नगाः ॥१६॥ मल्लिकागिरिकर्णीच श्वेतार्कःकंटका
रिका ॥ वचाचमूलिकाचैषां पिष्ट्वापादंप्रलेपयेत् ॥ १७ ॥ सर्पायक्षगणाःक्रूराः येचान्ये
विघ्नकारिणः ॥ पलायंतेनिधिंत्यक्त्वा यथायुद्धेषुकातराः ॥१८॥ वन्हिःकोशातकीवज्री श्वेतार्को
गिरिकर्णिका ॥ वचापाठाचनिर्गुंडी कुटुतुंब्याश्वमूलकं ॥ १९ ॥ निंबकेसरमूलानिगोमूत्रैः
पेषयेत्समं ॥ अनेनपादलेपेन विघ्नायांतिदिशोदश ॥ २० ॥ एतन्नाराचयोगेन अतिपाता
लगंधनं ॥ गृण्हातिनात्रसंदेहः स्वयंप्रोक्तंकपर्दिना ॥ २१ ॥ कूष्मांडैरंडधत्तूर बीजानिप
नसस्यच ॥ जातीदाडिममूलानि गोमूत्रैःपेषयेत्समं ॥ २२ ॥ अनेनपादलेपेन सर्पायक्षाः
पिशाचकाः ॥ पलायंतेनसंदेहो निधानग्राहयेद्ध्रुवं ॥ २३ ॥ अथदृष्टेनिधौमंत्रीकीलकैः
कीलयेत्तुतं ॥ प्लक्षपालाशलोध्रोत्थ कदंबवटनिंबजैः ॥ २४ ॥ शम्युदुंबरकाश्वत्थजैःकीलैः
पत्रसंयुतैः ॥ पुनतुंमांदेवजनाः पुनंतुमनवोधिया ॥ पुनंतुविश्वाभूतानि जातवेदःपुनी
हिमा ॥ २५ ॥ इतिकीलकमंत्रः ॥ * ॐ सर्वभूताधिपतयेनमः ॥ अनेनमंत्रेणमध्यमां
साभ्यांभूतबलिंदद्यात् ॥११॥ * ॐ ऱ्हीं ऱ्हूं फट् ॥ अनेनमंत्रेणनिधानस्या सनंपुष्पंदद्यात्
॥ १२ ॥ * ॐ नमोभगवतेकेतुमालिनेगरुडेशुभे ॥ १३ ॥ * ॐ ऱ्हीं कपालिनिउद्धर २ गृहाण

निधानंस्वाहा ॥ १४ ॥ अनेनकेतुमालिनि मंत्रेणनिधिमुद्धरेत् ॥ चत्वारोनिधयस्तत्रशंभुदे
वेनकीर्तिताः ॥ २६ ॥ कच्छपोमकरःशंखः पद्मइत्यभिधानतः ॥ कच्छपोमकरःश्रेष्टः
स्थिरभूतौस्वभावतः ॥२७॥ सुखसाध्यौयथापूर्वं विधानेनसमाहरेत् ॥ शब्देनतुमनुष्याणां
शंखपद्मौरसातले ॥ २८ ॥ गच्छंतौनैवदृश्येते तत्रमंत्रद्वयंस्मरेत् ॥ शैवंचवैष्णवंचैवततः
सिद्धोभवेद्ध्रुवं ॥२९॥ * ॐ नमोभगवतेरुद्राय निधिमुत्तिष्ठमाचलस्वाहा ॥ १५ ॥ * ॐ
नमोभगवतेवासुदेवायधर २ बंध २ श्रीपर्वतेकुलपर्वतेवसुमतेनिधानमुद्धर २ स्वाहा ॥ १६ ॥
इतिमंत्रद्वयंजपेत् ॥ * ॐ नमोभगवतेशाबररूपाय ॐ फट्स्वाहा ॥१४॥ अनेनासिद्धशा
बरमंत्रेणसाध्यनिधिंसाधयेत् ॥ मृत्काष्ठलोहभांडेषु स्थितंद्रव्यंतुकालिकं ॥ ३० ॥ शैवालं
वासमाश्रित्य तिष्ठेत्तत्तद्विशोधयेत् ॥ कांजिकैर्लवणंपिष्ट्वा तस्मिन्द्रव्यंविनिक्षिपेत् ॥ ३१ ॥
यावल्लवणसंतुल्यं पाचयेन्मृदुवन्हिना ॥ स्वर्णंचसर्वरत्नानि निर्मलानिभवंतिवै ॥ ३२ ॥
अर्जुनस्यविभीतस्य चित्रकस्यचपल्लवान् ॥ पिष्ट्वालवणसंतुल्यं मारनालेनलोलयेत् ॥
तल्लिप्तद्रविणंह्यग्नौ तापयेन्मलशांतये ॥ ३३ ॥ इतिश्रीसिद्धनागार्जुनविरचितेकक्षपुटेनि
धिग्रहणंनामषोडशः पटलः ॥ १६ ॥ ॥ ॥ ॥ ॥ ॥

कक्ष ॥ अथादृश्यं ॥ लक्षमेकंजपेन्मंत्रं राजद्वारेशुचिस्थितः ॥ सक्षीरैर्मालतीपुष्पै र्हुतैःसिध्य पुटी.
तियक्षिणी ॥ ददातिगुटिकासातु मुखस्थादृश्यकारिणी ॥ १ ॥ * ॐ ऐं मोदनेमदनाविडंब
५७ नेआत्मसंगंदेहिमेदेहिश्रींस्वाहा ॥ १ ॥ चतुर्लक्षंजपेन्मंत्रं स्मशानेनियतःशुचिः ॥ नग्नत्र प. १७
तस्ततःस्तुष्टा पटंयच्छतियक्षिणी ॥२॥ तेनावृतोनरोदृश्यो ह्विचरेद्वसुधातले ॥ निधिंपश्य
तिगृण्हाति नविघ्नैःपरिभूयते ॥३॥* ॐ व्हांव्हींस्फेंस्मशानवासिनिस्वाहा ॥२॥ निशाचर
निधिंध्यात्वा जप्त्वंवामेनपाणिना ॥ अदृश्यकारिणींविद्यां लक्षजापेप्रयच्छति ॥ ४ ॥
*ॐ नमोनिशाचरमहेश्वरममपर्यटतः ॥३॥ अलिबल्युपहारेण कुर्यादर्चनमुत्तमं ॥ ततोदीपां
कुलीतैले वार्त्तिःस्यादब्जतंतुभिः ॥ ५ ॥ पंचभिर्वर्त्तिकाभिश्च नृकपालेषुपंचसु ॥ नरतैलेन
दीपास्युः कज्जलंचनृकंदलैः ॥ ६ ॥ ग्राहयेत्पंचभिर्यत्ना त्पूर्ववच्चशिवालये ॥ पंचस्थानेषु
यज्जात मेकीकुर्याच्चतत्पुनः ॥ मंत्रयित्वांजयेन्नेत्रे देवैरपिनदृश्यते ॥ ७ ॥ * ॐ व्हूं फट्
कालिकालिमहाकालि मांसशोणितभोजने ॥ रक्तकृष्णमुखेदेवि मामेपश्यंतुमानुषेति हुंफ
ट्स्वाहा ॥ ४ ॥ अयंमंत्रःअयुतज पात्सिद्धोभवति ॥ ततःसर्वअदृश्यकरणयोगा अष्टोत्तरश ५७
तमभिमंत्र्य ॥ ८ ॥ अनेनैवकुर्यात्ततः सिधोभवति ॥ अंकुलीतैलसंयुक्ता वचासप्तदिनाव

वि ॥९॥ त्रिलोहवेष्टितांसातु गुटिकांकारयेच्छुभां ॥ अदृश्यकारिणीख्याता मुखस्थानात्रसंशयः ॥ १० ॥ तत्तैलसर्षपाःश्वेता स्त्रिलोहेनचवेष्टिताः ॥ गुटिकामुखमध्यस्था ख्याताहृश्यत्वकारिणी ॥ ११ ॥ काकोलूकस्यपक्षाश्च आत्मकेशास्तथैवच ॥ अंतर्धूमगतंदग्ध्वा सूक्ष्मचूर्णंतुकारयेत् ॥ १२ ॥ अंकुलीतैलगुटिकां कृत्वाशिरसिधारयेत् ॥ अदृश्योजायतेक्षिप्रं देवैरपिनदृश्यते ॥ १३ ॥ तालकंकृष्णमहिषी क्षीरमंकुलतैलकं ॥ तल्लिप्तांगोनरोदृश्यो जायतेशंकरोदितं॥१४॥अंकोलतैलसंसिक्तं मलंपारावतोद्भवं ॥ ललाटेतिलकंतेन कृत्वादृश्योभवेनरः ॥ १५ ॥ * ॐ कच्छबोलालामुलंदुमेल्योनेजाने ऱ्हीं ऱ्हीं सिद्धेश्वरीस्वाहा ॥ ९ ॥ * ॐ कवलोबालमूलंदूनेसौमेजनि ऱ्हीं ऱ्हीं सिद्धेस्वाहा ॥ ६ ॥ उक्तयोगानामयमेवमंत्रः ॥ श्वेतापराजितामूलं ग्राह्यंचंद्रग्रहेसति ॥ बलाक्षौद्रेणसंयुक्तं गुटिकांमूर्ध्निधारयेत् ॥ १६ ॥ वक्त्रेहस्तेचसाग्राह्या देवैरपिनदृश्यते ॥ पुत्रजीवोत्थितंतैलं वर्तिंकृत्वाब्जतंतुजां ॥ १७ ॥ रोचनासहदेवीभ्यां वीरमुंडेप्रलेपयेत् ॥ दीपप्रज्वाल्यचैकस्मि न्नपरेग्राह्यकज्जलं ॥ १८ ॥ तदंजनांजितोमर्त्यो देवस्यापिनदृश्यते ॥ जरायुश्वेतमाचार्या कृष्णायावाथचूर्णयेत् ॥ १९ ॥
२० त्रिलोहवेष्टितांकुर्या द्वक्त्रस्थादृश्यकारिणी ॥ पूर्वस्थंग्रहणेभानो र्नंद्यावर्तस्यमूलिकां ॥ २० ॥

गृहित्वाततस्त्रियस्तन्ये घृष्ट्वातुवटकीकृतां ॥ त्रिलोहवेष्टितांकुर्या न्मुखस्थाददृश्यकारिणी॥२१॥
भोजयेत्कृष्णकाकंतु महिषीनवनीतकं ॥ तद्विष्ठारविमूलेन वेष्टितावर्तिकाकृता ॥ २२ ॥
दीपमंकुलतैलेन नृकपालेचपूर्ववत् ॥ स्मशानेकज्जलंग्राह्यं तद्वत्स्यात्फलमुत्तमं ॥ २३ ॥
पारावतस्यकुक्षिस्थं पक्वंस्त्रोतोंजनंचितौ ॥ कृष्णमार्जाररक्तेन भावितैरक्ततंतुभिः ॥ २४ ॥
वर्तिस्तुकापिलाज्येन नृकपालेतुपूर्ववत् ॥ ग्राहयेकज्जलंदिव्य मदृश्यकरणेहितं ॥ २५ ॥
दरदोदेवदारुश्च चितामांसंनरस्यच ॥ स्रोतोंजनयुतंकुर्या दंजनेदृश्यकारकं ॥ २६ ॥ उलू
कस्यश्रृगालस्य सूकरस्याक्षिरक्तच ॥ नीलांजनंयुतंपिष्ट्वा रुध्वास्त्रावपुटेदहेत् ॥ २७ ॥ तेनां
जितोनरोदृश्यो जायतेनात्रसंशयः ॥ खंजरीटस्यजीवंतु गृहीत्वाफाल्गुनेक्षिपेत् ॥ २८ ॥
पंजरेरक्षयेत्ताव द्यावभाद्रपदंभवेत् ॥ तदासपंजरोदृश्यो जायतेनात्रसंशयः ॥ २९ ॥ खंज
रीटशिखाग्राह्या हस्तस्थादृश्यकारिणी ॥ त्रिलोहवेष्टितांरक्षे द्धारयेन्मूर्ध्निसर्वदा ॥ ३० ॥
दशहेमद्विषट्ताम्रं रूप्याःषोडशभागिकं एषासंख्यात्रिलोहस्य ज्ञातव्यासर्वकर्मणि ॥ क्रमे
णवेष्टयेत्पश्चा द्गुटिकानामयंविधिः ॥ ३१ ॥ * ॐ नमोभगवते उड्डामरेश्वरायनमो रुद्राय ५८
विलि २ व्याघ्रचर्मपरिधानायमकुल २ कुतुचंडप्रचंडकिलि २ स्वाहा ॥ ७ ॥ उक्तयोगा

नामयंमंत्रः ॥ अजमोदस्यमूलंतु तुरगीगर्भशय्यया ॥ सहतालकसंपिष्टं तिलकेदृश्यकारकं
॥ ३२ ॥ रात्रौकृष्णचतुर्दश्यां लांगलीमूलमुद्धरेत् ॥ श्वेतच्छागालिकागर्भ शय्यायांनरतैल
कं ॥ एकीकृत्वाजपेन्नेत्रे अदृश्यःखेचरोभवेत् ॥ ३३ ॥ * ॐ सरवेअःसर्वेअरिदुर्बलेअर्धकेशे
दाढाकरालेढक्करावेफिक्कारिणिहुंतुंडेचंडालिनिस्वाहा ॥ ८ ॥ उक्तयोगद्वयेअयमेवमंत्रः ॥
अमावास्याथवापूर्णा पंचमीवात्रयोदशी ॥ श्वेतपुष्पैर्गंधधूप बलिदीपोपचारकैः ॥ रात्रौ
पूजाततोग्राह्या देवदालीसुमंत्रिता ॥ ३४ ॥ * ॐ अमृतगणपरिवृतेरुद्रगणय ॐ नमः
स्वाहा ॥ ९ ॥ अयंमंत्रः ॥ * ॐ नमोभगवतेरुद्रायफट्ठःठः ॥ १० ॥ अनेनग्राह्यातद्रसै
पारद मर्धंदिनमेकंततोजपेत् ॥ अदृश्योजायतेसत्यं स्वयंप्रोक्तंकपर्दिना ॥ ३५ ॥ तद्रसंदेव
दाल्युस्थं केतकीस्तन्यसंयुतं ॥ अंजयेन्नेत्रयुगुलम अंतर्द्धानकरंपरं ॥ ३६ ॥ रात्रौकृष्ण
चतुर्दश्यांचतुर्भिःसहसाधकैः ॥ एकांतेवाश्मशाने वाखड्गहस्तैर्महाबलैः ॥ ३७ ॥ अजं
कृष्णंबलिंदद्या त्तस्यमेदःसमाहरेत् ॥ उपोषितायतस्मैतु मेदोदेयंतुभक्षणे ॥ ३८ ॥ तृप्त्यं
तेतंतुमार्जारं गृहीत्वापश्चिमेपदे ॥ चलनाद्वापयेद्भांडे जलपूर्णंसमर्चिते ॥ ३९ ॥ तद्वांतं
दापयेदग्नौ दीपंतेनैवदापयेत् ॥ वर्त्तिःसाबिसतंतूस्था ज्वालयेन्नृकपालके ॥ ४० ॥ तत्पात्रे

कक्ष ५९ कज्जलंग्राह्यं रात्रौदेवींचपूजयेत् ॥ परस्पराश्लिष्टकराश्चत्वारःखड्गपाणयः ॥ ४१ ॥ दीपमा पुटी.
वर्त्यंरक्षंयुः पंचमस्तुजपेत्सदा ॥ महाकालीयमन्त्रोयः पूर्वयोगेउदाहृतः ॥ ४२ ॥ अदृश्यका
रकंचाज्यं सिद्धयोगमुदाहृतं ॥ शुनकस्यातिकृष्णस्य गलेसूत्रंविबंधयेत् ॥ ४३ ॥ * ॐ प.१७
नमःआकांक्षितपरमकांतिन् कदयरुकटुकटिमेतत् ॥ ११ ॥ अनेनमंत्रेणकृष्णश्वानस्यदक्षि
णाधोदंष्ट्रामूलमांसंग्राह्यं ॥ पंचोपचारैःपूजयित्वासमाहरेत् ॥ त्रिलोहवेष्टितंकृत्वा वक्त्रस्थो
दृश्यकारकः ॥ मयूरवानरास्थी निपाच्चयन्माहिषैर्घृतैः ॥ ४४ ॥ पिष्ठातदंजयेन्नेत्रे अदृश्यो
जायतेनरः ॥ उपवासत्रयंकृत्वा ततःपुष्पेनिवापयेत् ॥ ४५ ॥ नृकपालेयवान्कृष्णान् कृष्णमृ
त्पूरितेनिशि ॥ निशायांसेचयेन्नित्यं सुपक्वान्ग्राहयेन्निशि ॥ ४६ ॥ तैर्बीजैस्तुकृतामाला
शिरस्थादृश्यकारिणी ॥ शरेणनिहितेसर्पे दग्धेतल्लोहमाहरेत् ॥ ४७ ॥ काकोलूकस्य
नीलस्य ग्राह्येएतस्यलोचने ॥ तल्लोहेनांजयेच्चक्षुर दृश्योजायतेध्रुवं ॥ ४८ ॥ भजेदृतुमतीं
कन्यां स्मशानेमैथुनंनिशि ॥ तच्छुक्रशोणितंग्राह्यं शिलालकविमिश्रितं ॥ ४९ ॥ ललाटे
तिलकंतेन कृत्वादृश्योभवेन्नरः ॥ संप्राप्तेह्यष्टमेमासे यदागर्भंपतेत्स्त्रियाः ॥ ५० ॥ तस्यने
त्रेचकर्णौच जिव्हात्वन्मांसनासिका ॥ गुदमेढ्रांडपादांश्च संध्यायांतत्प्रप्रैषयेत ॥ ५१ ॥ म ५९

हाकालीयमंत्रेण यावन्मोक्षोभवेद्गृहे ॥ गुटिकांधारयेत्धस्ते अदृश्योजायतेनरः ॥ ५२ ॥ नृ
कपालेतुयालग्ना सीसकोद्भवमृतिका ॥ चंडालीस्तन्यसंमिश्रा हस्तस्थादृश्यकारिणी ॥५३॥
वापयेत्तुलसीबीजं कृष्णकाकस्यपृष्ठतः ॥ रात्रौकृष्णचतुर्दश्याम न्यानिपरितोषयेत् ॥५४॥
तुलसीकाकपृष्ठेया दृश्यतेसानकेनाचित् ॥ तदर्धवापितावाह्ये तुलसिजायतेन्यदा ॥ ५५ ॥
तदाकाकोद्भवाद्ग्राह्या बलिंदत्वातुकुक्कुटं ॥ सुपक्वंसप्तधान्यंच वटपत्रेबलिंहरेत् ॥ ५६ ॥
समुलांतुलसीमंज्याद दृश्योजायतेनरः ॥ कृष्णाषाढचतुर्दश्यां कृष्णधत्तूरबीजकं ॥ ५७ ॥
वापयेन्नरमुंडेतु नासारंध्रेसमांशके ॥ निखनेत्कृष्णभूम्यंतः स्वोच्छिष्टंसेचयेत्सदा ॥ ५८ ॥
संक्रांतिःदर्शपुर्णासु दीपंदद्याद्घृतेनतु ॥ वर्तिश्वरक्तसुत्रास्या यावत्तस्यफलोदयः ॥ ५९ ॥
कृष्णाष्ठम्यांफलंग्राह्यं बलिंदत्वातुकुक्कुटं ॥ तद्बीजैर्गुटिकाकार्या मुखस्थादृश्यकारिणी॥६०॥
कृष्णमृत्परितक्षेत्रे वाव्यागुंजान्नमुंडके ॥ रात्रौकृष्णचतुर्दश्या मलिबल्युपहारकैः ॥ ६१ ॥
नित्यंकुर्याद्बलिंपूजां जलैःसिंचयात्तसदानिशि ॥ यावत्फलतिसागुंजा ततःकृष्णमजंबलिं ॥
॥ ६२ ॥ कृत्वायोगीश्वरान्पंच भोजयेद्बलिपूर्वकं ॥ ततःश्चाष्टोत्तरशतं ग्राह्यंगुंजाफलंक्रमात्
॥ ६३ ॥ सूच्यातुप्रोतयेत्सूत्रे सामालादृश्यकारिणी ॥ धारयेन्मूर्ध्निकर्णेवा तद्वक्षेचेन्नदृश्यते

 ॥ ६४ ॥ सुकृष्णंमाहिषीक्षीरैः पाचयेत्कृष्णजीरकं ॥ तद्भक्षणाद्दश्यस्या द्यावज्जीर्णनसंशयः
॥ ६५ ॥ त्द्दयंकृकलासस्य ग्राहयेद्विधिपूर्वकं ॥ गोरोचनसमंपिष्टं ताडपत्रेणवेष्टयेत् ॥
 समंत्रागुटिकासाच मुखस्थाद्दश्यकारिणी ॥६६॥ * ॐ इच्छापिलापिंगलायस्वाहा ॥११॥
कटुतुंबीदेवदाली पटोलीचेंद्रवारुणी ॥ तिक्तकोशातकीतासां शुष्कबीजानिचूर्णयेत् ॥६७॥
काकतुंड्यपमार्गोत्थ कषायेनविलोलयेत् ॥ आलिप्यकांस्यपात्रंतु धारयेदातपेखरे ॥ ६८ ॥
सत्ततंस्वच्छवस्त्रेण पीडयेत्तैलमाहरेत् ॥ तेनतैलेनसंघृष्टं देवदारुश्चचंदनं ॥ ६९ ॥ तेनैव
तिलकंकुर्या ल्ललाटेद्दश्यकारकं ॥ अपामार्गकषायेन पूर्ववत्तैलमाहरत् ॥ ७० ॥ विषमुष्टयु
स्थबीजानां सर्वयोगेषुयोजयेत् ॥ अंकोलतैलनिर्दग्धं रजनीकुंकुमंनिशि ॥ ७१ ॥ रोचना
सहदेवीच समभागानिपेषयेत् ॥ विषमुष्टयुत्थतैलेन तिलकोद्दश्यकारकः ॥ ७२ ॥ कार्पा
सबीजचूर्णानि दिनमेकंविभावयेत् ॥ समूलोत्तरवारुण्याः कषायेनप्रयत्नतः ॥ ७३ ॥ पूर्व
द्वाहयेत्तैलं सर्वयोगेषुयोजयेत् ॥ आम्राडबीजचूर्णानि दशांशंचित्रमूलकं ॥ ७४ ॥ नारिके
लांबुनापिष्टं पूर्ववत्तैलमाहरेत् ॥ एतत्तैलद्वयेनैव लिप्तावर्तिंबिसोद्भवां ॥ ७५ ॥ ज्वालि
तांद्धारयेद्धस्ते सोप्यद्दश्योभवेन्नरः ॥ पुत्रजीवोत्थबीजानि तैलमात्रांडवद्भवेत् ॥ ७६ ॥

दृश्यंतेचांजिताःसर्वे गोमूत्रैःक्षालनात्पुनः ॥ ॥ इतिश्रीसिद्धनागार्जुन विरचितेकक्षपुटेअ
दृश्यकरणंनामसप्तदशःपटलः ॥ १७ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ अथपादुकासाधनं ॥ अश्वलालांकुलीतैलैः पेषयेत्श्वेतसर्षपान् ॥ तल्लिप्तहस्तपादस्तु यो
जनानांशतंव्रजेत् ॥ १ ॥ अंकोलतैलसंपिष्टं श्वेतसर्षपलेपितं ॥ पादुकामुष्ट्रदुग्धोत्थां समारु
ह्यशतंव्रजेत ॥ २ ॥ काकजंघासिताग्राह्या गृध्रस्यचवसातथा ॥ अश्वकर्णीसमायुक्ता मुष्ट्री
क्षीरेणपेषयेत् ॥ अनेनलिप्तपादस्तु योजनानांशतंव्रजेत् ॥ ३ ॥ ॐ नमोभगवतेरुद्राय
भूतवेतालत्रासंनाशय शंखचक्रगदाधरायहल २ चंद्रवेतालायहुंफट्स्वाहा ॥ १ ॥ अनेन
२१ पादलेपत्रयमभिमंत्रयेत सिद्धिर्भवति ॥ श्वानमार्जारनकुलपित्तंग्राह्यंसमंसमं ॥ काक
मांसवसाजंघा पिष्ट्वापादौप्रलेपयेत् ॥ योजनानांशतंगत्वा पुनरावर्तयेत्क्षणात् ॥ ४ ॥

कक्ष

६१

पुटी

प. १८

✱ ॐ नमोभगवतेरुद्राय मांसिसमलकैलेगलेख्येयंपंचप्रवरसरसरस्वाहा ॥ २ ॥ कीटमारि
णिसिंदूर हरिश्चंद्रंतुवेतसं ॥ अजामारींतथारास्ना मलिक्षीरेणभावयेत् ॥ ५ ॥ पिष्ट्वापादप्र
लेपेन सगच्छेद्योजनायुतं ॥ सुभगःसर्वनारीणां ब्रह्मतुल्योभवेन्नरः ॥ ६ ॥ ✱ ॐ नमोभ
गवतेरुद्राय नमोब्रह्मणेनमःसूर्याय नमःश्चंद्रायनेत्रशंखचक्रगदाधरायहिलि २ स्वाहा ॥ ३ ॥
सुरभीकांचनीमूल मजमारीचचंद्रकं ॥ दरदंपारदंचैव उष्ट्रीक्षीरेणपेषयेत् ॥ ७ ॥ अनेन
पादलेपेन नानारूपधरोनरः ॥ योजनानांसहस्रैकं गत्वाप्रतिनिवर्तते ॥ कामयेत्स्त्रीसहस्रा
णि रुद्रतुल्योभवेन्नरः ॥ ८ ॥ ✱ ॐ नमोभगवतेरुद्राय नमोदंडिकंपालायमिलिनेकटंकट
स्मशानप्रियायवध्वेश्रीशूलिनेभगवते त्रिनेत्रायबलहलस्वाहा ॥ ४ ॥ सारिकायावसानेत्र
मांत्राणिरुधिरंतथा ॥ काकपित्तंतथानेत्रं हरिश्चंद्रंतुवेतसं ॥ ९ ॥ शुनोमज्जावसातुल्य
मुष्ट्रीक्षीरेणभावयेत् ॥ पादलेपप्रकर्तव्यो नमस्कृत्यशिवंततः ॥ १० ॥ योजनंलक्षमेकंतु
निमिषार्द्धेनगच्छति ॥ गगनाशेषचारीसः क्रिडतेचयथाशिवः ॥ ११ ॥ स्त्रीकोटिशतसं
घातं कामयेन्निमिषांतरे ॥ ब्रह्मतुल्योभवेत्सोहि लीयतेपरमेशिवे ॥ १२ ॥ ✱ ॐ नमः
श्चंद्रासनेचंद्रशेखरे नमोभगवते तिष्ठनमोभगवतेनमः शेखरेनमः शूलिनेनमः पादप्रचा

६१

रिणेवेगिने हुंफट्स्वाहा ॥ ५ ॥ प्रतीचीदिग्गतंमूलं प्रातश्चात्र्यासमाहरेत् ॥ तत्पिष्टंकुलतै
लेन पादलेपाच्छतंव्रजेत् ॥ १३ ॥ आरंडस्यतुमूलानि तिलतैलेनपाचयेत् ॥ पादांसजानु
पर्यंतं लिप्त्वादूराध्वगोभवेत् ॥ १४ ॥ * ॐ नमश्चंडिकायैगगनंगमय २ चालय २ वेग
वाहिनी २ ऱ्हीं स्वाहा ॥ ६ ॥ उक्तयोगद्वयस्यायमेवमंत्रः ॥ काकस्यहृदयंनेत्रं जिव्हांचै
वमनःशिला ॥ गैरिकंसिंदुरंचैव अजमारीचमालती ॥ १५ ॥ समंरुद्रजटाचैव विदार्या
सहपेषयेत् ॥ तल्लिप्तपादःसहसा सहस्रंयोजनंव्रजेत् ॥ वलीपलितनिर्मुक्तो यावदाभूतसं
प्लवं ॥ १६ ॥ * ॐ नमोभगवतेरुद्राय नमोहरितगदाधरायत्रासय २ भक्ष २ चालने
स्वाहा ॥ ७ ॥ निर्गुंडीमूलमादाय मलंपारावतोद्भवं ॥ पालाशबीजसंयुक्तं रक्तपाठाफलानि
च ॥ १७ ॥ हृदयंचउलूकस्य पेषयेच्छीतवारिणा ॥ अनेनपादलेपेन योजनानांशतंव्रजेत्
॥ १८ ॥ उलूकस्यतुपादानि दग्धानिचूर्णितानिच ॥ अंकुलीतैलपिष्टानि पादलेपेनियो
जयेत् ॥ योजनानांशतंगत्वा पुनरागच्छतिध्रुवं ॥ १९ ॥ * ॐ ऱ्हीं ऱ्हीं ऱ्हीं ऱ्हीं ल्हूँ
फट्नमः ॥ ८ ॥ उक्तयोगद्वयस्यायंमंत्रः ॥ विधिनाकृकलासस्य पुच्छमादायदक्षिणं ॥
त्रिलोहवेष्टितंवक्रे धार्यमिच्छागतिर्भवेत् ॥ २० ॥ * ॐ संकोचायस्वाहा ॥ ९ ॥ अथ

कक्ष गुटिका ॥ साधकश्चिल्हयंगत्वा नित्यंतस्मैनिवेदयेत् ॥ देवताबुध्यातिभक्त्याभक्षणार्थं किंचि पुटी.
त्किंचिदाममांसंयावत्प्रसूताभवति ततःपारदरसंसार्धनिष्कत्रयं कस्मिश्चिन्नालिकाद्वयेनिक्षिपे
६२ त् ॥ तस्योर्ध्वंछिद्रंसिक्थकेन रुध्वाचिल्हालयंगत्वा चिल्हांडद्वयस्योपरि नालिकाद्वयंनिधाय प.१८
लोहशलाकयानालि काद्वयमध्यमार्गेण ॥ तदंडद्वयंलघुहस्तेन वेधयित्वाशलाकामुद्धरेत् ॥
तेनैवमार्गेणअंडमध्ये यथारसोगच्छतितथायत्नंकुर्यात् ॥ ततोंडद्वयछिद्रं चिल्हाविष्टयाले
पयेत् ॥ ततःस्तद्वृक्षाधोनित्यमलि बल्युपहारेणपूजांकुर्यात् ॥ यावत्स्वयमेवआगत्य अंडा
निस्फोटयंतितावन्नित्यमुपरिगत्वावीक्षयेत् स्फुटितेसतिगुटिकाद्वयंग्राह्यं ॥ ततोवृक्षादु
त्तीर्यमार्गेण योवामिलतिमनुष्यः स्तस्मैएकादातव्या अपरास्वयंमुखेधारयेत् ॥ द्वादशयो
जनंगत्वापुनरेवनिवर्तते ॥ इतिप्रसिद्धयोगः ॥ ९ ॥ * ॐ ह्रीं ह्रूं फट् चिल्हाचक्रेश्वरि
परात्परेश्वरिपादुकागमनंदेहिस्वाहा ॥ १० ॥ अनेनमंत्रेणजपपूजांचकुर्यात् ॥ २१ ॥ लक्ष
त्रयंजपेन्मंत्री ध्यात्वातांरक्तवर्णकां ॥ कदंबवनमध्येतु मदाघूर्णितलोचनां ॥ २२ ॥ कुंडलै
र्मणिभिर्दिव्यै र्वस्त्रालंकारभूषितां ॥ साम्रतंकलशंवामे दक्षिणेमणिहारकं ॥ २३ ॥ दधतीं
चिंतयेद्दीप्तां रक्तपद्मोपरिस्थितां ॥ प्रहसंतींचित्रलेखां प्रसंनांनवयौवनां ॥ २४ ॥ ईदृशीं ६२

पूजयेन्नित्यं जपांतेभोजयेत्ततः ॥ शर्कराच्छागमांसंतु गोक्षीरघृतसंयुतं ॥ २५ ॥ दशांशे नततस्तुष्टा र्लंचरत्वंप्रयच्छत्ति ॥ विमानंखेचरत्वंच ददात्यमृतभोजनं ॥ २६ ॥ आयुर्लक्षा युतंचैव हारकेयूरमंडलं ॥ नानालोकगतिंचैव यस्मान्मंत्रीसुखीभवेत् ॥ २७ ॥ * ॐ चि त्रलेखेआगच्छ २ रुरुह्रींस्वाहा ॥ ११ ॥ इतिश्रीसिद्धनागार्जुन विरचितेकक्षपुटेपादुकोप देशोनामअष्टादशःपटलः ॥ १८ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ अथमृतसंजीवनीविद्यामाह प्रवक्ष्यामिसमासतः ॥ लिंगमंकोलवृक्षाधः स्थापयित्वाप्रपू जयेत् ॥१॥ नवंघटंचतत्रैव स्थापयेल्लिंगसंनिधौ ॥ वृक्षलिंगंघटंचैव पूजयेल्लिंगसंन्निधौ ॥२॥ वृक्षंलिंगंघटंचैव सूत्रेणैकेनवेष्टयेत् ॥ चतुर्भिःसायकैःसार्धं प्रतियामंक्रमेणतु ॥ ३॥ एवं दिवानिशंकुर्या दघोरेणसमर्चनं ॥ पुष्पादिफलपक्कान्न साधनंकारयेत्सुधीः ॥ ४ ॥ फला

कक्ष

६३

निपक्वान्यादाय पूर्वोक्तैःपूरयेद्घटं ॥ तद्घटंपूरयेद्धीमा न्गंधपुष्पाक्षतादिभिः ॥ ५ ॥ तुषव
जैंततःकृत्वा बीजानांघर्षयेन्मुखं ॥ तन्मुखेटंकणंचूर्णं किंचिंत्किचित्प्रलेपयेत् ॥ ६ ॥
विस्तीर्णमुखभांडांतः कुंभकारांगणोद्धृतं ॥ मृत्तिकांलेपयेत्तत्र तानिबीजानिरोपयेत् ॥ ७ ॥
कुंडल्याकारयोगेन यत्नादूर्ध्वमुखानिच ॥ तच्छुष्कंताम्रभांडोर्ध्वं भांडंदेयमधोमुखं ॥ ८ ॥
आतपेधारयेत्तैलं ग्राहयेत्तंचरक्षयेत् ॥ माषार्धंचैवतत्तैलं माषार्धंतिलतैलकं ॥ ९ ॥ तस्यदे
यंमृतस्यैत त्सम्यक्तस्यासितेनतु ॥ तत्क्षणाज्जीवयेत्सत्यं गतोवापियमालयं ॥ १० ॥ रो-
गादिमृत्युसर्पादि मृतोजिवतिनिश्चितं ॥ पुंशुक्रपारदंतुल्यं तेनतैलेनमर्दयेत् ॥ ११ ॥ न
स्यंदेयंमृतस्यैव कालदष्टस्यतत्क्षणात् ॥ जीवमायातिनोचित्रं महादेवेनभाषितं ॥ १२ ॥
पुष्यभास्करयोगेन गुडुचीमूलमाहरेत् ॥ कर्षमुष्णोदकैःपीतं अपमृत्युहरंपरं ॥ १३ ॥ अ
घोरेभ्योथघोरेभ्यो घोरघोरतरेभ्यः ॥ सर्वेभ्यःसर्वशर्वेभ्यो नमस्तेअस्तुरुद्ररूपेभ्यः ॥ १४ ॥
उक्तयोगद्वयस्याथमंत्रः ॥ अथकालज्ञानं ॥ रोचनैःकुंकुमैर्लाक्षा नामिकारक्तसंयुतैः ॥ १५ ॥
द्वादशारंलिखेत्पद्मं तद्बहिश्चैवतत्समं ॥ षोडशारंततोबाह्ये मूलबीजंदलेलिखेत् ॥ १७ ॥
प्रथमस्यदलेवर्णं मासश्चैवबाहिर्दले ॥ दिवसाषोडशारेतु साध्यानामांतुकर्णिके ॥ १८ ॥ पूज

पुटी.

प. १९

६३

येच्चक्रमेतत्तु तदंतेतन्निरीक्षयेत् ॥ यद्दलेचाक्षरंलुप्तं तद्दलेम्रियतेध्रुवं ॥ १९ ॥ वर्षमासंदिनं
पश्ये त्स्वस्यनाम्नापरस्यवा ॥ २० ॥ यदावर्णोनलुप्तःस्या त्तदामृत्युर्नविद्यते ॥ वर्षद्वादश
पर्यंतं कालज्ञानंशिवोदितं ॥ २१ ॥ * ॐ उग्रकालपुरुषोत्तमसंहारकालमूर्तेकालक्षकाय
अंतकालंप्रदर्शय प्रधानकालं प्रदर्शयस्वाहा ॥ १ ॥ इमंमंत्रंनित्यमष्टोत्तरसहस्रंजप्त्वापंचो
पचारैःसप्तदिनपर्यंत मनेनैवमंत्रेणपूजयेत् प्रत्ययोभवति ॥ २२ ॥ मार्गशीर्षस्यकृष्णायां
पंचम्यांनीरजंशुभं ॥ भूर्जपत्रंसमानीय लाक्षाकुंकुमरोचनैः ॥ २३ ॥ स्वकीयानामिकारक्तै
र्लिखेद्विद्यांशिवोदितां ॥ क्रमपूजांविधायादौ पश्चाद्विद्यांसमर्चयेत् ॥ २४ ॥ शरावयुगम
ध्यस्थां जातीपुष्पैःसुवेष्टितां ॥ शुभेपीठेविधृत्याथ तांविद्यांप्रजपेन्निशि ॥ २५ ॥ प्रातःक्रमा
र्चनंभूयः कृत्वापूज्याःकुमारिकाः ॥ साधकस्त्वेकचित्तेन पश्चाद्विद्यांविलोकयेत् ॥ २६ ॥
वर्णाधिक्येभवेद्राज्यं मात्राधिक्येचसंपदः ॥ समत्वेसौख्यमारोग्यं हानिर्बिंदुविलेपनात् ॥
मात्राहीनेभवेद्व्याधि मरणंबिंदुनाशने ॥ २७ ॥ * ॐ ह्रीं ह्रूं म्लें महापतयेरक्ष २ मामृ
तोद्भवेम्लें ह्रूं ह्रीं विच्चेविच्चे ॥ २ ॥ उत्तराभिमुखस्थोयो यदिजानातिदक्षिणं ॥ दिङ्
मूढःसतदाज्ञेयः सप्तमासान्नजीवति ॥ २८ ॥ शुद्धंनिर्मलमादित्यं विरलंयदिपश्यति ॥ त

ह्वर्षांतेक्षयंयाति नान्यथाभैरवोदितं ॥ २९ ॥ सितंकृष्णंहरीतंवा सशूलंभानुमंडलं ॥ यः
पश्यतिसदासोवै वर्षादूर्ध्वंनजीवति ॥ ३० ॥ रविबिंबेजलेदृष्टे संपूर्णेनमृतिःक्वचित् ॥ खं
डेदिक्षुक्रमान्मृत्यु रेकषट्द्वित्रिमासतः ॥ ३१ ॥ मध्यच्छिद्रेदशाहेन तद्दिनेधूमसंकुले ॥ अ
रुंधतींध्रुवंसोमं छायायांवामहापथं ॥ ३२ ॥ योनपश्यतिनिस्तेजो वर्षांतेम्रियतेध्रुवं ॥ स
च्छिद्रोदृश्यतेचंद्र स्तद्वद्वादर्पणेरविः ॥ ३३ ॥ दृश्यतेनिस्पृहोवापि यस्यासौम्रियतेब्दतः ॥
यस्यव।स्नानमात्रेण त्हृत्पद्मंयादिपश्यति ॥ ३४ ॥ धूमोवामस्तकेनास्ति सप्तमासान्नजीवति ॥
अग्रतःपृष्ठतोवापि यस्यस्यात्खंडितंपदं ॥ ३५ ॥ कर्दमेपांसुपुंजेवा सप्तमासान्नजीवति ॥
कृष्णरक्तानिवस्त्राणि रक्तमालानुलेपनं ॥ ३६ ॥ स्वप्नेयोलभतेकस्मात्षण्मासांतेनजीवति
॥ भक्तिःशीलंस्मृतित्यागो बुद्धिर्बलमहेतुकं ॥ ३७ ॥ यस्यैतानिनिवर्तंते षण्मासांतेनजीव
ति ॥ राक्षसैर्भूतवेतालैः श्वानशूकरगर्दभैः ॥ ३८ ॥ गृध्रैःकाकैरुलूकैश्च महिषैर्वाक्रमेलकैः
॥ स्वप्नेवेष्टितमात्मानं पश्येदब्दान्नजविति ॥ ३९ ॥ अशिरस्कांयदापश्ये दात्मच्छायाम
थापिवा ॥ सुकृष्णास्तारकाःपश्ये त्षण्मासांतेनजीवति ॥ ४० ॥ स्वप्नेदेहंस्वकंस्थूलं तैला
क्तंवाथपश्यति ॥ भीतःक्रुद्धोथवानित्यं मासादूर्ध्वंनजीवति ॥ ४१ ॥ निशिचापंदिवा

चोल्का ममेघेशानिदर्शनं ॥ यःपश्येत्म्रियतेसोपि षण्मासाच्छंकरोदितं ॥ ४२ ॥ शंखाव
र्तेभ्रुवोर्मध्ये गुल्फयोमर्मसंधिषु ॥ स्पंदनंयस्यवैनास्तिमासादूर्ध्वंनजीवति ॥ ४३ ॥ च
क्षुषीस्रवतोनित्यं नशृणोत्यपिनिश्चितं ॥ दीपगंधंनजानाति पक्षादूर्ध्वंनसंशयः ॥ ४४ ॥
विनाशखंड्डमंप्रेतान् पिशाचान्दिव्यपत्तनं ॥ यदिपश्यतिसोस्वप्ने दशमासान्नजीवति
॥ ४५ ॥ ओष्ठयोर्धूसरत्वंवा शुष्कंवातालुदेशकं ॥ स्कंधौवाभुग्नमायांतं षण्मासांते
नजीवति ॥ ४६ ॥ कालज्ञानमितिज्ञात्वा तस्यकुर्वीतवंचनं ॥ योगाभ्यासेनमंत्रेण ध्यानै
र्वाथरसायनैः ॥ ४७ ॥ ब्रह्मविष्णुरुद्रभेदा त्कालस्यांशत्रयंक्रमात् ॥ ज्ञेयंजननमारभ्य मं
त्रतंत्रेशिवोदितं ॥ ४८ ॥ वर्षाण्येकादशंब्रह्मा शरीरंव्याप्यतिष्ठति ॥ तथाविष्णुस्तथारुद्र
एवमावर्तयेत्क्रमात् ॥ ४९ ॥ ब्रह्मकालेनाभिपद्मे विष्णुकालेत्हृदंबुजे ॥ कंठाब्जेरुद्रकालेतु
ध्यात्वाकालस्यवंचनं॥५०॥कालसंकर्षणींविद्यां ज्योतिरूपांजपेत्ततः ॥ कालोविमुखतांयाति
लक्षजाप्येकृतेसाति ॥ ५१ ॥ * ॐ ह्रीं ल्हीं प्रेंक्षौं ढौं ढां क्रौं संमोहिनिचंडकालसंक
र्षण्यैनमः ॥ ३ ॥ एवंजपेदिमंमंत्रं दशांशंस्वास्तिकेहुनेत् ॥ कुब्जिकांसमर्यांवाथ
जपेद्वाथनवात्मिकां ॥ ५२ ॥ पश्चिमाम्नायसक्तस्य प्रोक्तेयंकालवंचना ॥ नाभि

 तोब्रह्मरंध्रांतं सर्वाभांज्योतिरूपिणीं ॥ प्रोल्लसंतींजपेन्नित्यं मायांकालस्यवंचनीं ॥ ५३ ॥
* ॐ ह्रीं इति मायां ॥ ४ ॥ स्वकीयंग्रसतेयोसौ चित्तंकालकलाकुलं ॥ ग्रासांतेनस्म
 रेत्किंचि त्कालस्तस्यकरोतिकिं ॥५४॥ इतिश्रीसिद्धनागार्जुनविरचिते कक्षपुटे मृतसंजीवनी
नामैऽकोनविंशः पटलः ॥ १९ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ अत्याहारंमनाहारं प्रवदामिसमासतः ॥ येननिःशेषलोकस्य जायतेकौतुकंमहत् ॥ १ ॥
बुध्नकेनाक्षवृक्षस्य पीठंकृत्वासनेस्थितः ॥ योसौभुंक्तेघृतैःसार्धं भोजनंभीमसेनवत् ॥ २ ॥
गृहीत्वामंत्रितान्मंत्री बिभीततरुपल्लवान् ॥ आक्रम्यदक्षजंघाधो विंशत्याहारभुग्भवेत् ॥ ३ ॥
उद्भ्रांतपत्रमादाय कपिलश्वानदंतकं ॥ कव्यामेतत्त्रयंबध्वा भुंक्तेसोबकवद्भवेत् ॥ ४ ॥ सं
ध्यायामर्कवृक्षस्य कर्तव्यमभिमंत्रिणं ॥ प्रातःपुष्पाणिसंगृह्य मालांशिरसिधारयेत् ॥ कौ

पीनंसंपरित्यज्य सभुंक्तेभीमसेनवत् ॥ ५ ॥ * ॐ नमःसर्वाधिपतयेग्रसग्रसशोषय २ भैर
वीआज्ञापयतिस्वाहा ॥ १ ॥ उक्तयोगानामयंमंत्रः ॥ अधरंकृकलासस्य शिखास्थानेनिबं
धयेत् ॥ वायुपुत्रइवाश्चर्यं सतुभुंक्तेन्नपर्वतं ॥ ६ ॥ * ॐ नाडीवेगेनउर्वशीस्वाहा ॥ २ ॥
अंत्राणिकृकलासस्य मज्जांकारंजबीजजं ॥ पिष्ट्वातद्गुटिकांकुर्यात्त्रिलोहेनतुवेष्टयेत् ॥ तांव
क्त्रेधारयेद्योसौ क्षुत्पिपासैर्नबाध्यते ॥ ७ ॥ * ॐ शांसंशरीरंअमृतमाकर्षयस्वाहा ॥ ३ ॥
पद्मबीजंमहाशालीं छागीदुग्धेनपाचयेत् ॥ साज्यंतत्पायसंभुक्त्वा द्वादशाहंक्षुधापहं ॥ ८ ॥
तुर्यदुंबरजंबीर शालीबिंबशिरीषजं ॥ बीजंसंचूर्ण्यसाज्यंतद्भुक्तंपक्षंक्षुधापहं ॥ ९ ॥ चक्रम-
र्दस्यमूलंतु दूर्वांकुरकसेरुकं ॥ नीलोत्पलस्यमूलानि क्षीरैर्गोपंचकोद्भवैः ॥ १० ॥ पचेत्तत्पा
यसंसाज्यं भुक्त्वामासंक्षुधापहं॥उदुंबरफलंफक्क मंकुलीतैलभावितं॥११॥भुक्त्वामासंक्षुधाहंति
पिपासांनात्रसंशयः ॥अपामार्गस्यबीजानि त्वग्वर्जानिप्रपाचयेत्॥१२॥पायसंजांविकाक्षीरै
र्भुक्तंमासंक्षुधापहं ॥ दुग्धासितुंफलंधात्र्या दिनैकंपेषयेत्ततः ॥ १३ ॥ सिताज्यसहितंपा
च्यं मोदकंभक्षयेत्तुतं ॥ दशरात्रंक्षुधाहंति पिपासांनात्रसशंयः ॥ १४ ॥ उदुंबरंशमीजंबू
बीजपूरशिरीषजं ॥ बीजचूर्णंघृतैर्युक्तं मासार्धंतत्क्षुधापहं ॥ १५ ॥ औषधंकुरणीनाम हि

कक्ष हस्तोस्याश्वकांडकं ॥ एरंडसदृशैःपत्रैः पुष्पैश्चापिसुलक्षयेत् ॥ १६ ॥ तस्याःकंदंस पुटी.
मादाय कृत्वाखंडानिपाचयेत् ॥ यामैकंमाहिषैःक्षीरैः छायायांशोषयेत्ततः ॥ कर्षैकंभक्षये
न्नित्यं क्षुत्पिपासाहरंपरं ॥ सिद्धयोगमिदंख्यातं पुरानागार्जुनोदितं ॥ १७ ॥ * ॐ नमो प.२०
६६ भगवतेरुद्राय अमृतार्णवमध्यस्थायममशरीरेअमृतंकुरु २ ससःस्वाहा ॥ ४ ॥ उक्तयोगा
नामयमेवमंत्रः ॥ अथसांगोपांगप्रकारेणकक्षपुटी ॥ भागाःषोडशभृंगस्य सहदेव्यास्त्रयस्त
था ॥ त्रयोदशशिखाभागा पुत्रजारीद्विभागिका ॥ १८ ॥ हस्तजोडीसप्तभागा गोरंभाया
श्चतुर्दश ॥ एकादशरुदंत्यास्तु वंध्याकर्कोटिकाष्टच ॥ १९ ॥ दशभागारुद्रजटा विष्णुक्रां
तातदर्धका ॥ श्वेतार्कस्यचतुर्भागा लज्जारीनवभागिका ॥ २० ॥ षट्भागालक्ष्मणाज्ञेया
द्विषट्कामेषशृंगिका ॥ चांडालीभागएकःस्या त्तिथ्यंशाचेंद्रवारुणी ॥ २१ ॥ एतत्षोडश
कंयोगं सर्वसिद्धिकरंनृणां ॥ प्रतियोगंचतुष्कोष्टे चतुःस्त्रिंशच्चभागकाः ॥ २२ ॥ ग्राहयेदु
क्तयोगेतु यथायत्रयथोचिताः ॥ एतेषांपरिभाषातु ज्ञप्तिहेतोर्निगद्यते ॥ २३ ॥ कलागुण
स्मराःपक्ष समुद्राभुवनानिच ॥ रुद्रानागाश्वादिकूबाणा युगग्रहरसंरविः ॥ २४ ॥ चंद्रश्चाति ६६
थयश्चेतिज्ञात्वा भागानिसंहरेत्॥भूर्जपत्रेवटेवाथ चतुरस्रंसमालिखेत् ॥२५॥रोचनात्कुंकुमा

भ्यांतुकुर्यात्षोडशकोष्ठकं ॥ २३ ॥ * ॐ ह्रां ह्रीं ह्रूं ह्र श्चतुर्दिक्षुएकैकंबीजमालिखेत्
॥ ५ ॥ मात्राष्टकंलिखेद्दिक्षु ममरक्षतुसंयुतं ॥ मंत्रेणहुंफडंतेन प्रणवाद्येनतत्क्षणात् ॥ २४ ॥
रुध्वापाशांकुशाभ्यांतु रेखाग्रेवज्रमालिखेत् ॥ षोडशानांतुकोष्ठानां मध्येष्वेकैकमौषधं ॥
॥ २५ ॥ स्थापयेत्पूजयेद्धीमान् चंडामंत्रेणभक्तितः ॥ ईशानादिक्रमेणैव कुंडलाकारतोभ
वेत् ॥ स्थापनंपूजनंचैव सर्वकामार्थसिद्धये ॥ २६ ॥ * ॐ ह्रीं रक्तचामुंडेतुरुतुरुममसर्वसि
द्धिंकुरुकुरुस्वाहा॥ ६ ॥ अयंमंत्रः पूर्वमेवायुतजपात्सर्वसिद्धिकरोभवेत् ॥ कलागुणस्मरैर्द्वाभ्या
मंगलेपेजगद्वशं ॥ तैलेनकापिलाज्येनकज्जलीराजवश्यकृत् ॥ २७ ॥ द्विसप्तमनुरुद्रैस्तुअं
गलेपेजगद्वशं ॥ तैरेवपुष्करेक्षेत्रे भोजनेस्त्रीवशाभवेत् ॥ २८ ॥ कलानवयुगैर्बाणै रंगलेपेजग
द्वशं ॥ इदंपंचमलोपेतं चंदनागरुमाक्षिकैः ॥ २९ ॥ धूपितंवस्त्रपुष्पंवादत्तं स्त्रीराजवश्यकृ
त् ॥ तिथींदुसूर्यऋतुभि रंगलेपेजगद्वशं ॥ ३० ॥ षोडषाद्यस्तुधूपेन नवसद्विद्वर्त्तनेनच ॥
चतुराद्यंजलेयोज्यं पंचाद्यंस्नानकर्मणि ॥ ३१ ॥ भक्ष्यंकलादिरुद्रांत मेतत्सर्ववशंकरं ॥
स्नानेबाणादिभक्ष्यंतं सर्वलोकवशंकरं ॥ ३२॥ षण्णवत्रिकलायोगा त्तिलकंसर्ववश्यकृत् ॥
२३ मुन्यर्कस्मरपक्षैःस्याद्योनिलेपेपतिर्वशः ॥ ३३॥ रुद्रेंदुवसुमुनिभिर्भगलेपेपतिर्वशः॥ दिग्बाणनि

धिवेदैश्च गुटिकाचवशंकरी ॥ ३४ ॥ धारयेन्मस्तकेभाले भोजनेवाथभोजयेत् ॥ गुणदिग्व
सुकामैस् स्यादंगलेपेऽभयंकरः ॥ ३५ ॥ वसुपक्षस्मरैरुद्रै र्न्यस्तंयोनौप्रसूतिकृत् । दिगष्टसप्तनव
भिः पाणौलेपेकृतेसाति ॥ ३६ ॥ द्यूतेविजयमाप्नोति यथादुर्योधनोध्रुवं ॥ मनुस्मरत्रिभि
र्वेदैः कृत्वातुगुटिकांकरे ॥३७॥ बाहौशिरसिकर्णेवा धृत्वाचौरैर्नबाध्यते ॥ गुणदिक्सप्तनवभि
र्भगलेपंतुकारयेत् ॥ ३८ ॥ ऋतुस्नातारमेत्पत्यावंध्यापुत्रवतीभवेत् ॥ तिथिद्विगुणषड्भिःस्या
द्गुटिकावीर्यधृङ्मुखे ॥ ३९ ॥॥ अथवाहस्तलेपेन तप्तलोहैर्नबाध्यते ॥ स्मरसूर्येंदुवसुभि श्चू
र्णंकृत्वाप्रयोजयेत् ॥ ४० ॥ चंडवातेनतत्क्षिप्रं परसैन्यविदारकं ॥ तिथींदुवसुदिग्भिस्तु
चूर्णंकृत्वाजलेक्षिपेत् ॥ ४१ ॥ तंपीत्वापरसैन्यंतु दर्पहीनंप्रजायते ॥ रुद्रेंदुषट्कलायुक्तं ज
लेन्यस्तंचपूर्ववत् ॥ ४२ ॥ तिलकेबाहुमूलेवा धारयेद्वाथमूर्धनि ॥ द्विट्सैन्यानिपलायंते
नात्रकार्याविचारणा ॥ ४३ ॥ कलाग्रहयुगैर्बाणैः पिष्ट्वापादौप्रलेपयेत् ॥ यथेष्टंजलमध्येतु
गच्छत्येवयथास्थले ॥ ४४ ॥ चंद्रार्कसप्तभुवनैः पादलेपाच्चपूर्ववत् ॥ वेददिङ्मुनिकामै
श्चवत्क्रस्थैर्नाक्रमेद्विषं ॥ ४५ ॥ स्मरार्काष्टगुणैर्युक्तं तिलकंशत्रुजिद्भवेत् ॥ रुद्रार्कबाणऋतु
भि स्तिलकंचांगलेपनं ॥ ४६ ॥ कृत्वासर्पैर्गजैःक्रूरै र्व्याघ्रैर्दुष्टैर्नबाध्यते ॥ सप्तषण्णव

ऋक्षैश्च पुष्यकैस्त्वमलैर्युतं ॥ ४७ ॥ दतंभूपनरस्त्रीणां सर्वलोकवशंकरं ॥ युगेंदुमुनिभोमाशै
र्नार्यापिष्टैरवेर्दिने ॥ ४८॥ पुष्यार्केलेपयेत्स्वागं सर्वत्रविजयीभवेत् ॥ स्पृष्टमात्रेनसंदेहः श
त्रुवादेजयंकरः ॥ ४९ ॥ गुणषट्तिथिदिग्भिस्तु युक्तंपंचमलैःसह ॥ हस्तौपादौलिपेत्तेन
स्पृष्टेस्त्रीनृपवश्यकृत् ॥ ५० ॥ रवींदुस्मरनागैस्तु युक्तंपंचमलैःसह ॥ दशांगधूपैर्लेपोयं धन
धान्यकरोगृहे ॥ ५१ ॥ कलारुद्रेंदुऋतुभिर्लेपनाद्धारणादपि ॥ युद्धेबाणंहरख्यातं तथालो
कवशंकरं ॥ ५२ ॥ कलाषण्णवरुद्रैस्तु गव्याजैर्माहिषैर्धृतैः ॥ भूताहेकज्जर्लींकृत्वा ह्यंजनं
चातिमोहकृत् ॥ ५३ ॥ दृष्टिस्तंभंचकुरुते नराणांनात्रसंशयः ॥ रवींदुसप्तभुवनै स्तिलतै
लसमायुतं ॥ ५४ ॥ धूपोदृष्टिभ्रमकरो नराणांनात्रसंशयः ॥ नागेंदुदिनादिग्भिस्तु पुष्यार्केतद्दि
नेकृतं ॥ ५५ ॥ तैलेनवरधूपेन धूपोनयनमोहकृत् ॥स्मरार्कर्ष्यगुणैर्युक्तं पूर्णेंदौयोगउत्तमः ॥
॥ ५६ ॥कृत्वातत्तिलकंभाले सर्ववश्यकरंभवेत् ॥ द्विसप्तद्वादशैःकामै र्जनमोहनवश्यकृत् ॥
॥ ५७॥ तिलकोनात्रसंदेहो नानावादंजयत्यपि॥दिग्बाणतिथिवेदैश्च पूर्णिमायांगुरोर्दिने ॥
॥ ५८ ॥मलपंचयुतंक्षिप्त्वा वापीकूपतडागके ॥ पिबंतितज्जलंयेतु तेतुवश्याभवंतिवै ॥
॥ ५९नवषट्तिथिवेदैश्च दर्शसोमदिनेकृतं ॥ देयंपंचमलोपेतं भोजनसर्ववश्यकृत्

दिनेतुसूर्यर्क्षतुभि र्गुरुपुष्येतुमेलितं ॥ हस्तार्केवाथपूर्णायां धूपोवश्यकरोनृणां ॥ ६० ॥ कला
सप्ताब्धिनवकै र्धत्तूररसपेषितैः ॥ स्वदेहेलेपनंकृत्वा रतौरामावशंनयेत् ॥ ६१ ॥ पंचगव्ये
नसहितै र्मनुसप्तयुगग्रहैः ॥ कुमुदैःकमलैर्धूपो ज्वरभूतविषापहः ॥ ६२ ॥ मनुरुद्रयुगैर्बाणै
भानुपत्रद्रवप्लुतैः ॥ विषंचतुर्विधंहंति तस्यपानप्रधूपतः ॥६३॥ कलाकामगुणैर्द्राभ्यांहरिद्राघृ
तपानतः ॥ विषंनानाविधंहंति कालदष्टोपिजीवति ॥ ६४ ॥ दिक्कलागुणबाणाश्च चूर्णंभ
क्ष्येप्रदापयेत् ॥ सर्वेषांपशुजीवानां नानावश्यकरंपरं ॥ ६५ ॥ कलाकामगुणैर्द्वाभ्यां
कृत्वारक्षांविधारयेत् मुच्यतेबंधनाच्छीघ्रं कृतदोषोजयंलभेत् ॥ ६६ ॥ कला
गुणयुतैरुद्रैः सितामध्वाज्यपिंडितैः ॥ कर्षमात्रंसदास्वाने षण्मासैःपलितप्रणुत्
॥ ६७ ॥ वज्रकायोभवेद्वर्षा ज्जीवेद्ब्रह्मादिनत्रयं ॥ कलाषण्मुनिबाणाश्च एकवर्षंगवां
पयः ॥ ६८ ॥ पिष्ट्वापिबेद्व्रताद्बंध्या सम्यक्पुत्रंप्रसूयते ॥ वसुरुद्रस्मरैर्द्वाभ्यां पूर्वव
ल्लभतेसुतं ॥ ६९ ॥ दिग्गुणाष्टस्मरैश्चूर्णं मूर्ध्न्युच्चाटकृदीरितं ॥ रुद्राष्टस्मरपक्षैस्तु सिताम
ध्वाज्यसंयुतैः ॥ ७० ॥ आलिप्तांगोविवादेतु जयमाप्नोतिनान्यथा ॥ तिथिपक्षयुगैःकामैः
सकर्पूरैर्गुरोर्दिने ॥ ७१ ॥ नरतैलेनतद्वर्तिंदीपात्पश्यतिभूनिधिं ॥ नवषण्णागरुद्रैश्च मुंडि

तानिविनश्यतः ॥ ७२ ॥ मौनेप्राप्तदृशिरोमौनी पिष्ठाचांकुलतैलकैः ॥ हस्तौलिप्त्वाभवेल्ल
क्ष्मीः पादयोर्वीरधारिणां ॥ ७३ ॥ शतयोजनगामीयं भवत्येवनसंशयः ॥ दिग्वेदमुनिका
मैश्च अंकुलीतैलपेषितैः ॥ ७४ ॥ पुष्यभास्करयोगेन त्रिलोहेनतुवेष्टयेत् ॥ अधस्थैःखेचर
त्वंस्या द्योजनानांशतावधि ॥ ७५ ॥ * ॐ मलिनेमालिनीवासिनीदुष्टसत्वान्मोहय २
जृंभय २ य २॥ नीलवस्त्रेलिखेन्मंत्रं क्षिप्रमेवसुसिध्यति ॥ ७ ॥ अथकौतूहलं ॥ रुद्रेंदुमनु
नागाश्च नवनीतेनसंयुतं ॥ रविपत्रेणलेपेन नेत्रयोरंजनेनच ॥ ७७ ॥ पुरुषोजायतेरामा
यथारंभागुणान्विता ॥ कलारुद्रैर्गुणैर्वेदै धूपोयंमधुमिश्रितः ॥ ७८ ॥ अपस्मारंनिहत्याशु
नानाकारंमहोत्कटं ॥ गुणकामैःस्वरैरुद्रै रंकुलीतैलपेषितैः ॥ ७९ ॥ त्रिलोहवेष्टितैर्वक्त्रे
धारितैःपुष्यभास्करे ॥ अदृश्योजायतेसत्यं देवैरपिनदृश्यते ॥ ८० ॥ * ॐ आसारांकांगार
कांबरी प्रथमशक्तिरजोभक्षिणीरविशतीप्रकाशिनीआवर्षणंकुरुस्वाहा ॥ ८ ॥ इतिश्रीसिद्ध
नागार्जुनविरचितेकक्षपुटे अंतर्धानादिकथनंनामाविंशपटलः ॥ २० ॥ समाप्तोयंग्रंथः ॥

इदं पुस्तकं सावन्तोपाव्ह-आबाजी रामचन्द्र-इत्यनेन वेणुग्रामे स्वीये " श्रीरामतत्व " प्रकाश
मुद्रणालये वे. शा. सं. गुराचार्य बाळकृष्णाचार्य भुर्कुंबाग तथा नागेश गोविंदभट्ट हेर्लेकर
शास्त्रिभ्यां संशोध्याङ्कितम् । १८१९ शकाब्दे वैशाखमासेसमाप्तिमगमत् ।

Mysore M. G. Gopalakrishna Sastri C.S. College Bangalore city

॥ इति श्रीकक्षपुटीग्रंथ समाप्तः ॥